मृच्छकटिका

ID EST

CURRICULUM FIGLINUM

SÛDRAKAE REGIS

FABULA

SANSKRITE EDIDIT

ADOLPHUS FRIDERICUS STENZLER.

BONNAE
IMPENSIS H. B. KOENIG
1847.

PRAEFATIO.

Satis longum tempus praeterlapsum est, ex quo primum Mriććhakaṭikam edendi consilium animo concepi. factum enim illud est aestate anni 1830, cum Parisiis degens legissem Wilsoni huius fabulae interpretationem anglicam. Itaque cum mense Septembri eiusdem anni, relicta urbe post turbas Iulias vix pacata, Londinium appulissem, commendaticiisque Rosenii mei litteris facilem ad bibliothecam Curiae Indicae aditum a Wilkinsio, sene venerabili, assecutus essem, nihil antiquius habui, quam ut uberrimam illam Sanscritorum librorum copiam perquirerem, si forte contingeret, ut deprehenderem fabulae illius exemplum. Incidi vero in duos codices, in Mickelii catalogo numeris 209 et 749 notatos, quibus integer fabulae textus continetur. horum igitur alterum statim describere coepi, alterius vero scripturae discrepantiam accurate adnotare. In hoc labore nondum ad noni actus finem progressus eram, cum eiusdem fabulae editio, Calcuttae anno 1829 impressa, Londinium pervenit. itaque in reliqua dramatis parte molesto describendi negotio liberatus, utriusque codicis scripturae varietatem in margine editionis Calcuttensis enotavi. Annis mox insequentibus tantopere eram aliis studiis occupatus, ut de Mriććhakaṭika mea castiganda et ad editionem praeparanda ne cogitare quidem possem, et cum medio anno 1833 a Rosenio meo comperirem, exstare in Roberti Chambersii Sanscritorum librorum collectione duos codices, alterum dramatis mei textum, alterum commentarium continentem, iam rebus urgentibus coactus eram sarcinas colligere, Britanniaeque solum, quod haud unam ob caussam adamaveram, relinquere. Inter varios deinde labores, a studiis meis Sanscritis plerumque alienissimos et haud paullum incommodos, nunquam destiti

optare, ut propositum illud peragere liceret, animo varie fluctuante, cum modo me accingerem ad opus vel deficiente codicum Chambersianorum usu suscipiendum, modo de eo sine illis auxiliis recte ad finem perducendo desperarem. Itaque per complures annos haesitans manum operi admovere non ausus sum, donec initio anni 1842 nuntiatum est, totam copiam librorum Sanscritorum a Roberto Chambersio collectorum, qui singulatim d. 13. m. Aprilis eiusdem anni publica auctione vendendi erant, ante diem statutam Friderici Guilelmi IV munificentia integram esse redemptam, ut in Bibliothecam Regiam Berolinensem reciperetur. Qui nuntius, omnibus qui in Germania studia Sanscrita tractant laetissimus, laetior venire potuit nemini quam mihi. Ut primum igitur potestas data est, alterum codicem, qui textum dramatis tenet, cnm editione Calcuttensi contuli, alterum vero, qui commentarium tenet, integrum descripsi, atque hoc labore finito novam editionem parare coepi, quae nunc tandem, serius quam et exspectaveram et optaveram, prodit in lucem.

Praemittenda haec duxi, ut intelligeretur, quomodo factum sit, ut mea huius dramatis recensio, quam propositam me habere inde ab anno 1830 haud paucis notum erat, nunc demum edatur. In qua instruenda codices a me usurpati sunt hi:

A. Codex Londinensis, in Bibliotheca Curiae Indicae servatus et in catalogo Mickelii numero 209 notatus.

B. Codex Londinensis, ibidem numero 749 notatus.

C Textus editionis Calcuttensis, quae prodiit anno 1829.

D. Codex Berolinensis, in catalogo collectionis Chambersianae (impresso Londini 1842. 8.) numero 242 notatus. De foliis 55 desunt fol. 1. et folia 34—40. Vide adnotationes ad p. 2, 14. p. 106, 1. et ad p. 132, 7.

Denique siglo *Com.* significavi Codicem Berolinensem, in eodem catalogo numero 443 notatum, qui 37 foliis commentarium continet.

Omnes codices litteris Devanagaricis scripti sunt. singulorum vero ratio haec est.

Codex A textum exhibet optimum, quem recensioni meae tanquam fundamentum substruere haesitare non potui.

Codices B et C cum in aliis multis tum in eo consentiunt, quod p. 177 post lineam 3 habent scenam a Nîlakan't'ha additam, quam in adnotationibus ad l. l. exhibui.

Codex D descriptus est e codice qui plerumque consentiebat cum B, deinde vero correctus ex alio codice, qui codicis A scripturam habebat. quanquam non

desunt loci, in quibus D prima manu reddit scripturam codicis A. Adnotationes exstant in margine foliorum undecim priorum (usque ad p. 34. l. 24. huius editionis) et deinde in margine foliorum 29—33 (p. 93—106) huius editionis), quibus plerumque loci pracriti sanscrite explicantur. Interdum vero, si quae alia addita sunt, quibus singulorum locorum sensus explicatur, ea fere consentiunt cum verbis commentarii *(Com.)*.

Commentarius denique post brevem de diversis pracritis dialectis, quae in dramate reperiuntur, disputationem, quam mox integram exhibebo, id praecipue agit, ut versus pracritos indicet, eosdemque additis metrorum nominibus explicet. haud raro vero adspersae sunt aliorum etiam locorum difficiliorum explicationes. Ex quibus omnibus haud exiguum fructum percipere potuissem, nisi codex descriptus esset a librario linguae Sanscritae plane ignaro, quo factum est, ut in permultis locis scripturae corruptissimae sensum coniectura assequi omnino non potuerim.

His igitur codicibus quomodo usus sim in textu emendando, diligens dramatis lector satis perspiciet ex accuratissima quam addidi discrepantis scripturae adnotatione. Paucos locos, in quibus propter corruptam omnium codicum scripturam textum meis coniecturis restituere conatus sum, aequo sagaciorum criticorum iudicio commendo.

De dialectis pracritis praemittenda sunt quae commentarius Berolinensis habet, emendata cum meis coniecturis, tum e Wilsoni codice, cuius initium benigne mecum communicavit vir clarissimus. Sunt vero haec:

नाटकादौ बहुप्रकारप्राकृतप्रपंचेषु चतस्र एव भाषाः प्रयुज्यन्ते। शौरसेन्यवन्तिकाप्राच्यामागध्यः। अपभ्रंशप्रपंचेषु चतस्र एव भाषाः प्रयुज्यन्ते। शाकारीचाण्डालीशाबरीढक्कदेशीयाः। मृच्छकटिके तु शबरपात्राभावाच्छाबरी नास्ति। प्राकृते। मागध्यवन्तिजा प्राच्या शौरसेन्यर्धमागधी। बाह्लीका दाक्षिणात्या च सप्त भाषाः प्रकीर्तिताः। माहाराष्ट्र्यादयः काव्य एव प्रयुज्यन्ते। अपभ्रंशे। शकाराभीरचाण्डालशबरद्राविडोड्रजाः। हीना वनेचराणां च विभाषाः सप्त कीर्तिताः। विविधा भाषा विभाषाः। हीनपात्रप्रयोज्यत्वात्। हीना वनेचराणां चेति ढक्कविभाषासंग्रहः। तत्रास्मिन्प्रकरणे प्राकृतपाठकेषु सूत्रधारो नटी रदनिका मदनिका वसन्तसेना तन्माता चेटी कर्णपूरकः चारुदत्तब्राह्मणी शोधनकः श्रेष्ठी एते एकादश शौरसेनीभाषापाठकाः। सूत्रधारोऽप्यत्र प्राकृती कार्यवशादिति वक्ष्यते। अवन्तिभाषापाठकौ वीरकचन्दनकौ। प्राच्यभाषापाठको विदूषकः। संवाहकः शकारवसन्तसेनाचारुदत्तानां चेटत्रितयं भिक्षुश्चारुदत्तदारकः एते षट् मागधीपाठकाः। अपभ्रंशपाठकेषु शाकारीपाठको राष्ट्रियः। चाण्डालीभाषापाठकौ चाण्डालौ। ढक्कभाषापाठकौ माथुरद्यूतकरौ। तथा शौरसेन्यवन्तिजाप्राच्या एतासु दन्त्यसकारता। तत्रावन्तिजा रेफवती लोकोक्तिबहुला। प्राच्या स्वार्थिकककारप्राया। मागधी तालव्यशकारवती। शाकारीचाण्डाल्योस्तालव्यशकारता

रेफस्य च लकारता। लकारप्राया ढक्कविभाषा संस्कृतप्रायत्वे दन्त्यतालव्यशसकारयुक्ता च। अपार्थमक्रमं व्यर्थं पुनरुक्तं हतोपमं। लोकन्यायविरुद्धं च शकारवचनं विदुः। अपार्थकं निरर्थकं व्यर्थं विरुद्धार्थं। यद्वा निश्चितान्वयं पदज्ञातं चाघज्ञातं च अपार्थकं (?)। व्यर्थं निरर्थकमेव। हतोपमं व्याहतोपमं। शकारप्रायभाषित्वाच्छकारो राष्ट्रिया स्मृतः। एकविधो विटश्चान्यो हास्यकृच्च विदूषकः। स्वार्थिका ककारः सर्वत्र द्विवचनं चतुर्थोत्रिभक्तिश्च नास्त्येव। द्वित्वे तु बहुवचनं चतुर्थ्यर्थे षष्ठी। परस्मैपदात्मनेपदविपर्ययः। पूर्वनिपातानियमश्च। बहुलं छन्दसां निदर्शनमप्रसिद्धछन्दोज्ञानार्थं। पाठविप्लवनिरासार्थं च ॥

Quae breviter sic potuerunt enarrari:

Dialecti non Sanscritae, quae in dramatis adhibentur, sunt aut *pracritae* aut *apabhrans'icae.*

I. *Pracritae* dialecti sunt:

1. S'auraseni,
2. Avantî,
3. Prâc'yâ,
4. Mâgadhî.

II. *Apabhransicae* dialecti sunt:

1. S'âkârî,
2. C'ân'd'âlî,
3. S'âbarî,
4. D'hakkî.

S'âbarî in Mric'c'hakat'ika non occurrit. Deinde addit Commentarius versus ex alio nescio quo grammatico, in quibus dialecti non sanscritae in universum, i. e. eae etiam enumerantur, quae non in dramatis, sed in communi vita adhibentur. Enumerantur vero septem *bhâshae*, quibus enumeratis additur, dialectum Mahârâshtricam et alias (?) काव्य एव i. e. non nisi in versibus adhiberi. deinde septem *vibhâshae.* — Tum septem illae dialecti, quae in Mric'c'hakat'ika inveniuntur, (quattuor scilicet pracritae et apabhrans'icae) inter singulas dramatis personas sic distribuuntur.

A. Pracritae dialecti.

I. *S'ûrasenica* dialecto loquuntur:

1. Histrionum magister,
2. Mima,
3. Radanikâ,
4. Madanikâ,
5. Vasantasenâ,

6. Vasantasenae mater,
7. Serva,
8. Karn'apûrakas,
9. C'ârudattae uxor,
10. S'odhanakas,
11. S'resht'hin.

II. *Avantica* dialecto loquuntur:
1. Vîrakas,
2. C'andanakas.

III. *Prâc'ya* dialecto loquitur solus Vidûshakas.

IV. *Magadhica* dialecto loquuntur:
1. Samvâhakas,
2. Sthâvarakas, S'akârae servus,
3. Kumbhilakas, Vasantasenae servus,
4. Vardhamânakas, C'ârudattae servus,
5. Mendicus (sed hic idem est qui Samvâhakas),
6. Rohasenas, C'ârudattae filius.

B. Apabhrans'icae dialecti.

I. *S'akârica* dialecto loquitur: S'akâras.

II. *C'ân'd'âlica* dialecto loquuntur: ambo C'ân'd'âlae.

III. *D'hakkica* dialecto loquuntur:
1. Mâthuras,
2. Aleator.

Quae deinde adduntur de singularum dialectorum proprietatibus, ea vides minime sufficere ad plenam accuratamque uniuscuiusque dialecti notionem informandam. Equidem libere fateor, me nondum perspicere, quomodo possit aliquando tolli magna illa discrepantia, quae in inferioribus praecipue dialectis obtinet inter codices dramatum manu scriptos et praecepta grammaticorum, quo quidem statu horum libri nobis traditi sunt. Utrosque scimus saepissime foedatos esse scribarum erroribus, et quanquam Lassenii acumine edocti sumus, haud raro singulos grammaticorum locos corruptos comparatis scholiastis posse emendari, tamen idem vir doctissimus demonstravit etiam, dialectorum inferiorum formam ex praeceptis

grammaticorum non posse ita restitui, ut extra dubitationem posita sit. Itaque siquidem cavendum erat, ne dubia grammaticorum auctoritate nimium confisi librariorum errores aliis augeremus, tutissimum esse statui, a librorum manu scriptorum fide non aliter discedere, quam ut, correctis apertis librariorum erroribus, unamquamque dialectum ita constituerem, finalem eam fuisse accurata omnium dramatis locorum collatio videbatur docere. Miras e. g. litterarum श्ट, श्त et श्थ coniunctiones e dialecto Magadhica et S'akârica eiicere non ausus sum, cum praesertim Prinsepius similem litterae sibilantis cum consonanti diversi organi coniunctionem in inscriptione Girnarensi invenerit (*Journal of the Asiatic Society of Bengal*, VII, 278).

In universum autem quomodo in dialectis pracritis constituendis versatus sim, quid de meo arbitrio, quid de codicum auctoritate scripserim, subiecta adnotatione critica religiose indicavi.

Textus mei margini additi sunt paginarum editionis Calcuttensis numeri, quo facilius dramatis loci in Lasseni Institutionibus linguae pracriticae citati possint reperiri.

पर्यङ्कग्रन्थिबन्धद्विगुणितभुजगाश्लेषसंवीतजानो-
रन्तःप्राणावरोधव्युपरतसकलज्ञानरुद्धेन्द्रियस्य ।
आत्मन्यात्मानमेव व्यपगतकरणं पश्यतस्तत्त्वदृष्ट्या
शम्भोर्वः पातु शून्येक्षणघटितलयब्रह्मलग्नः समाधिः ॥

अपि च ।

पातु वो नीलकण्ठस्य कण्ठः श्यामाम्बुदोपमः ।
गौरीभुजलता यत्र विद्युल्लेखेव राजते ॥

नान्द्यन्ते

सूत्रधारः । अलमनेन परिषत्कुतूहलविमर्दकारिणा परिश्रमेण । एवमहमार्यमिश्रान्प्रणिपत्य विज्ञापयामि यदिदं वयं मृच्छकटिकं नाम प्रकरणं प्रयोक्तुं व्यवसिताः । एतत्कविः किल ।

द्विरदेन्द्रगतिश्चकोरनेत्रः परिपूर्णेन्दुमुखः सुविग्रहश्च ।
द्विजमुख्यतमः कविर्बभूव प्रथितः शूद्रक इत्यगाधसत्त्वः ॥

अपि च । २

ऋग्वेदं सामवेदं गणितमथ कलां वैशिकीं हस्तिशिक्षां
ज्ञात्वा शर्वप्रसादाद्व्यपगततिमिरे चक्षुषी चोपलभ्य ।
राजानं वीक्ष्य पुत्रं परमसमुदयेनाश्वमेधेन चेष्ट्वा
लब्ध्वा चायुः शताब्दं दशदिनसहितं शूद्रकोऽग्निं प्रविष्टः ॥

अपि च ।

समरव्यसनी प्रमादशून्यः ककुदं वेदविदां तपोधनश्च ।

परवारणबाहुयुद्धलुब्धः क्षितिपालः किल शूद्रको बभूव ॥

अस्यां च तत्कृतौ ।

अवन्तिपुर्यां द्विजसार्थवाहो युवा दरिद्रः किल चारुदत्तः ।
गुणानुरक्ता गणिका च यस्य वसन्तशोभेव वसन्तसेना ॥
तयोरिदं सत्सुरतोत्सवाश्रयं नयप्रचारं व्यवहारदुष्टताम् ।
खलस्वभावं भवितव्यतां तथा चकार सर्वं किल शूद्रको नृपः ॥

॥ परिक्रम्यावलोक्य च ॥ अये शून्येयमस्मत्सङ्गीतशाला । क्व नु गताः कुशीलवा भविष्यन्ति ॥ विचिन्त्य ॥ आं ज्ञातम् ।

शून्यमपुत्रस्य गृहं चिरशून्यं नास्ति यस्य सन्मित्रम् ।
मूर्खस्य दिशः शून्याः सर्वं शून्यं दरिद्रस्य ॥

कृतं च सङ्गीतकं मया । अनेन चिरसङ्गीतोपासनेन ग्रीष्मसमये प्रचण्डदिनकरकिरणोच्छुष्कपुष्करबीजमिव प्रचलिततारके क्षुधा ममाक्षिणी खटखटायेते । तद्यावद्गृहिणीमाहूय पृच्छामि अस्ति किमपि प्रातराशो न वेति । एषो ऽस्मि भोः कार्यवशात्प्रयोगवशाच्च प्राकृतभाषी संवृत्तः । अविद अविद भोः । चिरसङ्गीदोबासणेण सुक्खपोक्खरणालाइं विअ मे बुभुक्खाए मिलाणाइं अङ्गाइं । ता जाव गेहं गदुअ जाणामि अत्थि किम्पि कुडुम्बिणीए उबबादिदं ण वेत्ति ।१। ॥ परिक्रम्यावलोक्य च ॥ एदं तं अम्हाणं गेहं ता पविसामि ।२। ॥ प्रविश्यावलोक्य च ॥ हीमाणहे । किं णु खु अम्हाणं गेहे अवरं विअ संविहाणअं वट्टदि । आआमितण्डुलोदअप्पवाहा रच्छा लोहकडाहपरिअत्तणकसणसारा किदविसेसआ विअ जुअदी अहिअदरं सोहदि भूमी सिणिद्धेण गन्धेण उद्दीबन्ती विअ अधिअं बाधेदि मं बुभुक्खा । ता किं पुव्वविढत्तं णिहाणं उप्पण्णं भवे । आदु अहं ज्जेव्व बुभुक्खादो ओदणमअं जीअलोअं पेक्खामि । णत्थि किल पादरासो अम्हाणं गेहे । पाणच्चअं बाधेदि मं बुभुक्खा । इध सव्वं णवं विअ संविहाणं

वट्टदि। एक्का वणाग्रं पीसेदि अबरा सुमणाओ गुम्फेदि ।१। ॥ विचिन्त्य ॥ किं णेदं। भोदु कुडुम्बिणिं सद्दाबिग्र परमत्थं जाणिस्सं।२। ॥ नेपथ्या४ भिमुखमवलोक्य ॥ अज्जे इदो दाव ।३।

प्रविश्य

नटी। अज्ज इग्रं म्हि ।४।

सूत्रधारः। अज्जे साग्रदं दे ।५।

नटी। आणबेदु अज्जो को णिओओ अणुचिट्ठीग्रदु त्ति ।६।

सूत्रधारः। अज्जे चिरसङ्गीदोबासणेण ॥ इत्यादि पठित्वा ॥ अत्थि ५ किम्पि अम्हाणं गेहे असिदव्वं ण वेत्ति ।७।

नटी। अज्ज सव्वं अत्थि ।८।

सूत्रधारः। किं किं अत्थि ।९।

नटी। तं जधा। गुडोदणं घिग्रं दही तण्डुलाइं अज्जेण अत्तव्वं रसाग्रणं अत्थि त्ति। एग्रं ते देवा आसासेन्तु ।१०।

सूत्रधरः। किं अम्हाणं गेहे सव्वं अत्थि आदु परिहससि ।११।

नटी। ॥ स्वगतम् ॥ परिहसिस्सं दाव ॥ प्रकाशम् ॥ अज्ज अत्थि आबणे ।१२।

सूत्रधारः। ॥ सक्रोधम् ॥ आ अणज्ज एग्रं ते आसा छिज्जिस्सदि। ६ अभावं गमिस्ससि तं दाणिं अहं वरण्डलम्बुओ विग्र दूरमुक्खिबिग्र पाडिदो ।१३।

नटी। मरिसेदु मरिसेदु अज्जो परिहासो क्खु मए कदो ।१४।

सूत्रधारः। ता किं उण इमं णवं विग्र संविहाणग्रं वट्टदि। एक्का वणाग्रं पीसेदि अबरा सुमणाओ गुम्फेदि इग्रं च पञ्चवणकुसुमोबहारसोहिदा भूमी ।१५।

नटी। अज्ज उबवासो गहिदो ।१६।

सूत्रधारः। किणामधेओ अग्रं उबवासो ।१७।

नटी। अहिज्जबबदी णाम ।१८। ७

सूत्रधारः। अज्जे इहलोइओ आदु पारलोइओ ।१।

नटी। अज्ज पारलोइओ ।२।

सूत्रधारः। ॥ सरोषम् ॥ पेक्खन्तु अज्जमिस्सा मम केरकेण भत्तपरिव्वएण पारलोइओ भत्ता अण्णेसीअदि ।३।

नटी। अज्ज पसीद पसीद तुमं ज्जेव्व मम जम्मन्तरे वि भत्ता भविस्ससि त्ति उववसिद म्हि ।४।

सूत्रधारः। अध अअं उववासो केण उवदिट्ठो ।५।

नटी। अज्जस्स ज्जेव्व पिअवअस्सेण चुण्णवुड्ढेण ।६।

८ सूत्रधारः। ॥ सकोपम् ॥ आ दासीएउत्ता चुण्णवुड्ढा कदा णु क्खु तुमं कुविदेण रण्णा पालएण णववहूकेसकलावं विअ ससुअन्धं कप्पिज्जन्तं पेक्खिस्सं ।७।

नटी। पसीददु पसीददु अज्जो णं अज्जस्स ज्जेव्व पारलोइओ अअं उववासो अणुचिट्ठीअदि ।८। ॥ इति पादयोः पतति ॥

सूत्रधारः। अज्जे उट्ठेहि उट्ठेहि कधेहि कधेहि इध उववासे केण कज्जं ।९।

नटी। अम्हारिसजणजोग्गेण बम्हणेण उवणिमन्तिदेण ।१०।

सूत्रधारः। तेण हि गच्छदु अज्जा। अहं पि अम्हारिसजणजोग्गं बम्हणं उवणिमन्तेमि ।११।

१ नटी। जं अज्जो आणबेदि।१२। ॥ इति निष्क्रान्ता ॥

सूत्रधारः ॥ परिक्रम्य ॥ हीमाणहे। ता कधं मए एव्वं सुसमिद्धाए उज्जइणीए अम्हारिसजणजोग्गो बम्हणो अण्णेसिदव्वो ॥ विलोक्य ॥ एसो चारुदत्तस्स मित्तं मित्तेओ इदो ज्जेव्व आअच्छदि। भोदु पुच्छिस्सं दाव। अज्ज मित्तेअ अम्हाणं गेहे असिदुं अग्गणी भोदु अज्जो ।१३।

नेपथ्ये। भो अण्णं बम्हणं उवणिमन्तेदु भवं। वावडो दाणिं अहं ।१४।

सूत्रधारः । अज्ज सम्पण्णं भोअणं णीसबत्तं च । अबि अ दक्खिणा काबि दे भविस्सदि ।१।

पुनर्नेपथ्ये । भो जधा दाणिं पढुमं ज्जेव्व पच्चादिट्ठो सि ता को दाणिं दे णिब्बन्धो पदे पदे मं अणुसन्धिदुं ।२।

सूत्रधारः । पच्चादिट्ठो म्हि एदिणा । भोदु अण्णं बम्हणं उबणिमन्तेमि ।३।

॥ इति निष्क्रान्तः ॥

॥ आमुखम् ॥

प्रविश्य प्रावारहस्तो

मैत्रेयः । अणं वन्दणं ॥ इति पूर्वोक्तं पठित्वा ॥ अध वा मए त्रिमित्तेण परस्स आमन्तणआइं भक्खिदव्वाइं । हा अवत्थे तुलीअसि जो दाणिं अहं तत्थभवदो चारुदत्तस्स रिद्धीए अहोरत्तपयत्तसिद्धेहिं उग्गारसुरहिगन्धेहिं मोदएहिं ज्जेव्व आसिदो अब्भन्तरचदुस्सालअदुआरए उवविट्ठो मल्लकसदपरिवुदो चित्तअरो विअ अङ्गुलीहिं छिबिअ छिबिअ अवणेमि । णअरचत्तरवुसहो विअ रोमन्थाअमाणो चिट्ठामि । सो दाणिं अहं तस्स दलिद्ददाए जहिं तहिं चरिअ गेहपारावदो विअ आवासणिमित्तं इध आअच्छामि । एसो अज्जचारुदत्तस्स पिअवअस्सेण चुण्णवुड्ढेण जादीकुसुमवासिदो
११ पावारओ अणुप्पेसिदो सिद्धीकिददेवकज्जस्स अज्जचारुदत्तस्स उवणेदव्वो त्ति । ता जाव अज्जचारुदत्तं पेक्खामि ॥ परिक्रम्यावलोक्य च ॥ एसो अज्जचारुदत्तो सिद्धीकिददेवकज्जो गिहदेवदाणं बलिं करेन्तो इदो ज्जेव्व आअच्छदि ।१।

॥ ततः प्रविशति यथानिर्दिष्टश्चारुदत्तो रदनिका च ॥

चारुदत्तः । ॥ ऊर्ध्वमवलोक्य सनिर्वेदं निःश्वस्य च ॥

यासां बलिः सपदि मद्गृहदेहलीनां
*२ हंसैश्च सारसगणैश्च विलुप्तपूर्वः ।
१२ तास्वेव सम्प्रति विरूढतृणाङ्कुरासु
वीजाञ्जलिः पतति कीटमुखावलीढः ॥

॥ इति मन्दं मन्दं परिक्रम्योपविष्टः ॥

विदूषकः । एसो अज्जचारुदत्तो । ता जाव सम्पदं उवसप्पामि ॥ उपसृत्य । सोत्थि भवदे वड्ढदु भवं ।२।

चारुदत्तः । अये सर्वकालमित्रं मैत्रेयः प्राप्तः । सखे स्वागतमास्यताम् ।

विदूषकः । तं भवं आणवेदि ॥ उपविश्य ॥ भो वअस्स एसो दे पिअवअस्सेण चुण्णवुड्डेण जादीकुसुमवासिदो पावारओ अणुप्पेसिदो सिद्धीकिददेवकज्जस्स अज्जचारुदत्तस्स तुए उवणेदव्वो त्ति ।१।

॥ समर्पयति ॥

चारुदत्तः । गृहीत्वा सचिन्तः स्थितः ॥

विदूषकः । भो इदं किं चिन्तीअदि ।२।

चारुदत्तः । वयस्य । १३

सुखं हि दुःखान्यनुभूय शोभते
घनान्धकारेष्विव दीपदर्शनम् ।
सुखात्तु यो याति नरो दरिद्रतां
धृतः शरीरेण मृतः स जीवति ॥

विदूषकः । भो वअस्स मरणादो दालिद्दादो वा कदरं दे रोअदि ।३।

चारुदत्तः । वयस्य ।

दारिद्र्यान्मरणाद्वा मरणं मम रोचते न दारिद्र्यम् ।
अल्पक्लेशं मरणं दारिद्र्यमनन्तकं दुःखम् ॥

विदूषकः । भो वअस्स अलं सन्तप्पिदेण । पणइजणसङ्कामिदविहवस्स सुरजणपीदसेसस्स विअ पडिवाचन्दस्स परिक्खओ वि दे अहिअदरं रमणीओ ।४।

चारुदत्तः । वयस्य न ममार्थान्प्रति दैन्यम् । पश्य ।

एतत्तु मां दहति यद्गृहमस्मदीयं
क्षीणार्थमित्यतिथयः परिवर्जयन्ति ।
संशुष्कसान्द्रमदलेखमिव भ्रमन्तः १४

कालात्यये मधुकराः करिणः कपोलम् ॥

विदूषकः। भो वअस्स एदे क्खु दासीएउत्ता अत्थकल्लवत्ता वरडाभीदा विअ गोबालदारआ जहिं जहिं ण खज्जन्ति तहिं तहिं गच्छन्ति ।१।

चारुदत्तः। वयस्य।

सत्यं न मे विभवनाशकृतास्ति चिन्ता
भाग्यक्रमेण हि धनानि भवन्ति यान्ति।
एतत्तु मां दहति नष्टधनाश्रयस्य
यत्सौहृदादपि जनाः शिथिलीभवन्ति ॥

अपिच।

दारिद्र्याद्ध्रियमेति ह्रीपरिगतः प्रभ्रश्यते तेजसो
निस्तेजाः परिभूयते परिभवान्निर्वेदमापद्यते।
निर्विण्णः शुचमेति शोकविहतो बुद्ध्या परित्यज्यते
निर्बुद्धिः क्षयमेत्यहो निधनता सर्वापदामास्पदम् ॥

विदूषकः। भो वअस्स तं ज्जेव्व अत्थकल्लवत्तं सुमरिअ अलं सन्तप्पिदेण ।२।

चारुदत्तः। वयस्य दारिद्र्यं हि पुरुषस्य।

निवासश्चिन्तायाः परपरिभवो वैरमपरं
जुगुप्सा मित्राणां स्वजनजनविद्वेषकरणम्।
वनं गन्तुं बुद्धिर्भवति च कलत्रात्परिभवो
हृदिस्थः शोकाग्निर्न च दहति सन्तापयति च ॥

तद्वयस्य कृतो मया गृहदेवताभ्यो बलिः। त्वमपि गच्छ चतुष्पथे मातृभ्यो बलिमुपहर।

विदूषकः। ण गमिस्सं ।३।

चारुदत्तः। किमर्थम्।

विदूषकः। जदो एव्वं पूइज्जन्ता देवदा ण पसीदन्ति ता को गुणो देवेसु अच्चिदेसु ।१।

चारुदत्तः। वयस्य मा मैवम्। गृहस्थस्य नित्यो ऽयं विधिः।१६

तपसा मनसा वाग्भिः पूजिता बलिकर्मभिः।
तुष्यन्ति शमिनां नित्यं देवताः किं विचारितैः॥

तद्गच्छ मातृभ्यो बलिमुपहर।

विदूषकः। भो ण गमिस्सं। अण्णो कोबि पउज्जीअदु। मम उण बम्हणस्स सव्वं ज्जेव्व विपरीदं परिणमदि आदंसगदा विअ च्छाआ वामादो दक्खिणा दक्खिणादो वामा। अण्णं च। एदाए पदोसवेलाए इध राअमग्गे गणिआ विडा चेडा राअवल्लहा अ पुरिसा सञ्चरन्ति। ता मण्डूकलुद्धस्स विअ कालसप्पस्स मूसिओ विअ अहिमुहावत्थिदो दाणिं भविस्सं। तुमं इध उबविट्ठो किं करिस्ससि ।२।

चारुदत्तः। भवतु तिष्ठ तावत्। अहं समाधिं निर्वर्तयामि। १७

नेपथ्ये। तिष्ठ वसन्तसेने तिष्ठ।

ततः प्रविशति विटशकारचेटैरनुगम्यमाना वसन्तसेना॥

विटः। वसन्तसेने तिष्ठ तिष्ठ।

किं त्वं भयेन परिवर्तितसौकुमार्या
नृत्यप्रयोगविशदौ चरणौ क्षिपन्ती।
उद्विग्नचञ्चलकटाक्षविसृष्टदृष्टि
र्व्याधानुसारचकिता हरिणीव यासि॥

शकारः। चिस्ठ वशन्तशेणिए चिस्ठ।

किं याशि धावशि पलाअशि पक्खलन्ती
वाशू पशीद ण मलीहिशि चिस्ठ दाव।
कामेण डज्झदि हु मे हडके तबश्शी

अङ्गाललाशिपडिदे विअ मंशखण्डे ॥ ।१।

चेटः । अज्जुए चिष्ठ चिष्ठ ।

उत्ताशिता गच्छशि अत्तिका मे
शम्पुण्णपुच्छा विअ गिम्हमोरी ।
ओवग्गदी शामिअभट्टके मे
वणे गडे कुक्कुडशावके व्व ॥ ।२।

विटः । वसन्तसेने तिष्ठ तिष्ठ ।

किं यासि बालकदलीव विकम्पमाना
रक्तांशुकं पवनलोलदशं वहन्ती ।
रक्तोत्पलप्रकरकुड्मलमुत्सृजन्ती
टङ्कैर्मनःशिलगुहेव विदार्यमाणा ॥

शकारः । चिष्ठ वशन्तशेणिए चिष्ठ ।

मम मअणमणङ्गं वम्महं वड्ढअन्ती
णिशि अ शअणके मे णिद्दअं पक्खिबन्ती ।
पशलशि भअभीदा पक्खलन्ती खलन्ती
मम वशमणुजादा लावणश्शेव कुन्ती ॥ ।३।

विटः । वसन्तसेने ।

किं त्वं पदैर्मम पदानि विशेषयन्ती
व्यालीव यासि पतगेन्द्रभयाभिभूता ।
वेगादहं प्रविसृतं पवनं निरुन्ध्यां
त्वन्निग्रहे तु वरगात्रि न मे प्रयत्नः ॥

शकारः । भावे भावे ।

एशा णाणकमूशिकामकशिका मच्छाशिका लाशिका
णीशाशा कुलणाशिका अवशिका कामाह मञ्जूशिका ।
एशा वेशवहू शुवेशणिलआ वेशङ्गणा वेशिआ

एशे शे दशणामके मयि कले अज्जावि मं णेच्छदि ॥ ।१।

विटः । प्रसरसि भयविक्लवा किमर्थं २०
प्रचलितकुण्डलघृष्टगण्डपार्श्वा ।
विटजननखघट्टितेव वीणा
जलधरगर्जितभीतसारसीव ॥

शकारः । कणात्कणालबङ्कभूशणाशद्दमिश्शं
किं दोब्रुदी विअ पलाअशि लामभीदा ।
एशे हलामि शहशा त्ति जधा हणूमे
विश्शावशुश्श बहिणिं विअ तं शुभद्दं ॥ ।२।

चेटः । लामेहि अ लाअवल्लहं
तो खाहिशि मच्छमंशकं ।
एदेहिं मच्छमंशकेहिं
शुणआ मडअं ण शेवदि ॥ ।३।

विटः । भवति वसन्तसेने २१
किं त्वं कटीतटनिवेशितमुद्वहन्ती
ताराविचित्ररुचिरं रशनाकलापम् ।
वक्त्रेण निर्मथितचूर्णमनःशिलेन
त्रस्ता द्रुतं नगरदैवतवत्प्रयासि ॥

शकारः । अम्हेहिं चण्डं अहिशालिअन्ती
वणे शिआली विअ कुक्कुलेहिं ।
पलाशि शिग्घं तुलिदं शवेग्गं
शवेण्टणं मे हलअं हलन्ती ॥ ।४।

वसन्तसेना । पल्लवआ पल्लवआ । परहुदिए परहुदिए ।५।

शकारः । ॥ सभयम् ॥ भावे भावे मणुश्शे मणुश्शे ।६।

विटः । न भेतव्यं न भेतव्यम् ।

वसन्तसेना। माढविए माढविए ।१।

२२ विटः। ॥ सहासम् ॥ मूर्ख परिजनो ऽन्विष्यते।

शकारः। भावे भावे इत्थिअं अणेशदि ।२।

विटः। अथकिम्।

शकारः। इत्थिआणां शदं मालेमि। शूले हग्गे ।३।

वसन्तसेना। ॥ शून्यमवलोक्य ॥ हद्धी हद्धी। कधं परिब्भट्ठो परिअणो। एत्थ मए अप्पा सअं ज्जेव्व रक्खिदव्वो ।४।

विटः। अन्विष्यतामन्विष्यताम्।

शकारः। वशन्तशेणिए विलब विलब परहुदिअं वा पल्लवअं वा शव्वं वा वशन्तमाशं। मए अहिशालिअन्तीं तुमं के पलित्ता इश्शदि।

किं भीमशेणे जमदग्गिपुत्ते
कुन्तीशुदे वा दशकन्धले वा।
एशे हगे गेण्हिअ केशहस्ते
दुश्शाशणश्शाणुकिदिं कलेमि॥

२३ णं पेक्ख पेक्ख।

अशी शुतिक्खे वलिदे अ मश्तके
कप्पेध शीशं उद मालएध वा।
अलं तवेदेण पलाइदेण
मुमुक्खु जो होदि ण शे क्खु जीअदि॥ ।५।

२४ वसन्तसेना। अज्ज अबला खु अहं ।६।

विटः। अत एव ध्रियसे।

शकारः। अदो ज्जेव्व ण मालीअशि ।७।

वसन्तसेना। ॥ स्वगतम् ॥ कधं अणुणओ वि से भअं उप्पादेदि। भोदु एव्वं दाव ॥ प्रकाशम् ॥ अज्ज इमादो किम्पि अलङ्करणं तक्कीअदि ।८।

विटः। शान्तं पापं शान्तं पापम्। भवति वसन्तसेने न पुष्पमोषमर्हत्युद्यानलता। तत्कृतमलङ्करणैः।

वसन्तसेना। ता किं क्खु दाणिं ।१।

शकारः। हग्गे देवपुलिशे मणुश्शे वाशुदेवके कामइदव्वे ।२।

वसन्तसेना। ॥ सक्रोधम् ॥ सन्तं पावं। अवेहि अणज्जं मन्तेसि ।३।

शकारः। ॥ सहस्ततालं विहस्य ॥ भावे भावे पेक्ख। अन्तलेण मुशि २१
णिद्धा एशा गणिआ जेण मं भणादि एहि शन्ते शि किलिन्ते शित्ति। हग्गे अण्णग्गामन्तलं ण गडे णगलन्तलं वा ण गडे। अज्जुके शबामि भावश्श शीशं अत्तणकेलकेहिं पादेहिं तव ज्जेव्व पश्चाणुपश्चिआए आहिण्डन्ते शन्ते किलिन्ते म्हि शंवुत्ते ।४।

विटः ॥ स्वगतम् ॥ अये कथं शान्तमित्यभिहिते श्रान्त इत्यवगच्छति मूर्खः ॥ प्रकाशम् ॥ वसन्तसेने वेशवासविरुद्धमभिहितं भवत्या। पश्य।

तरुणजनसहायश्चिन्त्यतां वेशवासो
विगणय गणिका त्वं मार्गजाता लतेव।
वहसि हि धनहार्यं पण्यभूतं शरीरं
सममुपचर भद्रे सुप्रियं वाप्रियं वा ॥

अपिच। २६

वाप्यां स्नाति विचक्षणो द्विजवरो मूर्खो ऽपि वर्णाधमः
फुल्लां नाम्यति वायसो ऽपि हि लतां या नामिता बर्हिणा।
ब्रह्मक्षत्रविशस्तरन्ति च यया नावा तयैवेतरे
त्वं वापीव लतेव नौरिव जनं वेश्यासि सर्वं भज ॥

वसन्तसेना। गुणो क्खु अणुराअस्स कारणं ण उण बलक्कारो ।५।

शकारः। भावे भावे एशा गब्भदाशी कामदेवाअदणुज्जाणादो पहुदि ताह दलिद्दचालुदत्ताह अणुलत्ता ण मं कामेदि। वामदो

तश्श घलं। जधा तव मम हस्तादो एशा ण पलिब्भंशदि तधा कलेहु भावे ।१।

विटः ॥ स्वगतम् ॥ यदेव परिहर्तव्यं तदेवोदाहरति मूर्खः। कथं
२७ वसन्तसेना आर्यचारुदत्तमनुरक्ता। सुष्ठु खल्विदमुच्यते रत्नं रत्नेन सङ्गच्छत इति। तद्गच्छतु किमनेन मूर्खेण ॥ प्रकाशम् ॥ काणेलीमातः। वामतस्तस्य सार्थवाहस्य गृहम्।

शकारः। अधइ वामदो तश्श घलं ।२।

वसन्तसेना ॥ स्वगतम् ॥ अम्महे वामदो तस्स गेहं त्ति जं सच्चं अवरज्झन्तेण वि दुज्जणेण पिअसङ्गमं पाविदा ।३।

शकारः। भावे भावे बलिए क्खु अन्धआले। माशलाशिपविश्टा विअ मशीगुडिआ दीशन्ती दीशन्ती जेव्व पणश्टा वशन्तशेणिआ ।४।

विटः। अहो बलवानन्धकारः। तथाहि।

आलोकविशाला मे सहसा तिमिरप्रवेशविच्छिन्ना।
उन्मीलितापि दृष्टिर्निमीलितेवान्धकारेण ॥

अपिच।

लिम्पतीव तमोऽङ्गानि वर्षतीवाञ्जनं नभः।
असत्पुरुषसेवेव दृष्टिर्विफलतां गता ॥

२८ शकारः। भावे भावे अण्णेशामि वशन्तशेणिअं ।५।

विटः। काणेलीमातः। अस्ति किञ्चिच्चिह्नं यदुपलक्षयसि।

शकारः। भावे भावे किं विअ ।६।

विटः। भूषणशब्दं सौरभ्यानुविद्धं माल्यगन्धं वा।

शकारः। शुणामि मल्लगन्धं अन्धआलपूलिदाए उण णाशिआए ण शुव्वत्तं पेक्खामि भूशणशद्दं ।७।

विटः ॥ जनान्तिकम् ॥ वसन्तसेने।

कामं प्रदोषतिमिरेण न दृश्यसे त्वं

सौदामिनीव जलदोदरसन्धिलीना ।
त्वां सूचयिष्यति तु माल्यसमुद्भवो ऽयं
गन्धश्च भीरु मुखराणि च नूपुराणि ॥

श्रुतं वसन्तसेने ।

वसन्तसेना ॥ स्वगतम् ॥ सुदं गहिदं च ॥ नाट्येन नूपुराण्युत्सार्य माल्यानि चापनीय किञ्चित्परिक्रम्य हस्तेन परामृश्य ॥ अम्मो भित्तिपरामरिससूचिदं पक्खदुआ २१
रअं क्खु एदं जाणामि अ सञ्जोएण गेहस्स संवुदं पक्खदुआरअं ।१।

चारुदत्तः । वयस्य समाप्तजपो ऽस्मि । तत्साम्प्रतं गच्छ मातृभ्यो बलिमुपहर ।

विदूषकः । भो ण गमिस्सं ।२।

चारुदत्तः । धिक्कष्टं ।

दारिद्र्यात्पुरुषस्य बान्धवजनो वाक्ये न सन्तिष्ठते
सुस्निग्धा विमुखीभवन्ति सुहृदः स्फारीभवन्त्यापदः ।
सत्त्वं ह्रासमुपैति शीलशशिनः कान्तिः परिम्लायते
पापं कर्म च यत्परैरपि कृतं तत्तस्य सम्भाव्यते ॥

अपिच ।

सङ्गं नैव हि कश्चिदस्य कुरुते सम्भाष्यते नादरा
त्सम्प्राप्तो गृहमुत्सवेषु धनिनां सावज्ञमालोक्यते ।
दूरादेव महाजनस्य विहरत्यल्पच्छदो लज्जया
मन्ये निर्धनता प्रकाममपरं षष्ठं महापातकम् ॥

अपिच । ३०

दारिद्र्य शोचामि भवन्तमेवमस्मच्छरीरे सुहृदित्युषित्वा ।
विपन्नदेहे मयि मन्दभाग्ये ममेति चिन्ता क्व गमिष्यसि त्वम् ॥

विदूषकः ॥ सवैलक्ष्यम् ॥ भो वअस्स जइ मए गन्तव्वं ता एसा बि मे सहाइणी रदणिआ भोदु ।३।

चारुदत्तः। रदनिके मैत्रेयमनुगच्छ।

रदनिका। जं अज्जो आणवेदि।१।

विदूषकः। भोदि रदणिए गेण्ह बलिं पदीवं च। अबावुदं पक्खदुआरअं करेमि।२। ॥ तथा करोति ॥

वसन्तसेना। मम अब्भुववत्तिणिमित्तं विअ अबावुदं पक्खदुआरअं ता जाव पविसामि ॥ दृष्ट्वा ॥ ह्द्धी ह्द्धी। कधं पदीवो॥ पटान्तेन निर्वाप्य प्रविष्टा।३।

चारुदत्तः। मैत्रेय किमेतत्।

२१ विदूषकः। अबावुदपक्खदुआरएण पिण्डीकदेण वादेण णिव्वाविदो पदीवो। भोदि रदणिए णिक्कम तुमं पक्खदुवारएण अहं पि अब्भन्तरचदुस्सालादो पदीवं पज्जालिअ आअच्छामि।४। ॥ इति निष्क्रान्तः॥

शकारः। भावे भावे अण्णेशामि वशन्तशेणिअं।५।

विटः। अन्विष्यामन्विष्यताम्।

शकारः ॥ तथा कृत्वा ॥ भावे भावे गह्णिदा गह्णिदा।६।

विटः। मूर्ख नन्वहम्।

शकारः। इदो दाव भविअ एअन्ते भावे चिष्ठदु ॥ पुनरन्विष्य चेटं गृहीत्वा ॥ भावे भावे गह्णिदा गह्णिदा।७।

२२ चेटः। भष्टके चेडे हगे।८।

शकारः। इदो भावे इदो चेडे। भावे चेडे चेडे भावे। तुम्हे दाव एअन्ते चिष्ठ ॥ पुनरन्विष्य रदनिकां केशेषु गृहीत्वा ॥ भावे भावे शम्पदं गह्णिदा गह्णिदा वशन्तशेणिआ।

अन्धआले पलाअन्ती मल्लगन्धेण शूइदा।
केशहस्ते पलामिष्ठा चाणक्केणेव्व दोब्बदी॥।९।

विटः। एषासि वयसो दर्पात्कुलपुत्रानुसारिणी।
केशेषु कुसुमाढ्येषु सेवितव्येषु कर्षिता॥

शकारः । एशाशि वाशू शिलशि ग्गह्लीदा
केशेशु बालेशु शिलोलुहेशु ।
अक्कोश विक्कोश लबाहि चण्डं
शम्भुं शिवं शङ्कलमीशलं वा ॥।१।

रदनिका ॥ सभयम् ॥ किं अज्जमिस्सेहिं ववसिदं ।२। ३३

विटः । काणेलीमातः । अन्य एवैष स्वरसंयोगः ।

शकारः । भावे भावे जधा दहिहच्छिपलिलुद्धाए मज्जालीए शलपलिवत्ते होदि तधा दाशीए धीए शलपलिवत्ते कडे ।३।

विटः । कथं स्वरपरिवर्तः कृतः । अहो चित्रम् । अथवा किमत्र चित्रम् ।

इयं रङ्गप्रवेशेन कलानां चोपशिक्षया ।
वञ्चनापण्डितत्वेन स्वरनैपुण्यमाश्रिता ॥

प्रविश्य

विदूषकः । ह्वीह्वी भो । पदोसमन्दमारुदेण पसुबन्धोबणीदस्स विअ छागलस्स हिअअं फुरफुराअदि पदीबो ॥ उपसृत्य रदनिकां तथा दृष्ट्वा ॥ भोदि रदणिए ।४।

शकारः । भावे भावे मणुश्शे मणुश्शे ।५।

विदूषकः । जुत्तं णेदं सरिसं णेदं जं अज्जचारुदत्तस्स दलिद्ददाए ३४ सम्पदं परपुरिसा गेहं पवेसीअन्ति ।६।

रदनिका । अज्ज मित्तेअ पेक्ख पेक्ख मे परिहवं ।७।

विदूषकः । किं तव परिहवो आउ अम्हाणं ।८।

रदनिका । णं तुम्हाणं ज्जेव्व ।९।

विदूषकः । किं एसो बलक्कारो ।१०।

रदनिका । अधइं ।११।

विदूषकः । सच्चं ।१२।

रदनिका । सच्चं ।१।

३५ विदूषकः ॥ सक्रोधं दण्डकाष्ठमुद्यम्य ॥ मा दाव । भो सके गेहे कुक्कुरो वि दाव चण्डो भोदि किं उण अहं बम्हणो । ता एदिणा अम्हारिसजणभाअधेअकुडिलेण दण्डकट्ठेण दुट्ठस्स विअ सुक्खाणवेणुअस्स मत्थअं दे पहारेहिं कुट्टइस्सं ।२।

विटः । महाब्राह्मण मर्षय मर्षय ।

विदूषकः ॥ विटं दृष्ट्वा ॥ ण एत्थ एसो अवरज्झदि ॥ शकारं दृष्ट्वा ॥ एसो क्खु एत्थ अवरज्झदि । अरे रे राअसालअ सण्ठाणअ दुम्मणुस्स जुत्तं णेदं । जइ वि णाम तत्तभवं अज्जचारुदत्तो दलिद्दो संवुत्तो ता किं तस्स गुणेहिं णालङ्किदा उज्जइणी जेण तस्स गेहं पविसिअ परिअणस्स ईरिसो उवमद्दो करीअदि ।

मा दुग्गदो त्ति परिहवो णत्थि कदन्तस्स दुग्गदो णाम ।
चारित्तेण विहीणो अड्ढो वि अ दुग्गदो होइ ।३।

३६ विटः ॥ सवैलक्ष्यम् ॥ महाब्राह्मण मर्षय मर्षय । अन्यजनशङ्कया खल्विदमनुष्ठितं न दर्पात् । पश्य ।

सकामान्विष्यते ऽस्माभिः ।

विदूषकः । किं इअं ।४।

विटः । शान्तं पापं ।

काचित्स्वाधीनयौवना ।

सा भ्रष्टा शङ्कया तस्याः प्राप्तेयं शीलवञ्चना ॥

सर्वथा इदमनुनयसर्वस्वं गृह्यताम् ॥ इति खड्गमुत्सृज्य कृताञ्जलिः पादयोः पतति ॥

विदूषकः । सप्पुरिस उट्ठेहि उट्ठेहि । अआणन्तेण मए तुमं उवालद्धो सम्पदं उण जाणन्तो अणुणेमि ।५।

विटः । ननु भवानेवात्रानुनेयः । तदुत्तिष्ठामि समयतः ।

विदूषकः । भणादु भवं ।६।

विटः। यदि इमं वृत्तान्तमार्यचारुदत्तस्य नाख्यास्यसि।

विदूषकः। ण कधइस्सं।१। ३७

विटः। एष ते प्रणयो विप्र शिरसा धार्यते मया।
गुणशस्त्रैर्वयं येन शस्त्रवन्तो ऽपि निर्जिताः॥

शकारः॥ साकूतम्॥ किंणिमित्तं भण भावे एदश्श दुश्टबडुअश्श किविणं अञ्जलिं कदुअ पाएशु णिबडिदे।२।

विटः। भीतो ऽस्मि।

शकारः। कश्श तुमं भीदे।३।

विटः। तस्य चारुदत्तस्य गुणेभ्यः।

शकारः। के विअ तश्श गुणा जश्श गेहं पविशिअ अशिदव्वं पि णत्थि।४।

विटः। मा मैवम्।

सो ऽस्मद्विधानां प्रणयैः कृशीकृतो
न तेन कश्चिद्विभवैर्विमानितः।
निदाघकालेष्विव सोदको ह्रदो
नृणां स तृष्णामपनीय शुष्कवान्॥

शकारः॥ सामर्षम्॥ के शे गब्भदाशीए उत्ते। ३८

शूले विक्कन्ते पण्डवे शेदकेदू
पुत्ते लाधाए लावणे इन्ददत्ते।
आदो कुन्तीए तेण लामेण जादे
अश्शत्थामे धम्मपुत्ते जडाऊ॥।५।

विटः। मूर्ख चारुदत्तः खल्वसौ।

दीनानां कल्पवृक्षः स्वगुणफलनतः सज्जनानां कुटुम्बी
आदर्शः शिक्षितानां सुचरितनिकषः शीलवेलासमुद्रः।
सत्कर्ता नावमन्ता पुरुषगुणनिधिर्दक्षिणोदारसत्त्वो

ल्लोकः श्लाघ्यः स जीवत्यधिकगुणतया चोच्छ्वसन्तीव चान्ये ॥
तदितो गच्छामः ।

शकारः । अगेण्हिअ वशन्तशेणिअं ।१।

विटः । नष्टा वसन्तसेना ।

शकारः । कधं विअ ।२।

३९ विटः । अन्धस्य दृष्टिरिव पुष्टिरिवातुरस्य
मूर्खस्य बुद्धिरिव सिद्धिरिवालसस्य ।
स्वल्पस्मृतेर्व्यसनिनः परमेव विद्या
त्वां प्राप्य सा रतिरिवारिजने प्रनष्टा ॥

शकारः । अगेण्हिअ वशन्तशेणिअं ण गमिश्शं ।३।

विटः । एतदपि न श्रुतं त्वया ।

आलाने गृह्यते हस्ती वाजी वल्गासु गृह्यते ।
हृदये गृह्यते नारी यदीदं नास्ति गम्यताम् ॥

शकारः । जइ गच्छशि गच्छ तुमं । हग्गे ण गमिश्शं ।४।

विटः । एवं गच्छामि ॥ इति निष्क्रान्तः ॥

शकारः । गडे क्खु भावे अभावं ॥ विदूषकमुद्दिश्य ॥ अले काकपदमशतशीशका दुस्टवडुअका उबविश उबविश ।५।

विदूषकः । उबवेसिदा जेव्व अम्हे ।६।

शकारः । केण ।७।

४० विदूषकः । कअन्तेण ।८।

शकारः । ता उट्ठेहि उट्ठेहि ।९।

विदूषकः । उट्ठिस्सामो ।१०।

शकारः । कदा ।११।

विदूषकः । जदा पुणो वि देव्वं अणुऊलं भविस्सदि ।१२।

शकारः । अले लोद लोद ।१३।

विदूषकः। रोदाविदा जेव्व अम्हे।१।

शकारः। केण।२।

विदूषकः। दुग्गदीए।३।

शकारः। अले हश हश।४।

विदूषकः। हसिस्सामो।५। ४१

शकारः। कदा।६।

विदूषकः। पुणो वि रिद्धीए अज्जचारुदत्तस्स।७।

शकारः। अले ले दुश्टवडुआ भणेशि मम वअणेण तं दलिद्दचालुदत्तकं। एशा शशुवण्णा शहिलण्णा णवणाडअदंशणुट्ठिदा शुत्तधालि व्व वशन्तशेणिआ णाम गणिआ दालिआ कामदेवाअदणुज्जाणादो पहुदि तुमं अणुलत्ता अम्हेहिं बलक्कालाणुणीअमाणा तुह्न गेहं पविश्टा। ता जइ मम हश्ते शअं ज्जेव्व पट्ठाविअ एणं शमप्पेशि तदो अधिअलणे ववहालं विणा लहुं णिज्जादअन्ताणाह तव मए अणुबद्धा पीदी हुविश्शदि। आदु अणिज्जादअन्ताणाह आमलणन्तिके वेले हुविश्शदि। अविअ पेक्ख पेक्ख।

कक्कालुका गोहडलित्तवेण्टा
शाके अ शुक्खे तलिदे हु मंशे।
भत्ते अ हेमन्तिअलत्तिशिद्धे
लीणे अ वेले ण हु होदि पूदी॥

शोट्ठकं भणेशि लट्ठकं भणेशि तधा भणेशि जधा हग्गे अत्तणकेलिकाए पाशादबालग्गकबोदबालिआए उबविश्टे शुणिश्शं। तधा जदि ण भणेशि ता कबालतलप्पविश्टं कबित्थं विअ मश्तअं दे मडमडाइश्शं।८। ४२

विदूषकः। भणिस्सं।९। ४३

शकारः॥ अपवार्य ॥ चेडे गडे शच्चकं ज्जेव्व भावे।१०।

चेटः। अधइं ।१।

शकारः। ता शिग्घं अवक्कमम्ह ।२।

चेटः। ता गेण्हदु भश्टके अशिं ।३।

शकारः। तव ज्जेव्व हश्ते चिश्टदु ।४।

चेटः। एशे भश्टालके गेण्हदु णं भश्टके अशिं ।५।

शकारः ॥ विपरीतं गृहीत्वा ॥

णिव्वक्कलं मूलकपेशिवण्णं
खन्धेण घेत्तूण अ कोशशुत्तं।
४४ कुक्केहिं कुक्कीहिं अ वुक्कअन्ते
जधा शिआले शलणं पलामि ॥ ।६।

॥ परिक्रम्य निष्क्रान्तौ ॥

विदूषकः। भोदि रदणिए ण क्खु दे अअं अवमाणो तत्थभवदो चारुदत्तस्स णिवेदइदव्वो। दोग्गच्चपीडिअस्स मणे दिउणदरा पीडा हुविस्सदि ।७।

रदनिका। अज्ज मित्तेअ रदणिआ खु अहं सज्जदमुही ।८।

विदूषकः। एवं णेदं ।९।

चारुदत्तः ॥ वसन्तसेनामुद्दिश्य ॥ रदनिके मारुताभिलाषी प्रदोषसमयः। शीतार्तो रोहसेनः। ततः प्रवेश्यतामभ्यन्तरमयम्। अनेन प्रावारकेण छादयैनम् ॥ इति प्रावारकं प्रयच्छति ॥

वसन्तसेना ॥ स्वगतम् ॥ कधं परिअणो त्ति मं अवगच्छदि ॥ प्रावारकं गृहीत्वा समाघ्राय च। स्वगतं सस्पृहम् ॥ अम्महे जादीकुसुमवासिदो पावारओ अणुदासीणं से जोव्वणं पडिह्रासेदि ।१०।

॥ अपवारितकेन प्रावृणोति ॥

चारुदत्तः। ननु रदनिके रोहसेनं गृहीत्वाभ्यन्तरं प्रविश।

वसन्तसेना ॥ स्वगतम् ॥ मन्दभाइणी खु अहं तुह अब्भन्तरस्स ।११।

चारुदत्तः। ननु रदनिके प्रतिवचनमपि नास्ति। कष्टम्।

यदा तु भाग्यक्षयपीडितां दशां
नरः कृतान्तोपहितां प्रपद्यते।
तदास्य मित्राण्यपि यान्त्यमित्रतां
चिरानुरक्तो ऽपि विरज्यते जनः॥

॥ उपसृत्य रदनिका विदूषकश्च ॥

विदूषकः। भो इअं सा रअणिआ।१।

चारुदत्तः। इयं सा रदनिका। इयमपरा का। ४६

अविज्ञातावसक्तेन दूषिता मम वाससा।

वसन्तसेना॥ स्वगतम् ॥ णं भूसिदा।२।

चारुदत्तः।

छादिता शरदभ्रेण चन्द्रलेखेव राजते॥

अथवा न युक्तं परकलत्रदर्शनम्।

विदूषकः। भो अलं परकलत्तदंसणसङ्काए। एसा वसन्तसेणा कामदेवाअदणुज्जाणादो पहुदि भवन्तं अणुरत्ता।३।

चारुदत्तः। अये इयं वसन्तसेना॥ स्वगतम् ॥

यया मे जनितः कामः क्षीणे विभवविस्तरे।
क्रोधः कुपुरुषस्येव स्वगात्रेष्वेव सीदति॥

विदूषकः। भो वअस्स। एसो क्खु राअसालो भणादि।४।

चारुदत्तः। किम्।

विदूषकः। एसा ससुवण्णा सहिलण्णा णवणाडअदंसणुट्ठिदा सुत्तधालि व्व वसन्तसेणा णाम गणिआ दालिआ कामदेवाअदणुज्जा ४७णादो पहुदि तुमं अणुरत्ता अम्हेहिं बलक्कालाणुणीअमाणा तुह्म गेहं पविट्ठा।५।

वसन्तसेना॥ स्वगतम् ॥ बलक्कालाणुणीअमाणेत्ति जं सच्चं अलङ्किद

म्हि एदेहिं अक्खरेहिं ।१।

विदूषकः । ता जइ मम कुत्थे सग्गं ज्जेव्व पट्ठाविअ एणं समथ्येसि ता अधिअरणे ववहारं विणा लहुअं णिज्जादमाणाह तव मए अणुबद्धा पीदी हुविस्सदि अण्णधा आमरणं वेरं हुविस्सदि ।२।

चारुदत्तः ॥ सावज्ञम् ॥ अज्ञो ऽसौ ॥ स्वगतम् ॥ अये कथं देवतोपस्थानयोग्या युवतिरियम् । तेन खलु तस्यां वेलायाम् ।

प्रविश गृहमिति प्रतोद्यमाना
न चलति भाग्यकृतां दशामवेक्ष्य ।
पुरुषपरिचयेन च प्रगल्भं
न वदति यद्यपि भाषते बहूनि ॥

॥ प्रकाशम् ॥ भवति वसन्तसेने अनेनाविज्ञानादपरिज्ञातपरिजनोपचारेणापराद्धो ऽस्मि । शिरसा भवतीमनुनयामि ।

४८ वसन्तसेना । एदिणा अणुचिदभूमिआरोहणेण अवरद्धा अज्जं सीसेण पणमिअ पसादेमि ।३।

विदूषकः । भो दुवे बि तुम्हे सुसम्पण्णा विअ कलमकेदारा अण्णोण्णं सीसेण सीसं समागदा । अहं पि इमिणा करहजाणुसरिसेण सीसेण दुवे बि तुम्हे पणमिअ पसादेमि उट्ठेध त्ति ।४।

चारुदत्तः । भवतु तिष्ठतु प्रणयः ।

वसन्तसेना ॥ स्वगतम् ॥ चदुरो मधुरो अ अअं उवण्णासो । ण जुत्तं अज्ज ईदिसेण इध आअदाए मए पडिवसिदुं । भोदु एव्वं दाव भणिस्सं ॥ प्रकाशम् ॥ अज्ज जइ एव्वं अहं अज्जस्स अणुगेज्झा ता इच्छे अहं इमं अलङ्कारअं अज्जस्स गेहे णिक्खिबिदुं । अलङ्कारस्स णिमित्तं एदे पाबा अणुसरन्ति ।५।

४९ चारुदत्तः । अयोग्यमिदं न्यासस्य गृहम् ।

वसन्तसेना । अज्ज अलिअं पुरिसेसु णासा णिक्खिबिअन्ति ण

ऽणा गेहेसु ।१।

चारुदत्तः । मैत्रेय गृह्यतामयमलङ्कारः ।

वसन्तसेना । अणुगहिद म्हि ।२। ॥ इत्यलङ्कारानर्पयति ॥

विदूषकः ॥ गृहीत्वा ॥ सोत्थि भोदीए ।३।

चारुदत्तः । धिङ्मूर्ख न्यासः खल्वयम् ।

विदूषकः ॥ अपवार्य ॥ जइ एव्वं ता चोरेहिं अवहरीअदु ।४।

चारुदत्तः । अचिरेणैव कालेन ।

विदूषकः । एसो से अम्हाणं विस्सासो ।५।

चारुदत्तः । निर्यातयिष्ये ।

वसन्तसेना । अज्ज इच्छे अहं इमिणा अज्जेण अणुगच्छिज्जन्ती सकं गेहं गन्तुं ।६।

चारुदत्तः । मैत्रेय अनुगच्छ तत्रभवतीम् ।

विदूषकः । तुमं ज्जेव्व एदं कलहंसगामिणीं अणुगच्छन्तो राअहंसो विअ सोहसि । अहं ऽणा बम्हणो तेहिं जणेहिं चउप्पहोव णीदो विअ उवहारो कुक्कुरेहिं विअ खज्जमाणो विवज्जिस्सं ।७।

चारुदत्तः । एवं भवतु । स्वयमेवानुगच्छामि भवतीम् । तद्राज मार्गविश्वासयोग्याः प्रज्वाल्यन्तां प्रदीपिकाः ।

विदूषकः । वड्ढमाणआ जालेहि पदीविआओ ।८।

चेटः ॥ जनान्तिकम् ॥ अले तेल्लेण विणा पदीविआओ पज्जालीअन्ति ।९।

विदूषकः ॥ जनान्तिकम् ॥ भो ताओ क्खु अम्हाणं पदीविआओ अवमाणिदनिद्धणकामुआ विअ गणिआ णिस्सिणेहाओ दाणिं संवुत्ता ।१०।

चारुदत्तः । मैत्रेय भवतु कृतं प्रदीपिकाभिः । पश्य ।

उदयति हि शशाङ्कः कामिनीगण्डपाण्डु
र्ग्रहगणपरिवारो राजमार्गप्रदीपः ।

तिमिरनिकरमध्ये रश्मयो यस्य गौराः
स्रुतजल इव पङ्के क्षीरधाराः पतन्ति ॥

॥ उत्थाय सानुरागम् ॥ भवति वसन्तसेने। इदं भवत्या गृहम्। प्रविशतु भवती।

वसन्तसेना ॥ सानुरागमवलोकयन्ती निष्क्रान्ता ॥

चारुदत्तः। वयस्य गता वसन्तसेना। तदेहि गृहमेव गच्छावः।

राजमार्गो हि शून्यो ऽयं रक्षिणः सञ्चरन्ति च।
वञ्चना परिहर्तव्या बहुदोषा हि शर्वरी ॥

॥ परिक्रम्य ॥ इदं च सुवर्णभाण्डं रक्षितव्यं त्वया रात्रौ वर्धमानके नापि दिवा।

विदूषकः। जधा भवं आणवेदि ।१।

॥ इति निष्क्रान्तौ ॥

इति मृच्छकटिकायाम्
अलङ्कारन्यासो नाम
प्रथमो ऽङ्कः ॥

प्रविश्य ५२

चेटी। अत्ताए अज्जुआसआसं सन्देसेण पेसिद म्हि। ता जाव पविसिअ अज्जुआसआसं गच्छामि ॥ परिक्रम्यावलोक्य च ॥ एसा अज्जुआ हिअएण किम्पि आलिहन्ती चिट्ठदि। ता जाव उपसप्पामि।१।

॥ ततः प्रविशति आसनस्था सोत्कण्ठा वसन्तसेना मदनिका च ॥

वसन्तसेना। हञ्जे तदो तदो।२।

मदनिका। अज्जुए ण किम्पि मन्तेसि। किं तदो तदो।३।

वसन्तसेना। किं मए भणिदं।४।

मदनिका। तदो तदो त्ति।५। ५३

वसन्तसेना ॥ सभ्रूक्षेपम् ॥ आं एव्वं।६।

उपसृत्य प्रथमा

चेटी। अज्जुए अत्ता आदिसदि ण्हादा भविअ देवदाणं पूअं णिव्वत्तेहि त्ति।७।

वसन्तसेना। हञ्जे विण्णवेहि अत्तं अज्ज ण ण्हाइस्सं ता बम्हणो ज्जेव्व पूअं णिव्वत्तेदु त्ति।८।

चेटी। जं अज्जुआ आणवेदि।९। ॥ इति निष्क्रान्ता ॥

मदनिका। अज्जुए सिणेहो पुच्छदि ण पुरोभाइदा ता किं णेदं।१०।

वसन्तसेना। मदणिए कीदिसिं मं पेक्खसि।११।

मदनिका। अज्जुआए सुण्णहिअअत्तणेण जाणामि हिअअगदं ५४ कम्पि अज्जुआ अहिलसदि त्ति।१२।

वसन्तसेना। सुट्ठु तुए जाणिदं। परहिअअग्गहणपण्डिआ मदणिआ खु तुमं।१३।

मदनिका। पिअं मे पिअं। कामो क्खु णाम एसो भअवं अणवगहिदो महूसवो तरुणजणस्स। ता कधेदु अज्जुआ किं राआ राअवल्लहो वा सेवीअदि ।१।

वसन्तसेना। हञ्जे रमिदुमिच्छामि ण सेविदुं ।२।

मदनिका। विज्जाविसेसालङ्किदो किं कोवि बम्हणो जुआ कामीअदि ।३।

वसन्तसेना। पूअणीओ मे बम्हणो जणो ।४।

५५ मदनिका। किं अणेअणअराभिगमणजणिदविहववित्थारो वा णिअजुआ वा कामीअदि ।५।

वसन्तसेना। हञ्जे उवारूढसिणेहं पि पणइजणं परिच्चइअ देसन्तरगमणेण वाणिअजणो महन्तं विओअदुक्खं उप्पादेदि ।६।

मदनिका। अज्जुए ण राआ ण राअवल्लहो ण बम्हणो ण वाणिअजणो। ता को दाणिं सो भट्टिदारिआए कामीअदि ।७।

वसन्तसेना। हञ्जे तुमं मए सह कामदेवाअदणुज्जाणं गदा आसि।८।

मदनिका। अज्जुए गद म्हि ।९।

५६ वसन्तसेना। हञ्जे तधावि मं उदासीणा विअ पुच्छसि ।१०।

मदनिका। जाणिदं अज्जुए। किं सो जेव्व जेण अज्जुआ सरणागदा अब्भुववण्णा ।११।

वसन्तसेना। किंणामहेओ क्खु सो ।१२।

मदनिका। सो क्खु सेट्ठिचत्तरे पडिवसदि ।१३।

वसन्तसेना। अइ णामं से पुच्छिदा सि ।१४।

मदनिका। सो क्खु अज्जुए सुगहिदणामहेओ अज्जचारुदत्तो णाम ।१५।

वसन्तसेना ॥ सहर्षम् ॥ साहु मदणिए साहु। सुट्ठु तुए जाणिदं ।१६।

मदनिका ॥ स्वगतम् ॥ एव्वं दाव ॥ प्रकाशम् ॥ अज्जुए दलिद्दो क्खु सो सुणीअदि ।१।

वसन्तसेना । अदो ज्जेव्व कामीअदि । दलिद्दपुरिससङ्कन्तमणा क्खु ५७
गणिआ लोए अवअणीआ भोदि ।२।

मदनिका । अज्जुए किं कीणकुसुमं सहआरपादवं महुअरीओ उण सेवन्ति ।३।

वसन्तसेना । अदो ज्जेव्व ताओ महुअरीओ वुच्चन्ति ।४।

मदनिका । अज्जुए जइ सो मणीसिदो ता कीस दाणिं सहसा णाहिसारीअदि ।५।

वसन्तसेना । हञ्जे सहसा अहिसारिअन्तो पच्चुअआरदुब्बलदाए मा दाव जणो दुल्लहदंसणो पुणो भविस्सदि ।६।

मदनिका । अज्जुए किं अदो ज्जेव्व सो अलङ्कारओ तस्स हत्थे ५८
णिक्खित्तो ।७।

वसन्तसेना । हञ्जे सुट्ठु दे जाणिदं ।८।

नेपथ्ये । अरे रे भट्टा दशसुवण्णाह लुद्धु जूदिअरु पपलीणु । ता गेण्ह गेण्ह । तिष्ठ दूरात्प्रदृष्टो ऽसि ।९।

प्रविश्यापटीक्षेपेण संभ्रान्तः ।

संवाहकः । कस्टे एशे जूदिअलभावे । हीमाणहे ।

णवबन्धणमुक्काए विअ गद्दहीए हा ताडिदो म्हि गद्दहीए ।
अङ्गलाअ मुक्काए विअ शत्तीए घटुक्को विअ घादिदो म्हि शत्तीए ॥
लेखअवावडहिअअं शहिअं दस्कूण झत्ति पब्भस्टे ।
एण्हिं मग्गणिबडिदे कं ण्णु हु शलणं पवज्जामि ॥

ता जाव एदे शहिअजूदिअला अण्णदो मं अण्णेशन्ति ताव इदो विप्प डीवेहिं पादेहिं एदं शुण्णदेउलं पविशिअ देवीहुविश्शं ।१०।

॥ बहुविधं नाट्यं कृत्वा तथा स्थितः । ततः प्रविशति माथुरो द्यूतकरश्च ॥ ५९

माथुरः। अरे रे भट्टा दशसुवण्णाह लुद्धु जूदिअरु पपलीणु। गेण्ह गेण्ह। तिष्ठ तिष्ठ दूरात्प्रदृष्टोऽसि ।१।

द्यूतकरः।

जइ वज्जसि पाआलं इन्दं सलणं च सम्पदं जासि।
सहिअं वज्जिअ एक्कं रुद्दो बि ण रक्खिदुं तरइ ॥ ।२।

६० माथुरः। कहिं कहिं सुसहिअविप्पलम्भआ
पलासि रे भअपलिवेबिदङ्गआ।
पदे पदे शमविशमं खलन्तआ
कुलं जसं सकलुशअं कलेन्तआ ॥ ।३।

द्यूतकरः ॥ पदं वीक्ष्य ॥ एसो वज्जदि। इअं इअं पणट्ठा पदवी ।४।

माथुरः ॥ आलोक्य सवितर्कम् ॥ अरे विप्पतीपु पादु पडिमाशुण्णु देउलु ॥ विचिन्त्य ॥ धुत्तु जूदिअरु विप्पदीबेहिं पादेहिं देउलं पविट्ठु ।५।

द्यूतकरः। ता अणुसरेम्ह ।६।

माथुरः। एव्वं भोदु ।७।

॥ उभौ देवकुलप्रवेशं निरूपयतः। दृष्ट्वा अन्योन्यं संज्ञाप्य ॥

६१ द्यूतकरः। कधं कट्ठमयी पडिमा ।८।

माथुरः। अले ण हु ण हु शेलप्पडिमा ॥ इति बहुविधं चालयतः संज्ञाप्य च ॥ एव्वं भोदु। एहि जूदं कीलेम्ह ।९। ॥ बहुविधं द्यूतं क्रीडतः ॥

संवाहकः ॥ द्यूतेच्छाविकारसंवरणं बहुविधं कृत्वा स्वगतम् ॥

अले।

कत्ताशद्दे णिण्णाणअश्श हलइ हडकं मणुश्शश्श।
ढक्काशद्दे व्व णडाधिबश्श पब्भट्ठलज्जश्श ॥
जाणामि ण कीलिश्शं शुमेलुशिहलपडणशण्णिहं जूअं।
तह बि अ कोइलमहुले कत्ताशद्दे मणं हलदि ॥ ।१०।

द्यूतकरः। मम पाठे मम पाठे ।११।

माथुरः। ण क्खु मम पाठे मम पाठे।१।

संवाहकः ॥ अन्यतः सहसोपसृत्य ॥ णं मम पाठे।२। ६२

द्यूतकरः। लद्धे गोह्ले।३।

माथुरः ॥ गृहीत्वा ॥ अले पेदण्डा गृह्लीतो ऽसि। पअच्छ तं दश सुवण्णं।४।

संवाहकः। अज्ज दइश्शं।५।

माथुरः। अज्जुणा पअच्छ।६।

संवाहकः। दइश्शं पशादं कलेहि।७।

माथुरः। अले णं सम्पदं पअच्छ।८।

संवाहकः। शिलु पडदि।९।

॥ इति भूमौ पतति। उभौ बहुविधं ताडयतः ॥

माथुरः। एसु तुह्ले ॥ द्यूतकरमण्डलीं कृत्वा ॥ जूदिअरमण्डलीए बद्धो सि।१०। ६३

संवाहकः ॥ उत्थाय सविषादम् ॥ कधं जूदिअलमण्डलीए बद्धो म्हि। ह्ली एशे अम्ह्लाणं जूदिअलाणं अलङ्घणीए शमए। ता कुदो दइश्शं।११।

माथुरः। अले गन्थु कुलु कुलु।१२।

संवाहकः। एव्वं कलेमि ॥ द्यूतकरमुपसृत्य ॥ अद्धं ते देमि अद्धं मे मुञ्चदु।१३।

द्यूतकरः। एव्वं भोदु।१४।

संवाहकः ॥ सभिकमुपसृत्य ॥ अद्धश्श गन्थु कलेमि अद्धं मे अज्जो मुञ्चदु।१५।

माथुरः। को दोसु। एव्वं भोदु।१६। ६४

संवहाकः ॥ प्रकाशम् ॥ अज्ज अद्धं तुए मुक्के।१७।

माथुरः। मुक्के।१८।

संवाहकः ॥ द्यूतकरं प्रति ॥ अद्धे तुए बि मुक्के।१९।

द्यूतकरः। मुक्के।१।

संवाहकः। शम्पदं गमिश्शं।२।

माथुरः। पअच्छ तं दशसुवण्णं कहिं गच्छसि।३।

संवाहकः। पेक्खध पेक्खध भश्टलका। शम्पदं ज्जेव्व एक्काह अड्ढे गन्थु कडे अबलाह अड्ढे मुक्के तधाबि मं अबलं शम्पदं ज्जेव्व मग्गदि।४।

६५ माथुरः ॥ गृहीत्वा ॥ धुत्तु माथुरु अहं णिउणु एहिं ण अहं धुत्ति ज्जामि। ता पअच्छ तं पेदण्डआ सव्वं सुवण्णं सम्पदं।५।

संवाहकः। कुदो दइश्शं।६।

माथुरः। पिदरं विक्किणिअ पअच्छ।७।

संवाहकः। कुदो मे पिदा।८।

माथुरः। मादरं विक्किणिअ पअच्छ।९।

संवाहकः। कुदो मे मादा।१०।

माथुरः। अप्पाणं विक्किणिअ पअच्छ।११।

संवाहकः। कलेध पशादं णेध मं लाअमग्गं।१२।

६६ माथुरः। पसरु पसरु।१३।

संवाहकः। एव्वं भोदु ॥ इति परिक्रामति ॥ अज्जा किणध मं इमश्श शहिअश्श हत्थादो दशेहिं शुवण्णकेहिं ॥ दृष्ट्वा आकाशे ॥ किं भणाध किं कलइश्शशि त्ति। गेहे दे कम्मकले हुविश्शं। कधं अदइअ पडिवअणं गदे। भोदु एव्वं इमं अण्णं भणइश्शं ॥ पुनस्तदेव पठति ॥ कधं एशे बि मं अवधीलिअ गदे। आ अज्जचारुदत्तश्श विहवे विहडिदे एशे वट्टामि मन्दभाए।१४।

माथुरः। णं देहि।१५।

संवाहकः। कुदो दइश्शं।१६। ॥ इति पतति। माथुरः कर्षति ॥

६७ संवाहकः। अज्जा पलित्ताअध पलित्ताअध।१७।

॥ ततः प्रविशति दर्दुरकः ॥

दर्दुरकः। भो द्यूतं हि नाम पुरुषस्यासिंहासनं राज्यम्। कुतः।

न गणयति पराभवं कुतश्चिद्धरति ददाति च नित्यमर्थजातम्।
नृपतिरिव निकाममायदर्शी विभववता समुपास्यते जनेन ॥

अपिच।

द्रव्यं लब्धं द्यूतेनैव दारामित्रं द्यूतेनैव।
दत्तं भुक्तं द्यूतेनैव सर्वं नष्टं द्यूतेनैव ॥

अपिच।

त्रेताहृतसर्वस्वः पावरपतनाच्च शोषितशरीरः।
नर्दितदर्शितमार्गः कटेन विनिपातितो यामि ॥

॥ अग्रतो ऽवलोक्य ॥ अयमस्माकं पूर्वसभिको माथुर इत एवाभिवर्तते। भवत्वपक्रमितुं न शक्यते तदवगुण्ठयाम्यात्मानम् ॥ इति बहुविधं नाट्यं कृत्वा स्थितः। उत्तरीयं निरीक्ष्य ॥

अयं पटः सूत्रदरिद्रतां गतः
अयं पटश्छिद्रशतैरलङ्कृतः।
अयं पटः प्रावरितुं न शक्यते
अयं पटः संवृत एव शोभते ॥

अथवा किमयं तपस्वी करिष्यति। यो ऽहं।

पादेनैकेन गगने द्वितीयेन च भूतले।
तिष्ठाम्युल्लम्बितस्तावद्यावत्तिष्ठति भास्करः ॥

माथुरः। दापअ दापअ ।१।

संवाहकः। कुदो दइश्शं ।२। ॥ माथुरः कर्षति ॥

दर्दुरकः। अये किमेतदग्रतः ॥ आकाशे ॥ किं भवानाह। अयं द्यूतकरः सभिकेन खलीक्रियते न कश्चिन्मोचयतीति। नन्वयं दर्दुरो मोचयति ॥ उपसृत्य ॥ अन्तरमन्तरम् ॥ दृष्ट्वा ॥ अये कथं माथुरो धूर्तः। अयमपि

तपस्वी संवाहकः ।

यः स्तब्धं दिवसान्तमानतशिरा नास्ते समुल्लम्बितो
यस्योद्घर्षणलोष्टकैरपि सदा पृष्ठे न जातः किणः ।
यस्यैतच्च न कुक्कुरैरपि मुहुर्जङ्घान्तरं चर्व्यते
तस्यात्यायतकोमलस्य सततं द्यूतप्रसङ्गेन किं ॥

भवतु माथुरं तावत्सान्त्वयामि ॥ उपगम्य ॥ माथुर अभिवादये ।

माथुरः । प्रत्यभिवादये ।

दर्दुरकः । किमेतत् ।

माथुरः । अअं दशसुवण्णं धालेदि ।१।

६१ दर्दुरकः । ननु कल्यवर्तमेतत् ।

माथुरः ॥ दर्दुरस्य कक्षातललुण्ठीकृतं पटमाकृष्य ॥ भट्टा पश्यत पश्यत । जज्जरपडप्पावुदो अअं पुलिसो दशसुवण्णं कल्लवत्तं भणादि ।२।

दर्दुरकः । अरे मूर्ख नन्वहं दशसुवर्णान्कटकरणेन प्रयच्छामि । तत्किं यस्यास्ति धनं स किं क्रोडे कृत्वा प्रदर्शयति । अरे ।

उच्छिन्नोऽसि विनष्टोऽसि दशस्वर्णस्य कारणात् ।
पञ्चेन्द्रियसमायुक्तो नरो व्यापाद्यते त्वया ॥

माथुरः । भट्टा तुए दशसुवण्णु कल्लवत्तु मम एसु विट्ठवु ।३।

दर्दुरकः । यद्येवं श्रूयतां तर्हि अन्यांस्तावद्दशसुवर्णानस्यैव प्रयच्छ । अयमपि द्यूतं शीलयतु ।

माथुरः । तत्किं भोदु ।४।

दर्दुरकः । यदि जेष्यति तदा दास्यति ।

७० माथुरः । अह ण जिणादि ।५।

दर्दुरकः । तदा न दास्यति ।

माथुरः । अह ण जुत्तं जम्पिदुं । एव्वं अकवत्तो तुहं पअच्छ धुत्तआ । अहं पि णाम माथुरु धुत्तु जूअं मिच्छा आदंसआमि अणस्स

बि अहं ण बिभेमि। धुत्ता खण्डिअवुत्तो सि तुहं।१।

दर्दुरकः। अरे कः खण्डितवृत्तः।

माथुरः। तुहं खण्डिदवुत्तो।२।

दर्दुरकः। पिता ते खण्डितवृत्तः ॥ संवाहकस्यापक्रमितुं संज्ञां ददाति ॥

माथुरः। गोसाविआपुत्त ण पडिस्सुदिअ दूदं मए सेविदं।३।

दर्दुरकः। मया एवं यूतमासेवितम्।

माथुरः। अले संवाहआ पअच्छ तं दशसुवण्णं।४। ७१

संवाहकः। अज्ज दइश्शं दाव दइश्शं।५। ॥ माथुरः कर्षति ॥

दर्दुरकः। मूर्ख परोक्षे खलीकर्तुं शक्यते न ममाग्रतः खलीकर्तुम्।

॥ माथुरः संवाहकमाकृष्य घोणायां मुष्टिप्रहारं ददाति। संवाहकः सशोणितं मूर्छां नाटयन्भूमौ पतति। दर्दुरक उपसृत्यान्तरयति। माथुरो दर्दुरं ताडयति। दर्दुरः प्रतीपं ताडयति ॥

माथुरः। अले ले डुट्ठ छिणालिआपुत्तअ फलं पि पाविहसि।६।

दर्दुरकः। अरे मूर्ख अहं त्वया मार्गगत एव ताडितः श्वो यदि राजकुले ताडयिष्यसि तदा द्रक्ष्यसि।

माथुरः। एसु पेक्खिस्सं।७।

दर्दुरकः। कथं द्रक्ष्यसि।

माथुरः ॥ प्रसार्य चक्षुषी ॥ एव्वं पेक्खिस्सं।८। ७२

॥ दर्दुरो माथुरस्य पांशुना चक्षुषी पूरयित्वा संवाहकस्यापक्रमितुं संज्ञां ददाति। माथुरो ऽक्षिणी निगृह्य भूमौ पतति। संवाहको ऽपक्रामति ॥

दर्दुरकः। ॥ स्वगतम् ॥ प्रधानसभिको माथुरो मया विरोधितः। तन्नात्र युज्यते स्थातुम्। कथितं च मम प्रियवयस्येन शर्विलकेन यथा किल आर्यकनामा गोपालदारकः सिद्धादेशेन समादिष्टो राजा भविष्यतीति। सर्वश्चास्मद्विधो जनस्तमनुसरति। तदहमपि तत्समीपमेव गच्छामि ॥ इति निष्क्रान्तः ॥

संवाहकः। ॥ सत्रासं परिक्रम्य दृष्ट्वा ॥ एशे कश्श बि अपलावुदपक्ख

डुआलके गेहे। ता एत्थ पविशिश्शं ॥ प्रवेशं रूपयित्वा वसन्तसेनामवलोक्य ॥ अज्जे शलणागद म्हि।१।

वसन्तसेना। अभअं सरणागदस्स। हञ्जे ढक्केहि पक्खदुआरअं।२।

चेटी। ॥ तथा कृत्वा परिक्रम्य ॥ अज्जुए किदं।३।

वसन्तसेना। किं।

चेटी। जं तुए कहिदं।४।

७३ वसन्तसेना। कुदो दे भअं।५।

संवाहकः। अज्जे धणिकादो।६।

वसन्तसेना। हञ्जे सम्पदं अबावुणु पक्खदुआरअं।७।

संवाहकः ॥ आत्मगतम् ॥ कधं धणिकादो तुलिदं शे भअकालणं। शुस्टु क्खु एव्वं वुच्चदि।

जे अत्तबलं जाणिअ भालं तुलिदं वहेइ माणुशे।
ताह क्खलणं ण जाअदि ण अ कन्तालगडे विवज्जदि॥

एत्थ लक्खिद म्हि।८।

माथुरः ॥ अक्षिणी प्रमृज्य द्यूतकरं प्रति ॥ अले देहि देहि।९।

७४ द्यूतकरः। भट्टा जावच्चिअ अम्हे दद्दुरेण कलहाबिदा तावच्चिअ सो गोहो अवक्कन्तो।१०।

माथुरः। तस्स जूदिअरस्स मुट्ठिप्पहारेण णासिका भग्गा आसि। ता एहि रुहिरपहं अणुसरेम्ह।११। ॥ अनुसृत्य ॥

द्यूतकरः। भट्टा वसन्तसेणागेहं पविट्ठो सो।१२।

माथुरः। भूदाइं सुवण्णाइं।१३।

द्यूतकरः। लाउलं गदुअ णिवेदेम्ह।१४।

माथुरः। एस धुत्तो इदो णिक्कमिअ अण्णत्त गमिस्सदि। ता उअरोधेणेव्व गेण्हेम्ह।१५।

७५ वसन्तसेना ॥ मदनिकायाः संज्ञां ददाति ॥

मदनिका। कुदो अय्यो को वा अय्यो कस्स वा अय्यो कं वा वित्तिं अय्यो उवजीअदि कुदो वा भअं ।१।

संवाहकः। शुणादु अय्युआ। अय्युए पाडलिउत्ते मे जम्मभूमी गहबइदालके हग्गे शंवाहकश्श वित्तिं उवजीआमि ।२।

वसन्तसेना। सुउमारा खु कला सिक्खिदा अय्येण ।३।

संवाहकः। अय्युए कलेत्ति शिक्खिदा आजीविआ दाणिं शंवुत्ता ।४।

चेटी। अदिणिव्विणं अय्येण पडिवअणं दिण्णं। तदो तदो ।५।

संवाहकः। तदो अय्युए एशे णिअगेहे आहिण्डकाणं मुहादो ७६
शुणिअ अपुव्वदेशदंशणकुदूहलेण इह आगदे। इध बि मए पविशिअ उज्जइणिं एक्के अय्ये शुश्शूशिदे जे तालिशे पिअदंशणे पिअवादी दइअ ण कित्तेदि अबकिदं विशुमलेदि। किं बहुणा उत्तेण दक्खिणदाए पलकेलअं विअ अत्ताणअं अवगच्छदि शलणागदवच्छले अ ।६।

चेटी। को दाणिं अय्युआए मणोरहत्तरस्स गुणाइं चोरिअ उज्जइणिं अलङ्करेदि ।७।

वसन्तसेना। साहु हञ्जे साहु। मए बि एव्वं जेव्व हिअएण मन्तिदं ।८।

चेटी। अज्ज तदो तदो ।९। ७७

संवाहकः। तदो अय्युए शे दाणिं अणुक्कोशकिदेहिं पदाणेहिं ।१०।

वसन्तसेना। किं उवरदविहवो संवुत्तो ।११।

संवाहकः। अणाचक्खिदे जेव्व कधं अय्युआए विण्णादं ।१२।

वसन्तसेना। किं एत्थ जाणीअदि दुल्लहा गुणा विहवा अ अपेएसु तडागेसु बहुदरं उदअं भोदि ।१३।

चेटी। अज्ज किणामधेओ क्खु सो ।१४।

संवाहकः। के दाणिं तश्श भूदलमिअङ्कश्श णामं ण आणादि

शे क्खु शेष्ठिचत्तले पडिवशदि शलाहणिज्जणामधेए अज्जचालुदत्ते णाम ।१।

७८ वसन्तसेना ॥ सहर्षमासनादवतीर्य ॥ अज्जस्स अत्तकेरकं एदं गेहं। हञ्जे देहि से आसणं। तालवेण्टअं गेण्ह परिस्समो अज्जस्स बाधेदि ।२।

चेटी ॥ तथा करोति ॥

संवाहकः ॥ स्वगतम् ॥ कधं अज्जचालुदत्तश्श णामशंकित्तणेण ईदिशे मे आदले। शाहु अज्जचालुदत्त शाहु पुहवीए तुमं एक्के जीवशि शेशे उण जणे शशदि ॥ इति पादयोर्निपत्य ॥ भोदु अज्जुए भोदु। आशणे णिशीददु अज्जुआ ।३।

वसन्तसेना ॥ आसने समुपविश्य ॥ अज्ज कुदो सो धणिओ ।४।

संवाहकः ।

शक्कालधणे क्खु शज्जणे काह ण होइ चलाचले धणे ।
जे पूइदुं बि आणादि शे पूआविशेशं वि आणादि ॥ ।५।

७९ वसन्तसेना । तदो तदो ।६।

संवाहकः । तदो तेण अज्जेण शवित्ती पलिचालके कद म्हि चालित्तावशेशे च तश्शिं जूदोवजीवि म्हि शंवुत्ते। तदो भाअधेअविशमदाए दशशुवण्णअं जूदे हालिदं ।७।

माथुरः । उच्छादिदो म्हि मूसिदो म्हि ।८।

संवाहकः । एदे दे शहिअजूदिअला मं अणुशन्धअन्ति। शम्पदं शुणिअ अज्जुआ पमाणं ।९।

वसन्तसेना । मदणिए वासपादवविसण्ठुलदाए पक्खिणो बि इदो तदो आहिण्डन्ति। हञ्जे ता गच्छ एदाणं सहिअजूदिअराणं अअं अज्जो ज्जेव्व पडिबादेदि त्ति इमं हत्थाभरणअं तुमं देहि ।१०। ॥ इति हस्तात्कटकमाकृष्य चेट्याः प्रयच्छति ॥

८० चेटी ॥ गृहीत्वा ॥ जं अज्जुआ आणबेदि ।११। ॥ इति निष्क्रान्ता ॥

माथुरः। उच्छादिदो म्हि मूसिदो म्हि ।१।

चेटी। जधा एदे उड्ढं पेक्खन्ति दीहं णीससन्ति अ विसूरअन्ति अद्दिलिहन्ति अ दुआरणिहिदलोअणा तधा तक्केमि एदे दे सहिअजूदिअरा हुविस्सन्ति ॥ उपगम्य ॥ अज्ज वन्दामि ।२।

माथुरः। सुहं तुह होदु ।३।

चेटी। अज्ज कदमो तुम्हाणं सहिओ ।४।

माथुरः।

कस्स तुहं तणुमज्झे अहरेण रइदट्ठुव्विणिदेण ।
जम्पसि मम्मणवअणं आलोअन्ती कडक्खेण ॥

णत्थि मे विहवो अण्णत्त वज्ज ।५।

चेटी। जइ ईदिसाइं ण मन्तेसि ता ण होसि जूदिअरो। अत्थि ८१
कोबि तुम्हाणं धारओ ।६।

माथुरः। अत्थि दशसुवण्णं धालेदि किं तस्स ।७।

चेटी। तस्स कारणादो अज्जुआ इमं हत्थाभरणं पडिबादेदि। णहि णहि सो ज्जेव्व पडिबादेदि ।८।

माथुरः ॥ सहर्षं गृहीत्वा ॥ अले भणेसि तं कुलपुत्तअं। भूदं तुह गन्धु आअच्छ पुणो जूदं रमह ।९। ॥ इति निष्क्रान्तौ ॥

चेटी ॥ वसन्तसेनामुपसृत्य ॥ अज्जुए परितुट्ठा गदा सहिअजूदिअरा ।१०।

वसन्तसेना। ता गच्छदु अज्जो बन्धुअणं समस्सासिदुं ।११।

संवाहकः। अज्जुए जइ एव्वं ता इअं कला पलिअणहत्थगदा ८२
कलीअदु ।१२।

वसन्तसेना। अज्ज जस्स कारणादो इअं कला सिक्खीअदि सो ज्जेव्व अज्जेण सुस्सूसिदपुरुव्वो सुस्सूसिदव्वो ।१३।

संवाहकः ॥ स्वगतम् ॥ अज्जुआए णिउणं पच्चादिष्टे म्हि। ता कधं पच्चुबकलिश्शं ॥ प्रकाशम् ॥ अज्जुए अहं एदिणा जूदिअलावमाणेण

शक्कश्शमणके हुविश्शं। ता शंवाहके जूदिअले शक्कश्शमणके शंवुत्तेत्ति शुमलिदव्वे अज्जुआए एदे अक्खलु ।१।

वसन्तसेना। अज्ज अलं साहसेण ।२।

८३ संवाहकः। अज्जुए कले णिच्चए ॥ इति परिक्रम्य ॥

जूदेण तं कदं मे जं बीहच्छं जणश्श शव्वश्श।
एण्हिं पाअडशीशे णलिन्दमग्गेण विहलिश्शं ॥ ।३।

॥ नेपथ्ये कलकलः ॥

संवाहकः ॥ आकर्ण्य ॥ अले किं णेदं ॥ आकाशे ॥ किं भणाध। एशे क्खु वशन्तशेणाकेलके खुण्टमोडके णाम दुट्ठहत्थी विहलेदि त्ति। अहो अज्जुआए गन्धगअं पेक्खिश्शं गदुअ। अहवा किं मम एदिणा जधाववशिदं अणुचिट्ठिश्शं ।४। ॥ इति निष्क्रान्तः ॥

॥ ततः प्रविशत्यपटीक्षेपेण प्रहृष्टो विकटोज्ज्वलवेशः कर्णपूरकः ॥

कर्णपूरकः। कहिं कहिं अज्जुआ ।५।

८४ चेटी। दुम्मणुस्स किं ते उव्वेअकारणं जं अग्गदो वट्टिदं अज्जुअं ण पेक्खसि ।६।

कर्णपूरकः ॥ दृष्ट्वा ॥ अज्जुए वन्दामि ।७।

वसन्तसेना। कण्णऊरअ परितुट्ठमुहो लक्खीअसि ता किं णेदं ।८।

कर्णपूरकः ॥ सविस्मयम् ॥ अज्जुए वञ्चिदासि जाए अज्ज कण्णऊरअस्स परक्कमो ण दिट्ठो ।९।

वसन्तसेना। कण्णऊरअ किं किं ।१०।

कर्णपूरकः। सुणादु अज्जुआ। जो सो अज्जुआए खुण्टमोडओ णाम दुट्ठहत्थी सो आलाणखम्भं भञ्जिअ महामेत्तं वावादिअ महन्तं सङ्खोहं करेन्तो राअमग्गं ओदिण्णो। तदो एत्थन्तरे उग्घुट्ठं जणेण।

अवणेध बालअजणं तुरिदं आरुहह रुक्खपासादं।
किं ण हु पेक्खध पुरदो दुट्ठो हत्थी इदो एदि ॥

अवि अ। ८१

विअलइ णेउरजुअलं छिज्जन्ति अ मेहला मणिक्खइआ।
वलआ अ सुन्दरदरा रअणङ्कुरजालपडिबद्धा ॥

तदो तेण दुट्ठहत्थिणा करचलणरदणेहिं फुल्लणलिणिं विअ णअरिं उज्जइणिं अवगाहमाणेण समासादिदो परिव्वाजओ। तं च परिब्भट्ठदण्डकुण्डिआभाअणं सीहरेहिं सिञ्चिअ दन्तन्तरे खित्तं पेक्खिअ पुणो वि उग्घुट्ठं जणेण हा परिव्वाजओ वावादीअदि त्ति ।१।

वसन्तसेना ॥ ससम्भ्रमम् ॥ अहो पमादो ।२। ८६

कर्णपूरकः। अलं सम्भमेण सुणादु दाव अज्जुआ। तदो विच्छिण्णसङ्खलाकलावअं दन्तन्तरपरिग्गहिदं परिव्वाजअं उव्वहन्तं तं पेक्खिअ कण्णऊरएण मए णहि णहि अज्जुआए अण्णपिण्डोवपुट्ठेण दासेण वामचलणेण जूदलेक्खअं उग्घुसिअ तुरिदं आवणादो लोहदण्डं गेण्हिअ आआरिदो सो दुट्ठहत्थी ।३।

वसन्तसेना। तदो तदो ।४।

कर्णपूरकः।

आहणिऊण सरोसं तं हत्थिं विज्झसेलसिहराभं।
मोआविओ मए सो दन्तन्तरसण्ठिओ परिव्वाजओ ॥ ।५।

वसन्तसेना। सुट्ठु दे कदं तदो तदो ।६। ८७

कर्णपूरकः। तदो अज्जुए साहु रे कण्णऊरअ साहु त्ति एत्तिअमेत्तं भणन्ती विसमभरक्कन्ता विअ णावा एक्कदो पल्हत्था सअला उज्जइणी आसि। तदो अज्जुए एक्केण सुणाइं आहरणट्ठाणाइं परामसिअ उड्ढं पेक्खिअ दीहं णीससिअ अअं पावारओ ममोवरि क्खित्तो ।७।

वसन्तसेना। कण्णऊरअ जाणीहि दाव किं एसो जादीकुसुमवासिदो पावारओ ण वेत्ति ।८।

कर्णपूरकः। अज्जुए मदगन्धेण सुट्ठु तं गन्धं ण जाणामि ।१।

८८ वसन्तसेना। णामं पि दाव पेक्ख ।२।

कर्णपूरकः। इमं णामं अज्जुआ एव्व वाएदु ।३। ॥ इति प्रावारकमुपनयति ॥

वसन्तसेना। आर्यचारुदत्तस्य। ॥ इति वाचयित्वा सस्पृहं गृहीत्वा प्रावृणोति ॥

चेटी। कण्णऊरअ सोहइ अज्जुआए पावारओ ।४।

कर्णपूरकः। आं सोहइ अज्जुआए पावारओ ।५।

वसन्तसेना। कण्णऊरअ इदं दे पारितोसिअं ।६। ॥इत्याभरणं प्रयच्छति॥

कर्णपूरकः ॥शिरसा गृहीत्वा प्रणम्य च॥ सम्पदं सुट्ठु सोहदि अज्जुआए पावारओ ।७।

वसन्तसेना। कण्णऊरअ एदाए वेलाए कहिं स अज्जचारुदत्तो ।८।

८९ कर्णपूरकः। एदेण ज्जेव्व मग्गेण पवुत्तो गेहं ।९।

वसन्तसेना। हञ्जे उवरिदणं अलिन्दअं आरुहिअ अज्जचारुदत्तं पेक्खम्ह ।१०।

॥ इति निष्क्रान्ताः सर्वे ॥

इति मृच्छकटिकायां

द्यूतकरसंवाहको नाम

द्वितीयो ऽङ्कः ॥

ततः प्रविशति चेटः । १०

चेटः ।

शुअणो हु भिच्चाणुकम्पके शामिए णिद्धणके बि शोहदि ।
पिशुणो उण दव्वगव्विदे दुक्कले क्खु पलिणामदालुणो ॥

अबि अ ।

शश्शपलक्कबलद्दे ण शक्कि वालिदुं
अणकलत्तपशत्ते ण शक्कि वालिदुं ।
जूदपशत्तमणुश्शे ण शक्कि वालिदुं
जे बि शह्वाविअदोशे ण शक्कि वालिदुं ॥

काबि वेला अज्जचालुदत्तश्श गन्धव्वं शुणिदुं गदश्श अदिक्कमदि अद्धलअणी अज्ज बि णागच्छदि। ता जाव वाहिलदुआलशालाए गदुअ शुबिश्शं ।१।

॥ तथा करोति। ततः प्रविशति चारुदत्तो विदूषकश्च ॥ ११

चारुदत्तः। अहो साधु भावरेभिलकेन गीतम्। वीणा हि नाम असमुद्रोत्थितं रत्नम्। यतः।

उत्कण्ठितस्य हृदयानुगुणा वयस्या
सङ्केतके चिरयति प्रवरो विनोदः ।
संस्थापना प्रियतमा विरहातुराणां
रक्तस्य रागपरिवृद्धिकरः प्रमोदः ॥

विदूषकः। भो एहि गेहं गच्छेम्ह ।२।

चारुदत्तः। अहो सुट्ठु भावरेभिलकेन गीतम् । १२

विदूषकः। मम दाव दुवेहिं जेव्व हस्सं जाअदि। इत्थिआए सक्कदं पठन्तीए मणुस्सेण अ काअलिं गाअन्तेण। इत्थिआ दाव सक्कदं पठन्ती दिण्णणवणस्सा विअ गिट्ठी अधिअं सुसुआअदि मणुस्सो वि काअलिं गाअन्तो सुक्खसुमणोदामवेढिदो वुड्ढपुरोहिदो विअ मन्तं जवन्तो दिढं मे ण रोअदि।१।

चारुदत्तः। वयस्य सुष्ठु खल्वद्य गीतं भावरेभिलेन। न च भवान्परितुष्टः।

रक्तं च नाम मधुरं च समं स्फुटं च
भावान्वितं च ललितं च मनोहरं च।
किं वा प्रशस्तवचनैर्बहुभिर्मदुक्तै
रन्तर्हिता यदि भवेद्वनितेति मन्ये॥

अपिच।

तं तस्य स्वरसंक्रमं मृदुगिरः श्लिष्टं च तन्त्रीस्वनं
वर्णानामपि मूर्छनान्तरगतं तारं विरामे मृदुम्।
हेलासंयमितं पुनश्च ललितं रागाद्विरुच्चारितं
यत्सत्यं विरते ऽपि गीतसमये गच्छामि शृण्वन्निव॥

विदूषकः। भो वअस्स आवणन्तरवीहीए सुट्ठं कुक्कुरा वि पसुत्ता ता गेहं गच्छेम्ह ॥अग्रतो ऽवलोक्य॥ वअस्स पेक्ख पेक्ख एसो वि अन्धआरस्स विअ अवआसं देन्तो अन्तरिक्खपासादादो ओदरदि भअवं चन्दो।२।

चारुदत्तः। सम्यगाह भवान्।

असौ हि दत्वा तिमिरावकाशमस्तं व्रजत्युन्नतकोटिरिन्दुः।
जलावगाढस्य वनद्विपस्य तीक्ष्णं विषाणाग्रमिवावशिष्टम्॥

विदूषकः। भो एदं अम्हाणं गेहं। वड्ढमाणआ वड्ढमाणआ देहि दुआरअं।३।

चेटः। अज्जमित्तेआह्र शलशज्जोए शुणीअदि। आगदे अज्जचालु १४
दत्ते। ता जाव दुआलअं देमि ॥ तथा कृत्वा ॥ अज्ज वन्दामि अज्ज मित्तेअ तुमं पि वन्दामि। एत्थ वित्थिण्णे आशणे णिशीदन्तु अज्जा।१।

॥ उभौ नाट्येन प्रविश्योपविशतः ॥

विदूषकः। वड्ढमाणआ एअणिअं सद्दावेहि पादाइं धोइदुं।२।

चारुदत्तः ॥ सानुकम्पम् ॥ अलं सुप्तजनं प्रबोधयितुम्।

चेटः। अज्ज मित्तेअ अहं पाणिअं गेण्हे तुमं पादाइं धोवेहि।३।

विदूषकः। ॥ सक्रोधम् ॥ भो वअस्स एसो दाणिं दासीए उत्तो भविअ पाणिअं गेण्हदि मं च बम्हणं पादाइं धोवावेदि।४।

चारुदत्तः। वयस्य मैत्रेय त्वमुदकं गृहाण वर्धमानश्च पादौ प्रक्षालयतु।

चेटः। अज्ज मित्तेअ देहि उदअं।५। १५

विदूषकस्तथा करोति चेटश्चारुदत्तस्य पादौ प्रक्षाल्यापसरति ॥

चारुदत्तः। दीयतां ब्राह्मणस्य पादोदकम्।

विदूषकः। किं मम पादोदएहिं। भूमीए ज्जेव्व मए पिट्टिदगद्दहेण विअ पुणो वि लोट्टिदव्वं।६।

चेटः। अज्ज मित्तेअ बम्हणो क्खु तुमं।७।

विदूषकः। जधा सव्वणागाणं मज्झे डुण्डुहो तधा सव्वबम्हणाणं मज्झे अहं बम्हणो।८।

चेटः। अज्ज मित्तेअ तधावि धोइश्शं ॥ तथा कृत्वा ॥ अज्ज मित्तेअ एदं तं शुवण्णभण्डअं मम दिवा तुह्म लत्तिं च ता गेण्ह।९। ॥ इति दत्वा निष्क्रान्तः ॥

विदूषकः। ॥ गृहीत्वा ॥ अज्ज वि एदं चिट्ठदि। किं एत्थ उज्जइणीए चोरो वि णत्थि जो एदं दासीएउत्तो णिद्दाचोरं णावहरदि। भो वअस्स अब्भन्तरचतुस्सालअं पवेसआमि णं।१०। १६

चारुदत्तः ।

अलं चतुःशालमिमं प्रवेश्य प्रकाशनारीधृत एष यस्मात् ।
तस्मात्स्वयं धारय विप्र तावद्यावन्न तस्याः खलु भोः समर्प्यते ॥

॥ निद्रां नाटयन् ॥ तं तस्य स्वरसंक्रममिति पुनः पठति ॥

विदूषकः । अवि णिद्दाअदि भवं ।१।

चारुदत्तः । अथ किम् ।

इयं हि निद्रा नयनावलम्बिनी ललाटदेशादुपसर्पतीव माम् ।
अदृश्यरूपा चपला जरेव मनुष्यसत्त्वं परिभूय वर्धते ॥

विदूषकः । ता सुवेम्ह ।२। ॥ नाट्येन स्वपितः ॥ ततः प्रविशति शर्विलकः ।

शर्विलकः ।

कृत्वा शरीरपरिणाहसुखप्रवेशं
शिक्षाबलेन च बलेन च कर्ममार्गम् ।
गच्छामि भूमिपरिसर्पणघृष्टपार्श्वो
निर्मुच्यमान इव जीर्णतनुर्भुजङ्गः ॥

॥ नभो ऽवलोक्य सहर्षम् ॥ अये कथमस्तमुपगच्छति स भगवान्मृगाङ्कः । तथाहि ।

नृपतिपुरुषशङ्कितप्रचारं परगृहदूषणनिश्चितैकवीरम् ।
घनपटलतमोनिरुद्धतारा रजनिरियं जननीव संवृणोति ॥

वृक्षवाटिकापरिसरे सन्धिं कृत्वा प्रविष्टो ऽस्मि मध्यमकं तद्यावदिदानीं चतुःशालकमपि दूषयामि । भोः ।

कामं नीचमिदं वदन्ति पुरुषाः स्वप्ने च यद्वर्धते
विश्वस्तेषु च वञ्चनापरिभवश्चौर्यं न शौर्यं हि तत् ।
स्वाधीना वचनीयतापि हि वरं बद्धो न सेवाञ्जलि
र्मार्गो ह्येष नरेन्द्रसौप्तिकबधे पूर्वं कृतो द्रौणिना ॥

तत्कस्मिन्नु देशे सन्धिमुत्पादयामि ।

देशः को नु जलावसेकशिथिलो यस्मिन्न शब्दो भवे
द्भित्तीनां च न दर्शनान्तरगतः सन्धिः करालो भवेत्।
क्षारक्षीणतया च लोष्टककृशं जीर्णं क्व हर्म्यं भवे
त्कस्मिन्स्त्रीजनदर्शनं च न भवेत्स्यादर्थसिद्धिश्च मे ॥

॥ भित्तिं परामृश्य ॥ नित्यादित्यदर्शनोदकसेचनेन दूषितेयं भूमिः क्षा
रक्षीणा मूषिकोत्करश्चेह। हन्त सिद्धो ऽयमर्थः। प्रथममेतत्स्कन्दपुत्रा १८
णां सिद्धिलक्षणम्। अत्र कर्मप्रारम्भे कीदृशमिदानीं सन्धिमुत्पादयामि। इह खलु भगवता कनकशक्तिना चतुर्विधः सन्ध्युपायो दर्शितः। तद्यथा पक्वेष्टकानामाकर्षणमामेष्टकानां तु छेदनं पिण्डमयानां सेचनं काष्ठमयानां पाटनमिति। तदत्र पक्वेष्टके इष्टिकाकर्षणम्। तत्र।

पद्मव्याकोशं भास्करं बालचन्द्रं
वापीविस्तीर्णं स्वस्तिकं पूर्णकुम्भम्।
तत्कस्मिन्देशे दर्शयाम्यात्मशिल्पं
दृष्ट्वा श्वो यं यद्विस्मयं यान्ति पौराः ॥

तदत्र पक्वेष्टके पूर्णकुम्भ एव शोभते। तमुत्पादयामि।

अन्यासु भित्तिषु मया निशि पाटितासु
क्षारक्षतासु विषमासु च कल्पनासु।
दृष्ट्वा प्रभातसमये प्रतिवेशिवर्गो
दोषांश्च मे वदति कर्माणि कौशलं च ॥

नमो वरदाय कुमारकार्तिकेयाय नमः कनकशक्तये ब्रह्मण्याय देवाय देवव्रताय नमो भास्करनन्दिने नमो योगाचार्याय यस्याहं प्रथमः शिष्यः। तेन च परितुष्टेन योगरोचना मे दत्ता।

अनया हि समालब्धं न मां द्रक्ष्यन्ति रक्षिणः।
शस्त्रं च पतितं गात्रे रुजं नोत्पादयिष्यति ॥

॥ तथा करोति ॥ धिक्कष्टं प्रमाणसूत्रं मे विस्मृतम् ॥ विचिन्त्य ॥ आं

इदं यज्ञोपवीतं प्रमाणसूत्रं भविष्यति। यज्ञोपवीतं हि नाम ब्राह्मणस्य महदुपकरणं विशेषतो ऽस्मद्विधस्य। कुतः।

एतेन मापयति भित्तिषु कर्ममार्ग
मेतेन मोचयति भूषणसम्प्रयोगान्।
उद्घाटको भवति यन्त्रदृढे कपाटे
दष्टस्य कीटभुजगैः परिवेष्टनं च ॥

मापयित्वा कर्म समारभे ॥ तथा कृत्वावलोक्य च ॥ एकलोष्टावशेषो ऽयं सन्धिः। धिक्कष्टमहिना दष्टो ऽस्मि ॥ यज्ञोपवीतेनाङ्गुलीं बद्ध्वा विषवेगं नाटयति ॥ चिकित्सां कृत्वा स्वस्थो ऽस्मि ॥ पुनः कर्म कृत्वा दृष्ट्वा च ॥ अये ज्वलति प्रदीपः। तथाहि।

शिखा प्रदीपस्य सुवर्णपिञ्जरा महीतले सन्धिमुखेन निर्गता।
विभाति पर्यन्ततमःसमावृता सुवर्णरेखेव कषे निवेशिता ॥

॥ पुनः कर्म कृत्वा ॥ समाप्तो ऽयं सन्धिः। भवतु प्रविशामि। अथवा न तावत्प्रविशामि प्रतिपुरुषं तावत्प्रवेशयामि ॥ तथा कृत्वा ॥ अये न कश्चित्। नमः कार्तिकेयाय ॥ इति प्रविश्य दृष्ट्वा च ॥ अये पुरुषद्वयं सुप्तम्। भवतु आत्मरक्षार्थं कपाटमुद्घाटयामि। कथं जीर्णत्वाद्गृहस्य विरौति कपाटः। तद्यावत्सलिलमन्वेषयामि। क्व नु खलु सलिलं भविष्यति ॥ इतस्ततो दृष्ट्वा गृहीत्वा सलिलं प्रक्षिपत्सशङ्कम् ॥ मा तावद्भूमौ पतच्छब्दमुत्पादयेत्। भवत्वेवं तावत् ॥ पृष्ठेन प्रतीच्य कपाटमुद्घाट्य ॥ भवत्वेवं तावदिदानीं किं लक्ष्यसुप्तमुत परमार्थसुप्तमिदं द्वयम् ॥ त्रासयित्वा परीक्ष्य च ॥ अये परमार्थसुप्तेनानेन भवितव्यम्। तथाहि।

१०० निःश्वासो ऽस्य न शङ्कितः सुविशदस्तुल्यान्तरं वर्तते
दृष्टिर्गाढनिमीलिता न विकला नाभ्यन्तरे चञ्चला।
गात्रं स्रस्तशरीरसन्धिशिथिलं शय्याप्रमाणाधिकं
दीपं चापि न मर्षयेदभिमुखं स्याल्लक्ष्यसुप्तं यदि ॥

॥ समन्तादवलोक्य ॥ अये कथं मृदङ्गः। अयं दर्दुरः। अयं पणवः। इय मपि वीणा। एते वंशाः। अमी पुस्तकाः। कथं नाट्याचार्यगृहमिदम्। अथवा भवनप्रत्ययात्प्रविष्टो ऽस्मि तत्किं परमार्थदरिद्रो ऽयमुत राज भयाच्चौरभयाद्वा भूमिष्ठद्रव्यं धारयति। तन्ममापि नाम शर्विलकस्य भूमिष्ठं द्रव्यम्। भवतु बीजं प्रक्षिपामि ॥ तथा कृत्वा ॥ निक्षिप्तं बीजं न क्वचित्स्फारीभवति। अये परमार्थदरिद्रो ऽयं। भवतु गच्छामि।

विदूषकः ॥ उत्स्वप्नायते ॥ भो वअस्स सन्धी विअ दिस्सदि चोरं विअ पेक्खामि ता गेण्हदु भवं एदं सुवण्णभण्डअं।१।

शर्विलकः। किं नु खल्वयमिह मां प्रविष्टं ज्ञात्वा दरिद्रो ऽस्मीति उपहसति तत्किं व्यापादयामि। उत लघुत्वादुत्स्वप्नायते ॥ दृष्ट्वा ॥ अये जर्जरस्नानशाटीनिबद्धं दीपप्रभयोद्दीपितं सत्यमेवैतदलङ्का रभाण्डम्। भवतु गृह्णामि। अथवा न युक्तं तुल्यावस्थं कुलपुत्रजनं पीडयितुं तद्गच्छामि।

विदूषकः। भो वअस्स साविदो सि गोबम्हणकामाए जइ एदं १०१ सुवण्णभण्डअं ण गेण्हसि।२।

शर्विलकः। अनतिक्रमणीया मम भगवती गोकाम्या ब्राह्मण काम्या च तद्गृह्णामि। अथवा ज्वलति प्रदीपः। अस्ति च मया प्रदीप निर्वापणार्थमाग्नेयः कीटो धार्यते। तस्यायं देशकालः। एष मुक्तो मया कीटो यात्विवास्य दीपस्योपरि मण्डलैर्विचित्रैर्विचरति एष पक्ष द्वयानिलेन निर्वापितो भद्रपीठेन। धिक्कृतमन्धकारम्। अथवा मयापि अस्मद्ब्राह्मणकुले धिक्कृतमन्धकारम्। अहं हि चतुर्वेदविदो ऽप्रतिग्रा हकस्य पुत्रः शर्विलको नाम ब्राह्मणो गणिकामदनिकार्थमकार्यमनु तिष्ठामि। इदानीं करोमि ब्राह्मणस्य प्रणयम् ॥ इति जिघृक्षति ॥

विदूषकः। भो वअस्स सीदलो दे अग्गहत्थो।३।

शर्विलकः। धिक् प्रमादः सलिलसम्पर्काच्छीतलो मे अग्रहस्तः।

भवतु कक्षयोर्हस्तं प्रक्षिपामि ॥ इति नाट्येन सव्यहस्तमुष्णीकृत्य गृह्णाति ॥

विदूषकः । गह्निदं ।१।

१०२ शर्विलकः । अनतिक्रमणीयो ऽयं ब्राह्मणप्रणयः । तद्गृहीतम् ।

विदूषकः । दाणिं विक्किणिदपण्णो विअ वाणिओ सुहं सुविस्सं ।२।

शर्विलकः । महाब्राह्मण वर्षशतं स्वपिहि । कष्टमेवं मदनिकागणिकार्थे ब्राह्मणकुलं तमसि पातितम् । अथवा आत्मा पातितः ।

धिगस्तु खलु दारिद्र्यमनिर्वेदितपौरुषम् ।
यदेतद्गर्हितं कर्म निन्दामि च करोमि च ॥

तद्यावन्मदनिकाया निष्क्रयणार्थं वसन्तसेनागृहं गच्छामि ॥ परिक्रम्यावलोक्य च ॥ अये पदशब्द इव मा नाम रक्षिणः । भवतु स्तम्भीभूत्वा तिष्ठामि । अथवा ममापि नाम शर्विलकस्य रक्षिणः । यो ऽहम् ।

मार्जारः क्रमणे मृगः प्रसरणे श्येनो ग्रहालुञ्चने
सुप्तासुप्तमनुष्यवीर्यतुलने श्वा सर्पणे पन्नगः ।
मायारूपशरीरवेशरचने वाग्देशभाषान्तरे
दीपो रात्रिषु सङ्कटेषु डुडुभो वाजी स्थले नौर्जले ॥

अपिच ।

भुजग इव गतौ गिरिः स्थिरत्वे पतगपतेः परिसर्पणे च तुल्यः ।
शश इव भुवनावलोकने ऽहं वृक इव च ग्रहणे बले च सिंहः ॥

॥ प्रविश्य रदनिका ॥

१०३

रदनिका । हद्धी हद्धी बाहिरदुआरसालाए पसुत्तो वड्ढमाणओ सो बि एत्थ ण दीसदि । भोदु अज्जमित्तेअं सद्दावेमि ।३। ॥ इति परिक्रामति ॥

शर्विलकः ॥ रदनिकां हन्तुमिच्छति निरूप्य ॥ कथं स्त्री भवतु गच्छामि ॥ इति निष्क्रान्तः ॥

रदनिका ॥ गत्वा सत्रासम् ॥ हद्धी हद्धी अम्हाणं गेहे सन्धिं कप्पिअ चोरो णिक्कमदि। भोदु मित्तेअं गदुअ पबोधेमि ॥ विदूषकमुपगम्य ॥ अज्ज मित्तेअ उट्ठेहि उट्ठेहि अम्हाणं गेहे सन्धिं कप्पिअ चोरो णिक्कन्तो ।१।

विदूषकः ॥ उत्थाय ॥ आ दासीए धीए किं भणासि चोरो कप्पिदो सन्धी णिक्कन्तो त्ति ।२।

रदनिका। हदास अलं परिहासेण किं ण पेक्खसि एणं ।३। १०४

विदूषकः। आ दासीए धीए किं भणासि दुदिअं विअ दुआरअं उग्घाडिदं त्ति। भो वअस्स चारुदत्त उट्ठेहि उट्ठेहि अम्हाणं गेहे सन्धिं दइअ चोरो णिक्कन्तो ।४।

चारुदत्तः। भवतु भोः अलं परिहासेन।

विदूषकः। भो ण परिहासो पेक्खदु भवं ।५।

चारुदत्तः। कस्मिन्नु देशे।

विदूषकः। भो एसो ।६।

चारुदत्तः ॥ विलोक्य ॥ अहो दर्शनीयो ऽयं सन्धिः।

उपरितलनिपातितेष्टको ऽयं
शिरसि तनुर्विपुलश्च मध्यदेशे।
असदृशजनसम्प्रयोगभीरो
र्हृदयमिव स्फुटितं महागृहस्य॥

कथमस्मिन्नपि कर्मणि कुशलता।

विदूषकः। भो वअस्स अअं सन्धी दुवेहिं ज्जेव्व दिण्णो भवे १०५ आदु आगन्तुएण सिक्खिदुकामेण वा। अण्णहा इध उज्जइणीए अम्हाणं घरविहवं को ण आणादि ।७।

चारुदत्तः ।

वैदेश्येन कृतो भवेन्मम गृहे व्यापारमभ्यस्यता
नासौ वेदितवान्धनैर्विरहितं विश्रब्धसुप्तं जनम् ।
दृष्ट्वा प्राग्महतीं निवासरचनामस्माकमाशान्वितः
सन्धिच्छेदनखिन्न एव सुचिरं पश्चान्निराशो गतः ॥

ततः सुहृद्भ्यः किमसौ कथयिष्यति तपस्वी । सार्थवाहसुतस्य गृहं प्रविश्य न किञ्चिन्मया समासादितमिति ।

विदूषकः । भो कधं तं ज्जेव्व चोरहदअं अणुसोचेसि । तेण चिन्तिदं महन्तं एदं गेहं इदो रअणभण्डअं सुवण्णभण्डअं वा णिक्कामइस्सामि ॥ स्मृत्वा सविषादमात्मगतम् ॥ कहिं तं सुवण्णभण्डअं ॥ पुनरनुस्मृत्य प्रकाशम् ॥ भो वअस्स तुमं सव्वकालं भणासि मुक्खो मित्तेअओ अपण्डिदो मित्तेअओ त्ति । सुट्ठु क्खु मए कदं तं सुवण्णभण्डअं भवदो हत्थे समप्पअन्तेण अण्णहा दासीएउत्तेण अवहृदं भवे ।१।

१०६ चारुदत्तः । अलं परिहासेन ।

विदूषकः । भो जह वि णाम अहं मुक्खो तह वि परिहासस्स वि देसआलं ण आणामि ।२।

चारुदत्तः । कस्यां वेलायाम् ।

विदूषकः । जदा तुमं मए भणिदो सि सीदलो दे अग्गहत्थो ।३।

चारुदत्तः । कदाचिदेवमपि स्यात् ॥ सर्वतो निरूप्य सहर्षम् ॥ वयस्य दिष्ट्या प्रियं ते निवेदयामि ।

विदूषकः । किं ण अवहृदं ।४।

चारुदत्तः । हृतम् ।

विदूषकः । तधावि किं पिअं ।५।

चारुदत्तः । यदसौ कृतार्थो गतः ।

१०७ विदूषकः । णासो क्खु सो ।६।

चारुदत्तः। कथं न्यासः ॥ मोहमुपगतः ॥

विदूषकः। समस्ससदु भवं। जइ णासो चोरेण अवहृदो तुमं किं मोहमुपगदो।१।

चारुदत्तः ॥ समाश्वस्य ॥

कः श्रद्धास्यति भूतार्थं सर्वो मां तुलयिष्यति।
शङ्कनीया हि लोके ऽस्मिन्निष्प्रतापा दरिद्रता॥

भोः कष्टम्।

यदि तावत्कृतान्तेन प्रणयो ऽर्थेषु मे कृतः।
किमिदानीं नृशंसेन चारित्रमपि दूषितम्॥

विदूषकः। अहं क्खु अवलविस्सं। केण दिण्णं केण गहिदं को वा सक्खि त्ति।२।

चारुदत्तः। अहमिदानीमनृतमभिधास्ये।

भैक्ष्येणाप्यर्जयिष्यामि पुनर्न्यासप्रतिक्रियाम्।
अनृतं नाभिधास्यामि चारित्रभ्रंशकारणम्।

रदनिका। ता जाव अज्जाधूदाए गदुअ णिवेदेम्हि।३। ॥ इति निष्क्रान्ता ॥

॥ प्रविश्य चेट्या सह चारुदत्तवधूः ॥

वधूः ॥ ससम्भ्रमम् ॥ अइ सच्चं अवरिक्खदसरीरो अज्जउत्तो अज्जमित्तेएण सह।४।

चेटी। भट्टिणि सच्चं किं तु जो सो वेस्साजणकेरको अलंकारओ सो अवहृदो।५।

॥ वधूर्मोहं नाटयति ॥

चेटी। समस्ससदु समस्ससदु अज्जाधूदा।६।

वधूः ॥ समाश्वस्य ॥ हञ्जे किं भणासि अवरिक्खदसरीरो अज्जउत्तो त्ति। वरं दाणिं सो सरीरेण परिक्खदो ण उण चारित्तेण। संपदं

उज्जइणीए जणो एव्वं मन्तइस्सदि दलिद्ददाए अज्जउत्तेण ज्जेव्व ईदिसं अकज्जं अनुचिट्ठिदं त्ति ॥ ऊर्ध्वमवलोक्य निःश्वस्य च ॥ भअवं कअन्त पोक्खरवत्तपडिदजलविन्दुचञ्चलेहिं कीलसि दलिद्दपुरिसभाअधेएहिं। इअं
१०९ च मे एक्का मादुघरलद्धा रअणावली चिट्ठदि। एदं पि अदिसोण्डीरदाए एसो अज्जउत्तो ण गेण्हिस्सदि। हञ्जे अज्जमित्तेअं दाव सद्दावेहि ।१।

चेटी। जं अज्जाधूदा आणवेदि ॥ विदूषकमुपगम्य ॥ अज्ज मित्तेअ धूदा दे सद्दावेदि ।२।

विदूषकः। कहिं सा ।३।

चेटी। एसा चिट्ठदि उवसप्प ।४।

विदूषकः ॥ उपसृत्य ॥ सोत्थि भोदीए ।५।

वधूः। अज्ज वन्दामि अज्ज पुरत्थिआमुहो होहि ।६।

११० विदूषकः। एस भोदि पुरत्थिआमुहो संवुत्तो म्हि ।७।

वधूः। अज्ज पडिच्छ इमं ।८।

विदूषकः। भोदि किं णेदं ।९।

वधूः। अहं क्खु रअणछट्ठिं उववसिदा आसि तहिं जधाविहवाणुसारेण बम्हणो पडिग्गाहिदव्वो सो अ ण पडिग्गाहिदो ता तस्स कदे पडिच्छ इमं रअणावलिअं ।१०।

विदूषकः ॥ गृहीत्वा ॥ सोत्थि गमिस्सं पिअवअस्सस्स णिवेदेमि ।११।

वधूः। अज्ज मित्तेअ मा खु तं लज्जावेहि ।१२। ॥ इति निष्क्रान्ता ॥

विदूषकः ॥ सविस्मयम् ॥ अहो से महाणुभावदा ।१३।

१११ चारुदत्तः। अये चिरयति मैत्रेयः। मा नाम वैक्लव्यादकार्यं कुर्यात्। मैत्रेय मैत्रेय।

विदूषकः ॥ उपसृत्य ॥ एसो म्हि गेण्ह एदं ।१। ॥ रत्नावलीं दर्शयति ॥

चारुदत्तः। किमेतत्।

विदूषकः। भो वअस्स जं दे सरिसदारसङ्ग्रहस्स फलं ।२।

चारुदत्तः। कथं ब्राह्मणी मामनुकम्पते। कष्टमिदानीमस्मि दरिद्रः।

आत्मभाग्यक्षतद्रव्यः स्त्रीद्रव्येणानुकम्पितः।
अर्थतः पुरुषो नारी या नारी सार्थतः पुमान्॥

अथवा नाहं दरिद्रः। यस्य मम।

विभवानुगता भार्या सुखदुःखसुहृद्भवान्।
सत्यं च न परिभ्रष्टं यद्दरिद्रेषु दुर्लभम्॥

मैत्रेय गच्छ रत्नावलीमादाय वसन्तसेनागृहं वक्तव्या च सा मद्वचनात्। यत्खल्वस्माभिः सुवर्णभाण्डमस्मदीयमिति कृत्वा विश्रम्भात् द्यूते हारितं तस्य कृते गृह्यतामियं रत्नावलीति।

विदूषकः। मा दाव अक्खाइदस्स अभुत्तस्स अप्पमुल्लस्स चोरेहिं अवहृदस्स कारणादो चदुस्समुद्दसारभूदा रअणावली दीअदि ।३।

चारुदत्तः। वयस्य मा मैवम्।

यं समालम्ब्य विश्वासं न्यासो ऽस्मासु तया कृतः।
तस्यैतन्महतो मूल्यं प्रत्ययस्यैव दीयते॥

तद्वयस्य अस्मच्छरीरस्पृष्टिकया शापितो ऽसि नैनामग्राहयित्वात्रागन्तव्यम्। वर्धमानक एताभिरिष्टिकाभिः सन्धिः क्रियतां सुसंहृतः शीघ्रम्। परिवादबहुलदोषान्नृपस्य रहान्परिहरामि। वयस्य मैत्रेय भवताप्यकृपणशौण्डीर्यमभिधातव्यम्।

विदूषकः। भो दलिद्दो किं अकिबिणं मन्तेदि ।४।

चारुदत्तः । अदरिद्रो ऽस्मि सखे । यस्य मम ॥ विभवानुगता भार्या ॥ इत्यादि पुनः पठति ॥ तद्गच्छतु भवान् । अहमपि कृतशौचः सन्ध्यामुपासे

॥ इति निष्क्रान्ताः सर्वे ॥

इति मृच्छकटिकायां
सन्धिच्छेदो नाम
तृतीयो ऽङ्कः ॥

चेटी। आणत्त म्हि अत्ताए अज्जुआए सआसं गन्तुं। एसा अज्जुआ चित्तफलणिसण्णदिट्ठी मदणिआए सह किम्पि मन्तअन्ती चिट्ठदि। ता जाव उवसप्पामि।१। ॥ इति परिक्रामति ॥

॥ ततः प्रविशति यथानिर्दिष्टा वसन्तसेना मदनिका च ॥

वसन्तसेना। हञ्जे मअणिए अवि सुसदिसी इअं चित्ताकिदी अज्जचारुदत्तस्स।२।

मदनिका। सुसदिसी।३।

वसन्तसेना। कधं तुमं जाणासि।४।

मदनिका। जेण अज्जुआए सुसणिद्धा दिट्ठी अणुलग्गा।५।

वसन्तसेना। हञ्जे किं वेसवासदक्खिणेण मअणिए एव्वं भणा ११४
सि।६।

मदनिका। अज्जुए किं जो ज्जेव्व जणो वेसे पडिवसदि सो ज्जेव्व अलिअदक्खिणो भोदि।७।

वसन्तसेना। हञ्जे णाणापुरिससङ्गेण वेसाजणो अलिअदक्खिणो भोदि।८।

मदनिका। जदो दाव अज्जुआए दिट्ठी इध अभिरमदि हिअअं च। तस्स कारणं किं पुच्छीअदि।९।

वसन्तसेना। हञ्जे सहीअणादो उवहसणीअदं रक्खामि।१०।

मदनिका। अज्जुए एव्वं णेदं। सहीजणचित्ताणुवत्ती अबलाजणो भोदि।११।

११५ प्रथमा चेटी ॥ उपसृत्य ॥ अज्जुए अत्ता आणवेदि। गह्निदावगुण्ठणं पक्खदुआरए सज्जं पवहणं ता गच्छेत्ति।१।

वसन्तसेना। हञ्जे किं अज्जचारुदत्तो मं णइस्सदि।२।

चेटी। अज्जुए जेण पवहणेण सह सुवण्णसदसाहस्सिओ अलङ्कारओ अणुप्पेसिदो।३।

वसन्तसेना। को उण सो।४।

चेटी। एसो ज्जेव्व राअसालो संठाणओ।५।

वसन्तसेना ॥ सक्रोधम् ॥ अविहि मा पुणो एव्वं भणिस्ससि।६।

चेटी। पसीददु पसीददु अज्जुआ सन्देसेण म्हि पेसिदा।७।

वसन्तसेना। अहं सन्देसस्स ज्जेव्व कुप्पामि।८।

११६ चेटी। ता किं अत्तअं विण्णविस्सं।९।

वसन्तसेना। एव्वं विण्णइदव्वा जइ मं जीअन्तीं इच्छसि ता एव्वं पुणो अत्ताए ण आणाविदव्वं।१०।

चेटी। जधा दे रोअदि।११।

॥ इति निष्क्रान्ता ॥ प्रविश्य

शर्विलकः।

दत्वा निशाया वचनीयदोषं
निद्रां च जित्वा नृपतेश्च रक्षान्।
स एष सूर्योदयमन्दरश्मिः
क्षपाक्षयाच्चन्द्र इवास्मि जातः ॥

अपिच।

यः कश्चित्त्वरितगतिर्निरीक्षते मां
सम्भ्रान्तं द्रुतमुपसर्पति स्थितं वा।
तं सर्वं तुलयति दूषितो ऽन्तरात्मा
स्वैर्दोषैर्भवति हि शङ्कितो मनुष्यः ॥

मया खलु मदनिकायाः कृते साहसमनुष्ठितम्।

परिजनकथासक्तः कश्चिन्नरः समुपेक्षितः
क्वचिदपि गृहं नारीनाथं निरीक्ष्य विवर्जितम्।
नरपतिबले पार्श्वायाते स्थितं गृहदारुवत्
व्यवसितशतैरेवंप्रायैर्निशा दिवसीकृता ॥

॥ इति परिक्रामति ॥

वसन्तसेना। हञ्जे इमं चित्तफलग्रं मम सग्रणीए ठाबिग्र ताल ११७
वेण्टग्रं गेण्हिग्र लहुं ग्राग्रच्छ।१।

मदनिका। जं ग्रज्जुग्रा ग्राणबेदि।२। ॥ इति फलकं गृहीत्वा निष्क्रान्ता ॥

शर्विलकः। इदं वसन्तसेनाया गृहं तद्यावत्प्रविशामि ॥ प्रविश्य ॥ क्व नु मयात्र मदनिका द्रष्टव्या ॥

॥ ततः प्रविशति तालवृन्तहस्ता मदनिका ॥

शर्विलकः। दृष्ट्वा ॥ ग्रये इयं मदनिका।

मदनमपि गुणैर्विशेषयन्ती
रतिरिव मूर्तिमती विभाति येयम्।
मम हृदयमनङ्गवह्निततं
भृशमिव चन्दनशीतलं करोति ॥

मदनिके मदनिके।

मदनिका ॥ दृष्ट्वा ॥ ग्रम्मो कधं सव्विलग्रो। सव्विलग्र साग्रदं दे कहिं तुमं।३।

शर्विलकः ॥ कथयिष्यामि ॥ इति सानुरागमन्योन्यं पश्यतः।

वसन्तसेना। चिरग्रदि मदणिग्रा ता कहिं णु क्खु सा ॥ गवाक्षकेण
दृष्ट्वा ॥ कधं एसा केणाबि पुरिसकेण सह मन्तग्रन्ती चिट्ठदि। जधा ग्र
ग्रदिसिणिद्धाए णिच्चलदिट्ठीए ग्रापिबन्ती बिग्र एदं णिज्काग्रदि। तधा ११८
तक्केमि एसो सो जणो एदं इच्छदि ग्रभुजिस्सं कादुं। ता रमदु रमदु

मा कस्सवि पीदिच्छेदो भोदु ण क्खु सद्दाबइस्सं ।१।

मदनिका। सव्विलअ कधेहि ।२।

॥ शर्विलकः साशङ्कं दिशो ऽवलोकयति ॥

मदनिका। सव्विलअ किं णेदं ससङ्को विअ लक्खीअसि ।३।

शर्विलकः। वक्ष्ये त्वां किञ्चिद्रहस्यं तद्विविक्तमिदम्।

मदनिका। अध इं ।४।

वसन्तसेना। कधं परमरहस्सं ता ण सुणिस्सं ।५।

११९ शर्विलकः। मदनिके किं वसन्तसेना मोक्ष्यति त्वां निष्क्रयेण।

वसन्तसेना। कधं मम संबन्धिणी कधा ता सुणिस्सं ।६।

मदनिका। सव्विलअ भणिदा मए अज्जुआ तदो भणादि जइ मम सच्छन्दो तदा विणा अत्थं सव्वं परिअणं अभुजिस्सं करइस्सं। अध सव्विलअ कुदो दे एत्तिओ विहवो जेण मं अज्जुआसआसादो मोआवइस्ससि ।७।

शर्विलकः।

दारिद्र्येणाभिभूतेन त्वत्स्नेहानुगतेन च।
अद्य रात्रौ मया भीरु त्वदर्थे साहसं कृतम् ॥

वसन्तसेना। पसण्णा से आकिदी साहसकम्मदाए उण उव्वेअणीआ ।८।

मदनिका। सव्विलअ इत्थीकल्लवत्तस्स कारणेण उहअं पि संसए विणिक्खित्तं ।९।

१२० शर्विलकः। किं किं।

मदनिका। सरीरं चारित्तं च ।१०।

शर्विलकः। अपण्डिते साहसे श्रीः प्रतिवसति।

मदनिका। सव्विलअ अखण्डिदचारित्तो सि ता ण क्खु दे मम कारणादो साहसं करेन्तेण अच्चन्तविरुद्धं आचरिदं ।११।

शर्विलकः ।

नो मुष्णाम्यबलां विभूषणवतीं फुल्लामिवाहं लतां
विप्रस्वं न हरामि काञ्चनमथो यज्ञार्थमभ्युद्धृतम् ।
धात्र्युत्सङ्गगतं हरामि न तथा बालं धनार्थी क्वचि
त्कार्याकार्यविचारिणी मम मतिश्चौर्ये ऽपि नित्यं स्थिता ॥

तद्विज्ञाप्यतां वसन्तसेना ।

अयं तव शरीरस्य प्रमाणादिव निर्मितः ।
अप्रकाश्यो ह्यलङ्कारो मत्स्नेहाद्धार्यतामिति ।

मदनिका । सव्विलअ अप्पकासो अलङ्कारओ अअं च जणो त्ति दुवे वि ण जुज्जदि ता उवणेहि दाव पेक्खामि एदं अलङ्कारअं ।१।

शर्विलकः । इदमलङ्करणम् ॥ इति साशङ्कं समर्पयति ॥ १२१

मदनिका ॥ निरूप्य ॥ सव्विलअ दिट्ठपुव्वो विअ अअं अलङ्कारओ ता भणेहि कुदो एसो ।२।

शर्विलकः । मदनिके किं तवानेन गृह्यताम् ।

मदनिकः ॥ सरोषम् ॥ जइ मे पच्चअं ण गच्छसि ता किंणिमित्तं मं णिक्किणासि ।३।

शर्विलकः । अयि प्रभाते मया श्रुतं श्रेष्ठिचत्वरे यथा सार्थवाहस्य चारुदत्तस्य ॥ इति वसन्तसेना मदनिका च मूर्छां नाटयतः ॥

शर्विलकः । मदनिके समाश्वसिहि समाश्वसिहि किमिदानीं त्वम् ।

विषादस्रस्तसर्वाङ्गी सम्भ्रमभ्रान्तलोचना ।
नीयमानाभुजिष्या त्वं कम्पसे नानुकम्पसे ॥

मदनिका ॥ समाश्वस्य ॥ साहसिअ ण हु तुए मम कारणादो इमं अकज्जं करेन्तेण तस्सिं गेहे को वि वावादिदो परिक्खदो वा ।४।

१२२ शर्विलकः । मदनिके भीते सुते न शर्विलकः प्रहरति । तन्मया न को ऽपि तत्र व्यापादितो नापि परिक्षतः ।

मदनिका । सच्चं ।१।

शर्विलकः । सत्यम् ।

वसन्तसेना ॥ संज्ञां लब्ध्वा ॥ अम्महे पच्चुज्जीविदम्हि ।२।

मदनिका । पिअं ।३।

शर्विलकः ॥ सेर्ष्यम् ॥ मदनिके किं नाम प्रियमिति ।

त्वत्स्नेहबद्धहृदयो हि करोम्यकार्यं
सद्वृत्तपूर्वपुरुषे ऽपि कुले प्रसूतः ।
रक्षामि मन्मथविपन्नगुणो ऽपि मानं
मित्रं च मां व्यपदिशस्यपरं च यासि ॥

॥ साकूतम् ॥

इह सर्वस्वफलिनः कुलपुत्रमहाद्रुमाः ।
निष्फलत्वमलं यान्ति वेश्याविहगभक्षिताः ॥
अयं च सुरतज्वालः कामाग्निः प्रणयेन्धनः ।
नराणां यत्र हूयन्ते यौवनानि धनानि च ॥

वसन्तसेना ॥ सस्मितम् ॥ अहो से अत्थाणे आवेओ ।४।

१२३ शर्विलकः ।

अपण्डितास्ते पुरुषा मता मे ये स्त्रीषु च श्रीषु च विश्वसन्ति ।
श्रियो हि कुर्वन्ति तथैव नार्यो भुजङ्गकन्यापरिसर्पणानि ॥
स्त्रीषु न रागः कार्यो रक्तं पुरुषं स्त्रियः परिभवन्ति ।
रक्तैव हि रन्तव्या विरक्तभावा तु हातव्या ॥

सुष्ठु खल्विदमुच्यते ।

एता हसन्ति च रुदन्ति च वित्तहेतो
र्विश्वासयन्ति पुरुषं न च विश्वसन्ति ।

तस्मान्नरेण कुलशीलसमन्वितेन
वेश्याः श्मशानसुमना इव वर्जनीयाः ॥

अपिच ।

समुद्रवीचीव चलस्वभावाः सन्ध्याभ्रलेखेव मुहूर्तरागाः ।
स्त्रियो कृतार्थाः पुरुषं निरर्थं निष्पीडितालक्तकवत्त्यजन्ति ॥

स्त्रियो नाम चपलाः ।

अन्यं मनुष्यं हृदयेन कृत्वा अन्यं ततो दृष्टिभिराह्वयन्ति ।
अन्यत्र मुञ्चन्ति मदप्रसेकमन्यं शरीरेण च कामयन्ते ॥

सूक्तं खलु कस्यापि ।

न पर्वताग्रे नलिनी प्ररोहति न गर्दभा वाजिधुरं वहन्ति ।
यवाः प्रकीर्णा न भवन्ति शालयो न वेशजाताः शुचयस्तथाङ्गनाः ॥

आः दुरात्मन् चारुदत्त हतक अयं न भवसि ॥ इति कतिचित्पदानि ददाति ॥

मदनिका ॥ अञ्चले गृहीत्वा ॥ अइ असंबद्धभासअ असंभावणीए कु १२४
प्पसि ।१।

शर्विलकः । कथमसम्भावनीयं नाम ।

मदनिका । एसो क्खु अलङ्कारओ अज्जुआकेरओ ।२।

शर्विलकः । ततः किम् ।

मदनिका । स च तस्स अज्जस्स हत्थे विणिक्खित्तो ।३।

शर्विलकः । किमर्थम् ।

मदनिका ॥ कर्णे ॥ एव्वं विअ ।४।

शर्विलकः ॥ सवैलक्ष्यम् ॥ भोः कष्टम् ।

छायार्थी ग्रीष्मसन्तप्तो यामेवाहं समाश्रितः ।
अजानता मया सैव पत्रैः शाखा वियोजिता ॥

वसन्तसेना । कधं एसो बि सन्तप्पदि जेव्व । ता अआणन्तेण
एदिणा एव्वमणुचिट्ठिदं ।५।

१२५ शर्विलकः। मदनिके किमिदानीं युक्तम्।

मदनिका। एत्थ तुमं जेव्व पण्डिओ।१।

शर्विलकः। नैवम्। पश्य।

स्त्रियो हि नाम खल्वेता निसर्गादेव पण्डिताः।
पुरुषाणां तु पाण्डित्यं शास्त्रैणैवोपदिश्यते॥

मदनिका। सव्विलअ जइ मम वअणं सुणीअदि ता तस्स जेव्व महाणुभावस्स पडिणिज्जादेहि।२।

शर्विलकः। मदनिके यद्यसौ राजकुले मां कथयिष्यति।

मदनिका। ण चन्दादो आदबो होदि।३।

वसन्तसेना। साहु मअणिए साहु।४।

शर्विलकः। मदनिके।

न खलु मम विषादः साहसे ऽस्मिन्भयं वा
कथयसि हि किमर्थं तस्य साधोर्गुणांस्त्वम्।
जनयति मम चेदं कुत्सितं कर्म लज्जां
नृपतिरिह शठानां मादृशां किं नु कुर्यात्॥

तथापि नीतिविरुद्धमेतदन्य उपायश्चिन्त्यताम्।

१२६ मदनिका। एसो अअं अवरो उबाओ।५।

वसन्तसेना। को क्खु अवरो उबाओ हुविस्सदि।६।

मदनिका। तस्स ज्जेव्व अज्जस्स केरको भविअ एदं अलङ्कारअं अज्जुआए उबणेहि।७।

शर्विलकः। एवं कृते किं भवति।

मदनिका। तुमं दाव अचोरो सो बि अज्जो अरिणो अज्जुआए सकं अलङ्कारअं उबगदं भोदि।८।

शर्विलकः। नन्वतिसाहसमेतत्।

मदनिका। अइ उबणेहि अण्णधा अदिसाहसं।९।

वसन्तसेना। साहु मदणिए साहु। अभुजिस्साए विअ मन्तिदं।१।

शर्विलकः।

मयाप्ता महती बुद्धिर्भवतीमनुगच्छता।
निशायां नष्टचन्द्रायां दुर्लभो मार्गदर्शकः॥

मदनिका। तेण हि तुमं इमस्सिं कामदेवगेहे मुहुत्तअं चिट्ठ १२७
जाव अज्जुआए तुह आगमणं णिवेदेमि।२।

शर्विलकः। एवं भवतु।

मदनिका ॥ उपसृत्य ॥ अज्जुए एसो क्खु अज्जचारुदत्तस्स सआसादो बम्हणो आअदो।३।

वसन्तसेना। हञ्जे तस्स केरओ त्ति कधं तुमं जाणासि।४।

मदनिका। अज्जुए अत्तकेरअं पि ण आणामि।५।

वसन्तसेना ॥ स्वगतं सशिरःकम्पं विहस्य ॥ जुज्जदि ॥ प्रकाशं ॥ पविसदु।६।

मदनिका। जं अज्जुआ आणावेदि ॥ उपगम्य ॥ पविसदु सव्विलओ।७।

शर्विलकः ॥ उपसृत्य सवैलक्ष्यम् ॥ स्वस्ति भवत्यै।

वसन्तसेना। अज्ज वन्दामि समाविसदु अज्जो।८। १२८

शर्विलकः। सार्थवाहस्त्वां विज्ञापयति। जर्जरत्वाद्गृहस्य दुरक्ष्यमिदं भाण्डम्। तद्गृह्यताम् ॥ इति मदनिकायाः समर्प्य प्रस्थितः ॥

वसन्तसेना। अज्ज ममावि दाव पडिसन्देसं तहिं णेदु अज्जो।९।

शर्विलकः ॥ स्वगतम् ॥ कस्तत्र यास्यति ॥ प्रकाशम् ॥ कः प्रतिसन्देशः।

वसन्तसेना। पडिच्छदु अज्जो मदणिअं।१०।

शर्विलकः। भवति न खल्ववगच्छामि।

वसन्तसेना। अहमवगच्छामि।

शर्विलकः। कथमिव।

वसन्तसेना। अहं अज्जचारुदत्तेण भणिदा जो इमं अलङ्कारअं समप्पइस्सदि तस्स तुए मदणिआ दादव्वा। ता सो ज्जेव्व एदं देदि त्ति एव्वं अज्जेण अवगच्छिदव्वं।१।

१२१ शर्विलकः ॥ स्वगतम् ॥ विज्ञातो ऽहमनया ॥ प्रकाशम् ॥ साध्वार्य चारुदत्त साधु।

गुणेष्वेव हि कर्तव्यः प्रयत्नः पुरुषैः सदा।
गुणयुक्तो दरिद्रो ऽपि नेश्वरैरगुणैः समः॥

अपि च।

गुणेषु यत्नः पुरुषेण कार्यो न किञ्चिदप्राप्यतमं गुणानाम्।
गुणप्रकर्षादुडुपेन शम्भोरलंघ्यमुल्लङ्घितमुत्तमाङ्गम्॥

वसन्तसेना। को एत्थ पवहणिओ।२।

प्रविश्य सप्रवहणः

चेटः। अज्जुए सज्जं पवहणं।३।

वसन्तसेना। हञ्जे मअणिए सुदिट्ठं करेहि मं दिण्णासि आरुह पवहणं सुमरेसि मं।४।

मदनिका ॥ रुदन्ती ॥ परिच्चत्तम्हि अज्जुआए।५। ॥ इति पादयोः पतति ॥

१३० वसन्तसेना। सम्पदं तुमं ज्जेव्व वन्दणीआ संवुत्ता ता गच्छ आरुह पवहणं सुमरेसि मं।६।

शर्विलकः। स्वस्ति भवत्यै मदनिके।

सुदृष्टः क्रियतामेष शिरसा वन्द्यतां जनः।
यत्र ते दुर्लभं प्राप्तं वधूशब्दावगुण्ठनम्॥

॥ इति मदनिकया सह प्रवहणमारुह्य गन्तुं प्रवृत्तः ॥

॥ नेपथ्ये ॥ कः को ऽत्र भोः राष्ट्रियः समाज्ञापयति। एष खल्वार्यको गोपालदारको राजा भविष्यतीति सिद्धादेशप्रत्ययपरित्रस्तेन राज्ञा पालकेन घोषादानीय घोरे बन्धनागारे बद्धः। ततः स्वेषु स्वेषु स्थां

नेषु अप्रमत्तैर्भवद्भिर्भवितव्यम् ।

शर्विलकः ॥ आकर्ण्य ॥ कथं राज्ञा पालकेन प्रियसुहृदार्यको मे बद्धः । कलत्रवांश्चास्मि संवृत्तः । आः कष्टम् । अथवा ।

द्वयमिदमतीव लोके प्रियं नराणां सुहृच्च वनिता च ।
सम्प्रति तु सुन्दरीणां शतादपि सुहृद्विशिष्टतमः ॥

भवत्ववतरामि ॥ इत्यवतरति ॥

मदनिका ॥ साञ्जलिं बद्ध्वा ॥ एव्वं ऐदं ता परं ऐदु मं अज्जउत्तो समीवं गुरुअणाणं ।१।

शर्विलकः । साधु प्रिये साधु अस्मच्चित्तसदृशमभिहितम् ।१३१ ॥ चेटमुद्दिश्य ॥ अयि जानासि रेभिलस्य सार्थवाहस्य गृहम् ।

चेटः । अधइं ।२।

शर्विलकः । तत्र प्रापय प्रियतमाम् ।

चेटः । जं अज्जो आणवेदि ।३।

मदनिका । जधा अज्जउत्तो भणादि । अप्पमत्तेण दाव अज्जउत्तेण होदव्वं ।४। ॥ इति निष्क्रान्ता ॥

शर्विलकः । अहमिदानीम् ।

ज्ञातीन्विटान्स्वभुजविक्रमलब्धवर्णा
न्राजापमानकुपितांश्च नरेन्द्रभृत्यान् ।
उत्तेजयामि सुहृदः परिमोक्षणाय
यौगन्धरायण इवोदयनस्य राज्ञः ॥

अपिच ।

प्रियसुहृदमकारणे गृहीतं
रिपुभिरसाधुभिराहितात्मशङ्कैः ।
सरभसमभिपत्य मोचयामि
स्थितमिव राहुमुखे शशाङ्कबिम्बम् ॥ ॥ इति निष्क्रान्तः ॥

१२२ ॥ प्रविश्य ॥

चेटी। अज्जुए दिट्ठिआ वड्ढसि अज्जचारुदत्तस्स सआसादो बम्हणो आअदो।१।

वसन्तसेना। अहो रमणीअदा अज्जदिवसस्स। ता हञ्जे सादरं बन्धुलेण समं पवेसेहि णं।२।

चेटी। जं अज्जुआ आणवेदि।३। ॥ इति निष्क्रान्ता ॥

॥ विदूषको बन्धुलेन सह प्रविष्टः ॥

विदूषकः। ही ही भो तवच्चरणकिलेसविणिज्जिदेण रक्खसराआ रावणो पुप्फकेण विमाणेण गच्छदि अहं उण बम्हणो अकिदतवच्चरणकिलेसो वि णअरणारीजणेण गच्छामि।४।

चेटी। पेक्खदु अज्जो अम्हकेरकं गेहदुआरअं।५।

१२३ विदूषकः ॥ विलोक्य सविस्मयम् ॥ अहो सलिलसित्तमज्जिदकिदहरिदोवलेवणस्स विविधकुसुमचित्तलिदभूमिआभाअस्स गअणतलालोअणकोदूहलदूरुण्णामिदसीसस्स दोलायमाणावलम्बिदेरावणहत्थब्भमाबिदमल्लिआदामगुणालङ्किदस्स समुच्छिददन्तिदन्ततोरणावभासिदस्स महारअणोवराअसोहिणा पवणबलन्दोलणाललन्तचञ्चलग्गहत्थेण इदो एहि त्ति वाहरन्तेण विअ मं सोहग्गपडाआणिवहेणोबसोहिदस्स तोरणधरणक्खम्भवेदिआणिक्खित्तसमुल्लसन्तहरिदचूदपल्लवललामफलिहमङ्गलकलसाभिरामोहअबासस्स महासुरवक्खत्थलदुब्भेज्जवज्जणिरन्तरपडिबद्धकणअकबाडस्स दुग्गअजणमणोरहाआसअरस्स वसन्तसेणाभवणदुआरअस्स सस्सिरीअदा। जं सच्चं मज्झत्थस्स वि जणस्स बला दिट्ठिं आआरेदि।६।

१२४ चेटी। इमं पढमं पओट्ठं पविसदु अज्जो।७।

विदूषकः ॥ प्रविश्य ॥ ही ही भो ससिसङ्खमुणालसच्छाहाओ विणिहिदचुण्णमुट्ठिपण्डुराओ विविहरअणपडिबद्धकञ्चणसोबाणसोहि

दाओ पासादवत्तीओ ओलम्बिदमुत्तादामेहिं फलिहवादाअणमुहअन्दे
हिं णिज्झाअन्ति विअ उज्जइणिं। सोत्तिओ विअ सुहोबविट्ठो णिद्दा
अदि दोवारिओ। सदहिणा कलमोदणेण पलोहिदा ण भक्खन्ति
वाअसा बलिं सुधासवण्णदाए। आदेसेदु भोदी।१।

चेटी। एदु एदु अज्जो इमं दुदिअं पओट्ठं पविसदु अज्जो।२। १२५

विदूषकः ॥ प्रविश्यावलोक्य च ॥ ही ही भो इध बि दुदिए पओट्ठे
पज्जत्तोबणीदजवसबुसकवलसुपुट्ठा तेल्लब्भङ्गिदविसाणा बद्धा पवह
णबइल्ला। अअं अण्णदरो अवमाणिदो विअ कुलीणो दीहं णीससदि
सेरिहो। इदो अ अबणीदजुज्झस्स मल्लस्स विअ मद्दीअदि गीवा मे
सस्स। इदो इदो अबराणं अस्साणं केसकप्पणा करीअदि। अअं अबरो
पाडच्चरो विअ दढबद्धो मन्दुराए साहामिओ ॥ अन्यतो ऽवलोक्य ॥ इदो
अ कूरत्थिअतेल्लमिस्सं पिण्डं हत्थी पडिच्छाबीअदि मेत्थपुरिसेहिं।
आदेसेदु भोदी।३।

चेटी। एदु एदु अज्जो इमं तइअं पओट्ठं पविसदु अज्जो।४।

विदूषकः ॥ प्रविश्य दृष्ट्वा च॥ ही ही भो इध बि तइए पओट्ठे १२६
इमाइं दाव कुलउत्तजणोबवेसणणिमित्तं विरइदाइं आसणाइं। अद्ध
वाचिदो पासअपीठे चिट्ठदि पोत्थओ। साहीणमणिमअसारिआस
हिदो पासअपीठो। इमे अ अबरे मअणसन्धिविग्गहचदुरा विविह
वण्णआविलित्तचित्तफलअग्गहत्था इदो तदो परिब्भमन्ति गणिआ
वुड्ढविडा अ। आदेसेदु भोदी।५।

चेटी। एदु एदु अज्जो इमं चउट्ठं पओट्ठं पविसदु अज्जो।६।

विदूषकः ॥ प्रविश्यावलोक्य च ॥ ही ही भो इध बि चउट्ठे पओट्ठे
जुवदिकरताडिदा जलधरा विअ गम्भीरं णदन्ति मुरआ कीणपुण्णाओ
विअ गअणादो तारआओ णिबडन्ति कंसतालआ मङ्कअरविरुअमङ्कुरं
वज्जदि वंसो। इअं अबरा ईसापणअकुबिदकामिणी विअ अङ्कारोबिदा १२७

करुरुहपरामरिसेण सारिज्जदि वीणा। इमाओ अवराओ कुसुमरसमत्ताओ विअ महुअरीओ अदिमहुरं पगीदाओ गणिआदारिआओ णच्चीअदि णट्टअं पठीअदि ससिङ्गारअं। ओवग्गिदा गवक्खेसु वादं गेण्हन्ति सलिलगग्गरीओ। आदेसेदु भोदी।१।

चेटी। एदु एदु अज्जो इमं पञ्चमं पओट्ठं पविसदु अज्जो।२।

विदूपकः ॥ प्रविश्य दृष्ट्वा च ॥ ही ही भो इध बि पञ्चमे पओट्ठे अअं दलिद्दजणलोहुप्पादणअरो आहरइ उबाचिदो हिंगुतेल्लगन्धो। विविहसुरहिधूमुग्गारेहिं णिच्चसन्ताबिज्जमाणं णीससदि विअ महा
१२८ णसं दुआरमुहेहिं। अधिअं उआसाबेदि मं साहिज्जमाणबहुविहभक्खभोअणगन्धो। अअं अबरो पडच्चरं विअ पोट्टिं धोअदि रूपिदारओ। बहुविहाहारविआरं उबसाहेदि सूबआरो। वज्झन्ति मोदआ पच्चन्ति पूबआ ॥ आत्मगतम् ॥ अवि दाणिं इह वड्डिअं भुञ्जसु त्ति पादोदअं लहिस्सं ॥ अन्यतो ऽवलोक्य॥ इदो गन्धव्वसुरगणेहिं विअ विविहालङ्कारसोहिदेहिं गणिआजणेहिं बन्धुलेहिं अ जं सच्चं सग्गीअदि एदं गेहं। भो के तुम्हे बन्धुला णाम।३।

बन्धुलाः। वयं खलु।

परगृहललिताः परान्नपुष्टाः
परपुरुषैर्जनिताः पराङ्गनासु।
परधननिरता गुणेष्ववाच्या
गजकलभा इव बन्धुला ललामः॥

१३१ विदूषकः। आदेसेदु भोदी।४।

चेटी। एदु एदु अज्जो इमं छट्ठं पओट्ठं पविसदु अज्जो।५।

विदूषकः ॥ प्रविश्यावलोक्य च ॥ ही ही भो इध बि छट्ठे पओट्ठे अमुं दाव सुवण्णरअणाणं कम्म तोरणाइं णीलरअणविणिक्खित्ताइं इन्दाउहट्ठाणं विअ दरिसअन्ति। वेरुलिअमोत्तिअपबालपुप्फराअइन्द

णीलकक्केरअपउमराअमरगअपक्कदिआइं रअणविसेसाइं अण्णोण्णं विआ
रेन्ति सिप्पिणो। बज्झन्ति जादरूवेहिं माणिक्काइं घडिज्जन्ति सुवण्णाल
ङ्कारा रत्तसुत्तेण गत्थीअन्ति मोत्तिआभरणाइं घसीअन्ति धीरं वेडुरि
आइं छेदीअन्ति सङ्खआ साणिज्जन्ति पबालआ सुक्खबीअन्ति ओल-
म्बिद कुङ्कुमपत्थरा। सालिज्जदि सेलज्जअं विस्साणीअदि चन्दणरसो सज्जोई
अन्ति गन्धजुत्तीओ। दीअदि गणिआकामुआणं सकप्पूरं तम्बोलं अव
लोईअदि सकडक्खअं पअट्टदि हासो पिबीअदि अणवरअं ससिक्कारं
मदिरा। इमे चेडा इमा चेडिआओ इमे अवरे अवधीरिदपुत्तदारवि
त्ता मणुस्सा आसवकरआ पीदमदिरेहिं गणिआजणेहिं जे मुक्का ते
पिअन्ति। आदेसेदु भोदी।१।

चेटी। एदु एदु अज्जो इमं सत्तमं पओट्ठं पविसदु अज्जो।२। १४०

विदूषकः ॥ प्रविश्यावलोक्य च ॥ ही ही भो इध बि सत्तमे पओट्ठे
सुसिलिट्ठविहङ्गवाडीसुहणिसण्णाइं अण्णोण्णचुम्बणपराइं सुहमणुभव
न्ति पारावअमिहुणाइं। दहिभत्तपूरिदोदरो विअ बम्हणो सुत्तं पठदि
पञ्जरसुओ। इअं अवरा सामिसम्माणणालद्धप्पसरा विअ घरदासी अधिअं
कुरुकुराअदि मअणसारिआ अणेअफलरसासादपट्टुकण्ठा कुम्भदासी
विअ कूअदि परपुट्ठा आलम्बिदा णागदन्तेसु पञ्जरपरम्पराओ जोधीअ १४१
न्ति लावआ आलबीअन्ति पञ्जरकबिञ्जला पेसीअन्ति पञ्जरकबोदआ।
इदो तदो विविहमणिचित्तलिदो विअ अअं सहरिसं णच्चन्तो रवि
किरणसन्तत्तं पक्खुक्खेबेहिं विधुवेदि विअ पासादं घरमोरो ॥ अन्यतो ऽव
लोक्य ॥ इदो पिण्डीकिदा विअ चन्दपादा पदगदिं सिक्खन्ता विअ का
मिणीणं पच्छादो परिब्भमन्ति राअहंसमिहुणा। एदे अवरे वुड्ढमह
त्तका विअ इदो तदो सञ्चरन्ति घरसारसा। ही ही भो पसारणअं
किदं गणिआए णाणापक्खिसमूहेहिं। जं सच्चं क्खु णन्दणवणं विअ
मे गणिआघरं पडिभादि। आदेसेदु भोदी।३।

१४२ चेटी। एदु एदु अज्जो इमं अट्ठमं पओट्ठं पविसदु अज्जो।१।

विदूषकः ॥ प्रविश्यावलोक्य च ॥ भोदि को एसो पट्टपावारअपाउदो अधिअदरं अच्चब्भुदपुणरुत्तालङ्कारालङ्किदो अङ्गभङ्गेहिं परिक्खलन्तो इदो तदो परिब्भमदि।२।

चेटी। अज्ज एसो अज्जुआए भादा भोदि।३।

विदूषकः। केत्तिअं तवच्चरणं कदुअ वसन्तसेणाए भादा भोदि। अधवा। मा दाव जदि वि एसो उज्जलो सिणिद्धो अ सुअन्धो अ तह वि मसाणवीधीए जादो विअ चम्पअरुक्खो अणहिगमणीओ लोअस्स ॥ अन्यतो ऽवलोक्य ॥ भोदि एसा उण का फुल्लपावारअपाउदा उवाणहजुअलणिक्खित्ततेल्लचिक्कणेहिं पादेहिं उच्चासणे उवविट्ठा चिट्ठदि।४।

१४३ चेटी। अज्ज एसा खु अम्हाणं अज्जुआए अत्तिआ।५।

विदूषकः। अहो से करट्टडाइणीए पोट्टवित्थारो। ता किं एदं पवेसिअ महादेवं विअ दुआरसोहा इह घरे णिम्मिदा।६।

चेटी। हदास मा एव्वं उवहस अम्हाणं अत्तिकं। एसा खु चाउत्थिएण पीडीअदि।७।

विदूषकः ॥ सपरिहासम् ॥ भअवं चाउत्थिअ एदिणा उवआरेण मं पि बम्हणं आलोएहि।८।

चेटी। हदास मरिस्ससि।९।

१४४ विदूषकः ॥ सपरिहासम् ॥ आ दासीए धीए वरं ईदिसो सूणपीणोदरो मुदो जेव्व।

सीधुसुरासवमत्तिआ एआवत्थं गदा हि अत्तिआ।
जइ मरइ एत्थ अत्तिआ भोदि सिआलसहस्सजत्तिआ ॥

भोदि किं तुम्हाणं जाणवत्ता वहन्ति।१०।

चेटी। अज्ज णहि णहि।११।

विदूषकः। किं वा एत्थ पुच्छीअदि तुम्हाणं क्खु पेम्मजले

मअणसमुद्दे त्थणिअम्बजहणा एव जाणबत्ता मच्छाहरणा। एवं वसन्तसेणाए बहुवुत्तन्तं अट्ठपओट्ठं भवणं पेक्खिअ जं सच्चं जाणामि एकत्थं विअ तिविट्ठअं दिट्ठं पसंसिदुं णत्थि मे वाआविहवो। किं दाव गणिआहरो आदु कुवेरभवणपडिच्छन्दो त्ति। कहिं तुम्हाणं अज्जुआ ।१।

चेटी। अज्ज एसा रुक्खवाडिआए चिट्ठदि ता पविसदु अज्जो ।२। १४५

विदूषकः ॥ प्रविश्य दृष्ट्वा च ॥ ही ही भो। अहो रुक्खवाडिआए सस्सिरीअदा अच्छरीअकुसुमपत्थारारोविदाणेअपादबा णिरन्तरपादवतलणिम्मिदा जुअदिजणजहणपमाणा पट्टदोला सुवण्णजूहिआसेफालिआमालईमल्लिआणोमालिआकुरवआदिमोत्तअपडिदकुसुमेहिं सअं णिवडिदेहिं जं सच्चं लहुइं करेदि विअ णन्दणवणस्स सस्सिरीअदं। ॥ अन्यतो ऽवलोक्य ॥ इदो अ उदअन्तसूरसमप्पहेहिं कमलरत्तोप्पलेहिं संकाअदि विअ दीहिआ।

एसो असोअवुच्छो णवणिग्गअकुसुमपल्लवो भादि।
सुहडो व्व समरमज्झे घणलोहिदपङ्कचच्चिक्को ॥

भोदि ता कहिं तुम्हाणं अज्जुआ ।३।

चेटी। अज्ज ओणमेहि दिट्ठिं पेक्ख अज्जुअं ।४। १४६

विदूषकः ॥ दृष्ट्वा उपसृत्य ॥ सोत्थि भोदीए ।५।

वसन्तसेना। अये मैत्रेयः ॥ उत्थाय ॥ स्वागतमिदमासनमत्रोपविश्यताम्।

विदूषकः। उवविसदु भोदी ।६। ॥ उभावुपविशतः ॥

वसन्तसेना। अपि कुशलं सार्थवाहपुत्रस्य।

विदूषकः। भोदि कुसलं ।७।

वसन्तसेना। आर्य मैत्रेय अपीदानीम्।

गुणप्रबालं विनयप्रशाखं विश्रम्भमूलं महनीयपुष्पम्।

तं साधुवृत्तं स्वगुणैः फलाढ्यं सुहृद्विहङ्गाः सुखमाश्रयन्ति ॥

विदूषकः ॥ स्वगतम् ॥ सुट्ठु उवलक्खिदं दुट्ठविलासिणीए ॥ प्रकाशम् ॥ अधइं ।१।

वसन्तसेना। अये किमागमनप्रयोजनम्।

१४७ विदूषकः। सुणादु भोदी। तत्तभवं चारुदत्तो सीसेण अञ्जलिं कडुअ भोदिं विण्णवेदि।२।

वसन्तसेना ॥ अञ्जलिं बद्ध्वा ॥ किमाज्ञापयति।

विदूषकः। मए तं सुवण्णभण्डअं वीसम्भादो अत्तणकेरकेत्ति कडुअ जूदे हारिदं सो अ सहिओ राआवत्थआरी ण आणीअदि कहिं गदो त्ति।३।

चेटी। अज्जुए दिट्ठिआ वड्ढसि अज्जो जूदिअरो संवुत्तो।४।

वसन्तसेना ॥ स्वगतम् ॥ कधं सोण्डीरदाए चोरेण अवहृदं पि जूदे हारिदो त्ति भणादि। अदो जेव्व कामीअदि।५।

विदूषकः। ता तस्स कारणादो गेण्हदु भोदी इमं रअणावलिं।६।

१४८ वसन्तसेना ॥ आत्मगतम् ॥ किं दंसेमि तं अलङ्कारअं। अधवा ण दाव।७।

विदूषकः। किं दाव ण गेण्हदि भोदी इमं रअणावलिं।८।

वसन्तसेना ॥ विहस्य सखीमुखं पश्यन्ती ॥ मित्तेअ कधं ण गेण्हिस्सं रअणावलिं ॥ इति गृहीत्वा पार्श्वे स्थापयति स्वगतम् ॥ कधं क्खीणकुसुमादो बि सहआरपादबादो मअरन्दविन्दओ णिबडन्ति ॥ प्रकाशम् ॥ अज्ज विण्णवेहि तं जूदिअरं मम वअणेण अज्जचारुदत्तं। अहं पि पदोसे अज्जं पेक्खिदुं आअच्छामि त्ति।९।

विदूषकः ॥ स्वगतम् ॥ किं अण्णं तहिं गदुअ गेण्हिस्सदि ॥ प्रकाशम् ॥ भोदि भणामि ॥ स्वगतम् ॥ णिअत्तीअदु इमादो गणिआपसङ्गा

दो त्ति ।१। ॥ इति निष्क्रान्तः ॥

वसन्तसेना । हञ्जे गेण्ह एदं अलङ्कारअं चारुदत्तं अहिरमिदुं १४१
गच्छम्ह ।२।

चेटी । अज्जुए पेक्ख पेक्ख उण्णमदि अकालदुद्दिणं ।३।

वसन्तसेना ।

उदयन्तु नाम मेघा भवतु निशा वर्षमविरतं पततु ।
गणयामि नैव सर्वं दयिताभिमुखेन हृदयेन ॥

हञ्जे दारं गेण्हिअ लहु लहु आअच्छ ।४।

॥ इति निष्क्रान्ताः सर्वे ॥

इति मृच्छकटिकायां
मदनिकाशर्विलको नाम
चतुर्थो ऽङ्कः ॥

॥ ततः प्रविशति आसनस्थः सोत्कण्ठश्चारुदत्तः ॥

चारुदत्तः ॥ ऊर्ध्वमवलोक्य ॥ उन्नमत्यकालदुर्दिनम् । यदेतत् ।

आलोकितं गृहशिखण्डिभिरुत्कलापै
हंसैर्यियासुभिरपाकृतमुन्मनस्कैः ।
आकालिकं सपदि दुर्दिनमन्तरिक्ष
मुत्कण्ठितस्य हृदयं च समं रुणद्धि ॥

अपिच । मेघो जलार्द्रमहिषोदरभृङ्गनीलो
विद्युत्प्रभारचितपीतपटोत्तरीयः ।
आभाति संहतबलाकगृहीतशङ्खः
खं केशवोऽपर इवाक्रमितुं प्रवृत्तः ॥

अपिच ।

केशवगात्रश्यामः कुटिलबलाकावलीरचितशङ्खः ।
विद्युद्गुणकौशेयश्चक्रधर इवोन्नतो मेघः ॥

एता निषिक्तरजतद्रवसन्निकाशा
धारा जवेन पतिता जलदोदरेभ्यः ।
विद्युत्प्रदीपशिखया क्षणनष्टदृष्टा
श्छिन्ना इवाम्बरपटस्य दशाः पतन्ति ॥

१५१ संसक्तैरिव चक्रवाकमिथुनैर्हंसैः प्रडीनैरिव
व्याविद्धैरिव मीनचक्रमकरैर्हर्म्यैरिव प्रोच्छ्रितैः ।
तैस्तैराकृतिविस्तरैरनुगतैर्मेघैः समभ्युन्नतैः
पत्रच्छेद्यमिवेह भाति गगणं विश्लेषितं वायुना ॥

एतत्तद्धृतराष्ट्रचक्रसदृशं मेघान्धकारं नभो
हृष्टो गर्जति चातिदर्पितबलो दुर्योधनो वा शिखी ।
अक्षद्यूतजितो युधिष्ठिर इवाध्वानं गतः कोकिलो
हंसाः सम्प्रति पाण्डवा इव वनादज्ञातचर्यां गताः ॥

॥ विचिन्त्य ॥ चिरः खलु कालो मैत्रेयस्य वसन्तसेनायाः सकाशं गतस्य नाद्याप्यागच्छति ।

प्रविश्य

विदूषकः । अहो गणिआए लोभो अ दक्खिणदा अ जदो अण्णा कधा बि ण कदा अणार्अरेण जेव्व अभणिअ किंचि एअमेअ गहिदा रअणावली । एत्तिआए रिद्धीए तए एव्वं पि भणिदो जं अज्ज मित्तेअ वीसमीअदु गल्लक्केण पाणिअं पि पिबीअदु त्ति । ता मा दाव दासीए धीआए गणिआए मुहं पि पेक्खिस्सं ॥ सनिर्वेदम् ॥ सुट्ठु क्खु वुच्चदि अकन्दसमुत्थिदा पउमिणी अवञ्चओ बाणिओ अचोरो सुवण्णआरो अ कलहो गामसमागमो अलुद्धा गणिअत्ति दुक्करं एदे सम्भावीअन्ति । ता पिअवअस्सं गदुअ इमादो गणिआपसङ्गादो णिवत्ताबेमि ॥ परिक्रम्य दृष्ट्वा ॥ कधं पिअवअस्सो रुक्खवाडिआए उबविट्ठो चिट्ठदि ता जाव उबसप्पामि ॥ उपसृत्य ॥ सोत्थि भवदे वड्ढदु भवं ।१।

चारुदत्तः ॥ विलोक्य ॥ अये कथं सुहृन्मैत्रेयः । वयस्य स्वागतमास्यताम् । १॥२

विदूषकः । उबविट्ठो म्हि ।२।

चारुदत्तः । वयस्य कथय तत्कार्यम् ।

विदूषकः । तं क्खु कज्जं विणट्ठं ।३।

चारुदत्तः । किं तया न गृहीता रत्नावली ।

विदूषकः । कुदो अम्हाणं एत्तिअं भाअधेअं णवणलिणकोमलं हत्थं मत्थए कदुअ पडिच्छिआ ।४।

चारुदत्तः। तत्किं ब्रवीषि नष्टमिति।

११३ विदूषकः। भो कधं विणट्ठं जं अभुत्तस्स अपीदस्स चोरेहिं अवहृदस्स अप्पमुल्लस्स सुवण्णभण्डअस्स कारणादो चदुस्समुद्दसारभूदा रअणावली हारिदा।१।

चारुदत्तः। वयस्य मा मैवम्। पश्य।

यं समालम्ब्य विश्वासं न्यासो ऽस्मासु तया कृतः।
तस्यैतन्महतो मूल्यं प्रत्ययस्यैव दीयते॥

विदूषकः। भो वअस्स एदं पि मे दुदिअं सन्तावकारणं जं सहीअणदिण्णसण्णाए पडन्तोवारिदं मुहं कदुअ अहं उवहसिदो। ता अहं बम्हणो भविअ दाणिं भवन्तं सीसेण पडिअ विण्णवेमि। णिवत्तीअदु अप्पा इमादो बहुपच्चवाआदो गणिआपसङ्गादो। गणिआ णाम पादुअन्तरप्पविट्ठा लेट्ठुआ विअ दुक्खेण णिराकरीअदि। अवि अ भो वअस्स गणिआ हत्थी काअत्थओ भिक्खू चाटो रासहो जहिं एदे णिवसन्ति तहिं दुट्ठा वि ण जाअन्ति।२।

११४ चारुदत्तः। वयस्य अलमिदानीं सर्वं परिवादमुक्त्वा। अवस्थयैवास्मि निवारितः। पश्य।

वेगं करोति तुरगस्त्वरितं प्रयातुं
प्राणव्ययान्न चरणास्तु तथा वहन्ति।
सर्वत्र यान्ति पुरुषस्य चलाः स्वभावाः
खिन्नास्ततो हृदयमेव पुनर्विशन्ति॥

अपिच। वयस्य।

यस्यार्थास्तस्य सा कान्ता धनहार्यो ह्यसौ जनः।
॥ स्वगतम् ॥ न गुणहार्यो ह्यसौ जनः ॥ प्रकाशम् ॥
वयमर्थैः परित्यक्ता ननु त्यक्तैव सा मया॥

विदूषकः। ॥ अधो ऽवलोक्य स्वगतम् ॥ जधा एसो उड्ढं पेक्खिअ दीहं

णीससदि तधा तक्केमि मए बि णिवारिअन्तस्स अधिअदरं वड्ढिदा से उक्कण्ठा। ता सुट्ठु क्खु एव्वं वुच्चदि कामो वामो त्ति ॥ प्रकाशम् ॥
भो वअस्स भणिदं च ताए भणेहि चारुदत्तं अज्ज पओसे मए एत्थ १५५
आगन्तव्वं त्ति। ता तक्केमि रअणावलीए अपरितुट्ठा अवरं मग्गिदुं आअच्छदि त्ति।१।

चारुदत्तः। वयस्य आगच्छतु परितुष्टा यास्यति।

प्रविश्य

चेटः। अवेध माणहे।

जधा जधा वश्शदि अब्भखण्डे तधा तधा तिम्मदि पुट्ठिचम्मे।
जधा जधा लग्गदि शीदवादे तधा तधा वेबदि मे हडक्के॥।२।

॥ प्रहस्य ॥

वंशं वाए शत्तच्छिद्दं शुशद्दं वीणं वादे शत्ततन्तिं णदन्तिं।
गीअं गाए गद्दहश्शाणुलूअं के मे गाणे तुम्बलू णालदे वा॥

आणत्तम्हि अज्जुआए वशन्तशेणाए जं कुम्भीलआ गच्छ तुमं ममा १५६
गमणं अज्जचालुदत्तश्श णिवेदेहि त्ति। ता जाव अज्जचालुदत्तश्श गेहं गच्छामि ॥ परिक्रम्य प्रविष्टकेन दृष्ट्वा ॥ एशे चालुदत्ते लुक्खवाडिआए चिश्ठदि। एशे बि शे दुश्टवडुके ता जाव उबशप्पेमि। कधं ढक्किदे दुआलए लुक्खवाडिआए। भोदु एदश्श दुश्टवडुअश्श शण्णं देमि।३।

॥ इति लोष्टगुटिकां क्षिपति ॥

विदूषकः। अए को दाणिं एसो पाआरवेढिदं विअ कइत्थं मं लोट्ठकेहिं ताडेदि।४।

चारुदत्तः। आरामप्रासादवेदिकायां क्रीडद्भिः पारावतैः पातितं भवेत्।

विदूषकः। आ दासीएउत्त दुट्ठपारावअ चिट्ठ चिट्ठ जाव एदि १५७
णा दण्डकट्ठेण सुपक्कं विअ चूअफलं इमादो पासादादो भूमीए

पाडइस्सं ।१। ॥ इति दण्डकाष्ठमुद्यम्य धावति ॥

चारुदत्तः ॥ यज्ञोपवीते आकृष्य ॥ वयस्य उपविश किमनेन तिष्ठतु दयितासहितस्तपस्वी पारावतः ।

चेटः । कधं पारावदं पश्शदि ण मं पेक्खदि । भोदु अबलाए लोष्टगुडिआए पुणो बि ताडइश्शं ।२। ॥ तथा करोति ॥

विदूषकः ॥ दिशो ऽवलोक्य ॥ कधं कुम्भीलओ ता जाव उवसप्पामि ॥ उपसृत्य द्वारमुद्घाट्य ॥ अरे कुम्भीलआ पविस साअदं दे ।३।

चेटः । ॥ प्रविश्य ॥ अज्ज वन्दामि ।४।

विदूषकः । अरे कहिं तुमं ईदिसे दुद्दिणे अन्धआरे आअदो ।५।

१५८ चेटः । अले एशा शा ।६।

विदूषकः । का एसा का ।७।

चेटः । एशा शा ।८।

विदूषकः । किं दाणिं दासीएउत्ता दुब्भिक्खकाले वुड्ढरङ्को विअ उड्ढकं सासाअसि एसा सा सेत्ति ।९।

चेटः । अले तुमं पि दाणिं इन्दमहकामुको विअ काकाअशिका केत्ति ।१०।

विदूषकः । ता कहेहि ।११।

चेटः ॥ स्वगतम् ॥ भोदु एव्वं भणिश्शं ॥ प्रकाशम् ॥ अले पण्हं दे दइश्शं ।१२।

विदूषकः । अहं ते मुण्डे गोडं दइस्सं ।१३।

१५९ चेटः । अले जाणाहि दाव तेण हि कश्शिं काले चूआ मउलेन्ति ।१४।

विदूषकः । अरे दासीएउत्ता गिम्हे ।१५।

चेटः ॥ सहासम् ॥ अले णहि णहि ।१६।

विदूषकः ॥ स्वगतम् ॥ किं दाणिं एत्थ कहिस्सं ॥ विचिन्त्य ॥

भोदु चारुदत्तं गदुअ पुच्छिस्सं ॥ प्रकाशम् ॥ अरे मुहुत्तअं चिठ्ठ ॥ चारुदत्तमुपसृत्य ॥ भो वअस्स पुच्छिस्सं दाव कस्सिं काले चूआ मउलेन्ति ।१।

चारुदत्तः । मूर्ख वसन्ते ।

विदूषकः ॥ चेटमुपगम्य ॥ मुक्ख वसन्ते ।२।

चेटः । दुदिअं दे पण्हं दइश्शं । का शुशमिद्धाणं गामाणं लक्खअं कलेदि ।३।

विदूषकः । अरे रच्छा ।४। १६०

चेटः । ॥ सहासम् ॥ अले णहि णहि ।५।

विदूषकः । भोदु संसए पडिदम्हि ॥ विचिन्त्य ॥ भोदु चारुदत्तं पुणो वि पुच्छिस्सं ।६। ॥ पुनर्निवृत्य चारुदत्तं तथैवोदाहरति ॥

चारुदत्तः । वयस्य सेना ।

विदूषकः ॥ चेटमुपगम्य ॥ अरे दासीएउत्ता सेणा ।७।

चेटः । दुवे वि एक्कश्शिं कदुअ शिग्घं भणाहि ।८।

विदूषकः । सेणावसन्ते ।९।

चेटः । णं पलिवत्तिअ भणाहि ।१०।

विदूषकः ॥ कायेन परिवृत्य ॥ सेणावसन्ते ।

चेटः । अले मुक्ख वडुव्वका पदाइं पलिवत्ताबेहि ।११।

विदूषकः ॥ पादौ परिवृत्य ॥ सेणावसन्ते । १६१

चेटः । अले मुक्ख अक्खलपदाइं पलिवत्ताबेहि ।१२।

विदूषकः ॥ विचिन्त्य ॥ वसन्तसेणा ।१३।

चेटः । एशा शा आअदा ।१४।

विदूषकः । ता जाव चारुदत्तस्स णिवेदेमि ॥ उपसृत्य ॥ भो चारुदत्त धणिओ दे आअदो ।१५।

चारुदत्तः । कुतो ऽस्मत्कुले धनिकः ।

विदूषकः । जइ कुले णत्थि ता दुआरे अत्थि । एसा वसन्तसेणा

आअदा ।१।

चारुदत्तः । वयस्य किं मां प्रतारयसि ।

विदूषकः । जइ मम वअणे ण पत्तिआअसि ता एदं कुम्भीलअं पुच्छ । अरे दासीएउत्ता कुम्भीलआ उवसप्प ।२।

१६२ चेटः ॥ उपसृत्य ॥ अज्ज वन्दामि ।३।

चारुदत्तः । भद्र स्वागतं कथय सत्यं प्राप्ता वसन्तसेना ।

चेटः । एशा शा आअदा वशन्तशेणा ।४।

चारुदत्तः । भद्र न कदाचित्प्रियवचनं निःफलीकृतं मया तद्गृह्यतां पारितोषिकम् ॥ इत्युत्तरीयं प्रयच्छति ॥

चेटः ॥ गृहीत्वा प्रणाम्य सपरितोषम् ॥ जाव अज्जुआए णिवेदेमि ।५।

॥ इति निष्क्रान्तः ॥

विदूषकः । भो अवि जाणासि किंणिमित्तं ईदिसे दुद्दिणे आअदेत्ति ।६।

चारुदत्तः । वयस्य न सम्यगवधारयामि ।

विदूषकः । मए जाणिदं अप्पमुल्ला रअणावली बहुमुल्लं सुवण्णभण्डअं त्ति ण परितुट्ठा अवरं मग्गिदुं आअदा ।७।

चारुदत्तः ॥ स्वगतम् ॥ परितुष्टा यास्यति ।

॥ ततः प्रविशति उज्ज्वलाभिसारिकावेशेन वसन्तसेना सोत्कण्ठा छत्रधारिणी विटश्च ॥

१६३ विटः ॥ वसन्तसेनामुद्दिश्य ॥

अपद्मा श्रीरेषा प्रहरणमनङ्गस्य ललितं
कुलस्त्रीणां शोको मदनवरवृक्षस्य कुसुमम् ।
सलीलं गच्छन्ती रतिसमयलज्जा प्रणयिनी
रतिक्षेत्रे रङ्गे प्रियपथिकसार्थैरनुगता ॥

वसन्तसेने पश्य पश्य ।

गर्जन्ति शैलशिखरेषु विलम्बिबिम्बा

मेघा वियुक्तवनिताहृदयानुकाराः ।
येषां रवेण सहसोत्पतितैर्मयूरैः
खं वीज्यते मणिमयैरिव तालवृन्तैः ॥

अपिच ।

पङ्कक्लिन्नमुखाः पिबन्ति सलिलं धाराहता दर्दुराः
कण्ठं मुञ्चति बर्हिणः समदनो नीपः प्रदीपायते ।
सन्न्यासः कुलदूषणैरिव जनैर्मेघैर्वृतश्चन्द्रमा
विद्युन्नीचकुलोद्गतेव युवतिर्नैकत्र विश्राम्यति ॥

वसन्तसेना । भाव सुट्ठु दे भणिदं ।१। एषा हि ।

मूढे निरन्तरपयोधरया मयैव
कान्तः सहाभिरमते यदि किं तवात्र ।
मां गर्जितैरिति मुहुर्विनिवारयन्ती
मार्गं रुणद्धि कुपितेव निशासपत्नी ॥

विटः । भवत्वेवं तावदुपालभ्यतां तावदियम् । १६४

वसन्तसेना । भाव किमनया स्त्रीस्वभावदुर्विदग्धयोपालब्धया । पश्यतु भावः ।

मेघा वर्षन्तु गर्जन्तु मुञ्चन्त्वशनिमेव वा ।
गणयन्ति न शीतोष्णं दयिताभिमुखाः स्त्रियः ॥

विटः । वसन्तसेने पश्य पश्य । अयमपरः ।

पवनचपलवेगः स्थूलधाराशरौघः
स्तनितपटहनादः स्पष्टविद्युत्पताकः ।
हरति करसमूहं खे शशाङ्कस्य मेघो
नृप इव पुरमध्ये मन्दवीर्यस्य शत्रोः ॥

वसन्तसेना । एव्वं णेदं ता कधं एसो अवरो ।२।

एतैरेव यदा गजेन्द्रमलिनैराध्मातलम्बोदरै

गर्जद्भिः सतडित्पताकशबलैर्मेघैः सशल्यं मनः ।
तत्किं प्रोषितभर्तृबध्यपटहो हाहा हताशो बकः
प्रावृट् प्रावृडिति ब्रवीति शठधीः क्षारं क्षते प्रक्षिपन् ॥

विटः । वसन्तसेने एवमेतत् । इदमपरं पश्य ।

बलाकापाण्डुरोष्णीषं विद्युदुत्क्षिप्तचामरम् ।
मत्तवारणसारूप्यं कर्तुकाममिवाम्बरम् ॥

१६। वसन्तसेना । भाव पेक्ख पेक्ख ।१।

एतैरार्द्रतमालपत्रमलिनैरापीतसूर्यं नभो
वल्मीकाः शरताडिता इव गजाः सीदन्ति धाराहताः ।
विद्युत्काञ्चनदीपिकेव रचिता प्रासादसञ्चारिणी
ज्योत्स्ना दुर्बलभर्तृकेव वनिता प्रोत्सार्य मेघैर्हृता ॥

विटः । वसन्तसेने पश्य पश्य ।

एते हि विद्युद्गुणबद्धकक्षा गजा इवान्योन्यमभिद्रवन्तः ।
शक्राज्ञया वारिधराः सरागा गां रूप्यरज्ज्वेव समुद्धरन्ति ॥

अपि च पश्य ।

महावाताध्मातैर्महिषकुलनीलैर्जलधरै-
श्चलैर्विद्युत्पक्षैर्जलधिभिरिवान्तःप्रचलितैः ।
इयं गन्धोद्दामा नवहरितशष्पाङ्कुरवती
धरा धारापातैर्मणिमयशरैर्भिद्यत इव ॥

वसन्तसेना । भाव एसो अवरो ।२।

एह्येहीति शिखण्डिनां पटुतरं केकाभिराक्रन्दितः
प्रोत्थायेव बलाकया सरभसं सोत्कण्ठमालिङ्गितः ।
हंसैरुज्झितपङ्कजैरतितरां सोद्वेगमुद्वीक्षितः
कुर्वन्नञ्जनमेचका इव दिशो मेघः समुज्जृम्भते ॥

विटः । एवमेतत् । तथाहि पश्य ।

निष्पन्दीकृतपद्मखण्डनयनं नष्टक्षपावासरं १६६
विद्युद्भिः क्षणदृष्टनष्टतिमिरं प्रच्छादिताशामुखम् ।
निश्चेष्टं स्वपितीव सम्प्रति पयोधारागृहान्तर्गतं
स्फीताम्भोधरधाम नैकजलदच्छत्रापिधानं जगत् ॥

वसन्तसेना । भाव एव्वं णेदं । ता पेक्ख पेक्ख ।१।

गता नाशं तारा उपकृतमसाधाविव जने
वियुक्ताः कान्तेन स्त्रिय इव न राजन्ति ककुभः ।
प्रकामान्तस्तप्तं त्रिदशपतिशस्त्रस्य शिखिना
द्रवीभूतं मन्ये पतति जलरूपेण गगनम् ॥

अपि च पश्य ।

उन्नमति नमति वर्षति गर्जति मेघः करोति तिमिरौघम् ।
प्रथमश्रीरिव पुरुषः करोति रूपाण्यनेकानि ॥

विटः । एवमेतत् ।

विद्युद्भिर्ज्वलतीव संविहसतीवोच्चैर्बलाकाशतै
र्माहेन्द्रेण विवल्गतीव धनुषा धाराशरोद्गारिणा ।
विस्पष्टाशनिनिस्वनेन रसतीवाघूर्णतीवानिलै
र्नीलैः सान्द्रमिवाहिभिर्जलधरैर्धूपायतीवाम्बरम् ॥

वसन्तसेना ।

जलधर निर्लज्जस्त्वं यन्मां दयितस्य वेश्म गच्छन्तीम् ।
स्तनितेन भीषयित्वा धाराहस्तैः परामृशसि ॥

भोः शक्र ।

किं ते ह्यहं पूर्वरतिप्रसक्ता यत्त्वं नदस्यम्बुदसिंहनादैः । १६७
न युक्तमेतत्प्रियकाङ्क्षिताया मार्गं निरोद्धुं मम वर्षपातैः ॥

अपिच ।

यद्वदहल्याहेतोर्मृषा वदसि शक्र गौतमोऽस्मीति ।

तद्वन्ममापि दुःखं निरवेक्ष्य निवार्यतां जलदः ॥

अपिच।

गर्ज वा वर्ष वा शक्र मुञ्च वा शतशोऽशनिम्।
न शक्या हि स्त्रियो रोद्धुं प्रस्थिता दयितं प्रति ॥
यदि गर्जति वारिधरो गर्जतु तन्नाम निष्ठुराः पुरुषाः।
अयि विद्युत्प्रमदानां त्वमपि च दुःखं न जानासि ॥

विटः। भवति अलमुपालम्भेन। उपकारिणी तवेयम्।

ऐरावतोरसि चलेव सुवर्णरज्जुः
शैलस्य मूर्ध्नि निहितेव सिता पताका।
आखण्डलस्य भवनोदरदीपिकेय
माख्याति ते प्रियतमस्य हि सन्निवेशम् ॥

वसन्तसेना। भाव तं ज्जेव्व एदं गेहं।१।

विटः। सकलकलाभिज्ञाया न किञ्चिदिह तवोपदेष्टव्यमस्ति। तथापि स्नेहः प्रलापयति। अत्र प्रविश्य कोपोऽत्यन्तं न कर्तव्यः।

यदि कुप्यसि नास्ति रतिः कोपेन विनाथवा कुतः कामः।
कुप्य च कोपय च त्वं प्रसीद च त्वं प्रसादय च कान्तम् ॥

१६८ भवत्वेवं तावत्। भो भो निवेद्यतामार्यचारुदत्ताय।

एषा फुल्लकदम्बनीपसुरभौ काले घनोद्भासिते
कान्तस्यालयमागता समदना हृष्टा जलार्द्रालका।
विद्युद्वारिदगर्जितैः सचकिता त्वद्दर्शनाकाङ्क्षिणी
पादौ नूपुरलग्नकर्दमधरौ प्रक्षालयन्ती स्थिता ॥

चारुदत्तः ॥ आकर्ण्य ॥ वयस्य ज्ञायतां किमेतदिति।

विदूषकः। जं भवं आणवेदि ॥ वसन्तसेनामुपगम्य सादरम् ॥ सोन्थि भोदीए।२।

वसन्तसेना। अज्ज वन्दामि साअदं अज्जस्स। भाव एसा छत्तधा

रिग्रा भावस्स ज्जेव्व भोदु । १ ।

विटः ॥ स्वगतम् ॥ अनेनोपायेन निपुणं प्रेषितो ऽस्मि ॥ प्रकाशम् ॥ एवं भवतु । भवति वसन्तसेने ।

साटोपकूटकपटानृतजन्मभूमेः
शाठ्यात्मकस्य रतिकेलिकृतालयस्य ।
वेश्यापणस्य सुरतोत्सवसङ्ग्रहस्य
दाक्षिण्यपण्यसुखनिष्क्रयसिद्धिरस्तु ॥

॥ इति निष्क्रान्तः ॥

वसन्तसेना। अज्ज मित्तेग्र कहिं तुम्हाणं जूदिअरो । २ । १६१

विदूषकः ॥ स्वगतम् ॥ ही ही भो जूदिअरो त्ति भणन्तीए अलङ्किदो पिअवअस्सो ॥ प्रकाशम् ॥ भोदि एसो क्खु रुक्खवाडिआए । ३ ।

वसन्तसेना। अज्ज का तुम्हाणं रुक्खवाडिआ वुच्चदि । ४ ।

विदूषकः । भोदि जहिं ण खाईअदि ण पीईअदि । ५ ।

॥ वसन्तसेना स्मितं करोति ॥

विदूषकः । ता पविसदु भोदी । ६ ।

वसन्तसेना ॥ जनान्तिकम् ॥ एत्थ पविसिअ किं मए भणिदव्वं । ७ ।

चेटी । जूदिअर अवि सुहो दे पदोसो त्ति । ८ ।

वसन्तसेना । अवि पारइस्सं । ९ ।

चेटी । अवसरो ज्जेव्व पारइस्सदि । १० । १७०

विदूषकः । पविसदु भोदी । ११ ।

वसन्तसेना ॥ प्रविश्योपसृत्य च पुष्पैस्ताडयन्ती ॥ अइ जूदिअर अवि सुहो दे पदोसो । १२ ।

चारुदत्तः ॥ अवलोक्य ॥ अये वसन्तसेना प्राप्ता ॥ सहर्षमुत्थाय ॥ अयि प्रिये ।

सदा प्रदोषो मम याति जाग्रतः सदा च मे निःश्वसतो गता निशा ।

त्वया समेतस्य विशाललोचने ममाद्य शोकान्तकरः प्रदोषः ॥

तत्स्वागतं भवत्यै । इदमासनमत्रोपविश्यताम् ।

विदूषकः । इदमासणं उववितदु भोदी ।१।

॥ वसन्तसेना नाट्येनासीना सर्वे उपविशन्ति ॥

चारुदत्तः । वयस्य पश्य पश्य ।

वर्षोदकमुद्गिरता श्रवणान्तविलम्बिना कदम्बेन ।
एकः स्तनो ऽभिषिक्तो नृपसुत इव यौवराज्यस्थः ॥

तद्वयस्य क्लिन्ने वाससी वसन्तसेनायाः । अन्ये प्रधानवाससी समुपनीयेतामिति ।

१७१ विदूषकः । जं भवं आणवेदि ।२।

चेटी । अज्ज मित्तेअ चिट्ठ तुमं अहं ज्जेव्व अज्जुअं सुस्सूइस्सं ।३।

॥ तथा करोति ॥

विदूषकः ॥ अपवारितकेन ॥ भो वअस्स पुच्छामि दाव तत्थभोदिं किञ्चि ।४।

चारुदत्तः । एवं क्रियताम् ।

विदूषकः ॥ प्रकाशम् ॥ अध किंणिमित्तं उण ईदिसे पणट्ठचन्दालोए दुद्दिणअन्धआरे आअदा भोदी ।५।

चेटी । अज्जुए उज्जुओ बम्हणो ।६।

वसन्तसेना । णं णिउणो त्ति भण ।७।

चेटी । एसा खु अज्जुआ एव्वं पुच्छिदुं आअदा केत्तिअं ताए रअणावलीए मुल्लं त्ति ।८।

१७२ विदूषकः ॥ जनान्तिकम् ॥ भो भणिदं मए जधा अप्पमुल्ला रअणावली बहुमुल्लं सुवण्णभण्डअं ण परितुट्ठा अवरं मग्गिदुं आअदा ।९।

चेटी । सा खु अज्जुआए अत्तणकेरकेत्ति भणिअ जूदे हारिदा । सो अ सहिओ राआवत्थआरी ण आणीअदि कहिं गदो त्ति ।१०।

विदूषकः । भोदि मन्तिदं ज्जेव्व मन्तीअदि ।१।

चेटी । जाव सो अण्णेसीअदि ताव एदं ज्जेव्व गेण्ह सुवण्णभण्डअं ।२। ॥ इति दर्शयति ॥ ॥ विदूषको विचारयति ॥

चेटी । अदिमेत्तं अज्जो णिज्झाअदि ता किं दिट्ठपुरुव्वो दे ।३।

विदूषकः । भोदि सिप्पिकुसलदाए ओबन्धेदि दिट्ठिं ।४।

चेटी । अज्ज वञ्चिदो सि दिट्ठीए तं ज्जेव्व एदं सुवण्णभण्डअं ।५। १७३

विदूषकः ॥ सहर्षम् ॥ भो वअस्स तं ज्जेव्व एदं सुवण्णभण्डअं जं अम्हाणं गेहे चोरेहिं अबहृदं ।६।

चारुदत्तः । वयस्य ।

यो ऽस्माभिश्चिन्तितो व्याजः कर्तुं न्यासप्रतिक्रियाम् ।
स एव प्रस्तुतो ऽस्माकं किं तु सत्यं विडम्बना ॥

विदूषकः । भो वअस्स सच्चं सबामि बम्हणेण ।७।

चारुदत्तः । प्रियं नः प्रियम् ।

विदूषकः ॥ जनान्तिकम् ॥ पुच्छामि णं कुदो एदं समासादिदं त्ति ।८।

चारुदत्तः । को दोषः ।

विदूषकः ॥ चेट्याः कर्णे ॥ एव्वं विअ ।९।

चेटी ॥ विदूषकस्य कर्णे ॥ एव्वं विअ ।१०।

चारुदत्तः । किमिदं कथ्यते । किं वयं बाह्याः ।

विदूषकः ॥ चारुदत्तस्य कर्णे ॥ एवं विअ ।११। १८४

चारुदत्तः । भद्रे सत्यं तदेवेदं सुवर्णभाण्डम् ।

चेटी । अज्ज अधइं ।१२।

चारुदत्तः । भद्रे न कदापि मया प्रियनिवेदनं निःफलीकृतम् । तद्गृह्यतां पारितोषिकमिदमङ्गुलीयकम् ॥ इत्यनङ्गुलीयकं हस्तमवलोक्य लज्जां नाटयति ॥

वसन्तसेना ॥ आत्मगतम् ॥ अदो ज्जेव्व कामीअसि ।१।

चारुदत्तः ॥ जनान्तिकम् ॥ भो कष्टम् ।

धनैर्वियुक्तस्य नरस्य लोके किं जीवितेनादित एव तावत् ।
यस्य प्रतीकारनिरर्थकत्वात्कोपप्रसादा विफलीभवन्ति ॥

अपिच ।

पक्षविकलश्च पक्षी शुष्कश्च तरुः सरश्च जलहीनम् ।
सर्पश्चोद्धृतदंष्ट्रस्तुल्यं लोके दरिद्रश्च ॥

अपिच । वयस्य ।

शून्यैर्गृहैः खलु समाः पुरुषा दरिद्राः
कूपैश्च तोयरहितैस्तरुभिश्च शीर्णैः ।
यद्दृष्टपूर्वजनसङ्गमविस्मृताना
मेवं भवन्ति विफलाः परितोषकालाः ॥

१७। विदूषकः । भो अलं अदिमेत्तं सन्तप्पिदेण ॥ प्रकाशं सपरिहासम् ॥ भोदि समप्पीअदु मम केरिआ पहाणसाडिआ ।२।

वसन्तसेना । अज्ज चारुदत्त जुत्तं णेदं इमाए रअणावलीए इमं जणं तुलइदुं ।३।

चारुदत्तः ॥ सविलक्षस्मितम् ॥ वसन्तसेने पश्य पश्य ।

कः श्रद्धास्यति भूतार्थं सर्वो मां तुलयिष्यति ।
शङ्कनीया हि लोकेऽस्मिन्निष्प्रतापा दरिद्रता ॥

विदूषकः । हञ्जे किं भोदीए इध ज्जेव्व सुविदव्वं ।४।

चेटी ॥ विहस्य ॥ अज्ज मित्तेअ अदिमेत्तं दाणिं उज्जुअं अत्ताणअं दंसेसि ।५।

विदूषकः । भो वअस्स एसो क्खु ओसारअन्तो विअ सुहोबविट्ठं जणं पुणो वि वित्थारिवारिधाराहिं पविट्ठो पज्जुणो ।६।

चारुदत्तः । सम्यगाह भवान् ।

अमी हि भित्वा जलदान्तराणि १७६
पङ्कान्तराणीव मृणालसूच्यः ।
पतन्ति चन्द्रव्यसनाद्विमुक्ता
दिवो ऽश्रुधारा इव वारिधाराः ॥

अपिच । धाराभिरार्यजनचित्तसुनिर्मलाभि
श्चण्डाभिरर्जुनशरप्रतिकर्कशाभिः ।
मेघाः स्रवन्ति बलदेवपटप्रकाशाः
शक्रस्य मौक्तिकनिधानमिवोद्गिरन्तः ॥

प्रिये । पश्य पश्य ।

एतैः पिष्टतमालवर्णकनिभैरालिप्तमम्भोधरैः
संसक्तैरुपवीजितं सुरभिभिः शीतैः प्रदोषानिलैः ।
एषाम्भोदसमागमप्रणयिनी स्वच्छन्दमभ्यागता
रक्ता कान्तमिवाम्बरं प्रियतमा विद्युत्समालिङ्गति ॥

॥ वसन्तसेना शृङ्गारभावं नाटयन्ती चारुदत्तमालिङ्गति ॥

चारुदत्तः ॥ स्पर्शं नाटयन्प्रत्यालिंग्य ॥

भो मेघ गम्भीरतरं नद त्वं तव प्रसादात्स्मरपीडितं मे ।
संस्पर्शरोमाञ्चितजातरागं कदम्बपुष्पत्वमुपैति गात्रम् ॥

विदूषकः । दासीएउत्त दुद्दिण अणज्जो दाणिं सि तुमं जं एव्वं भोदिं विज्जुआए भाआबेसि ।१।

चारुदत्तः । वयस्य नार्हस्युपालब्धुम् ।

वर्षशतमस्तु दुर्दिनमविरतधारं शतह्रदा स्फुरतु ।
अस्मद्विधदुर्लभया यदहं प्रियया परिष्वक्तः ॥

अपिच वयस्य । १७७

धन्यानि तेषां खलु जीवितानि
ये कामिनीनां गृहमागतानाम् ।

आर्द्राणि मेघोदकशीतलानि
गात्राणि गात्रेषु परिष्वजन्ति ॥

प्रिये वसन्तसेने ।

स्तम्भेषु प्रचलितवेदिसञ्चयान्तं
शीर्णत्वात्कथमपि धार्यते वितानम् ।
एषा च स्फुटितसुधाद्रवानुलेपा
त्संक्लिन्ना सलिलभरेण चित्रभित्तिः ॥

॥ ऊर्ध्वं विलोक्य ॥ अये इन्द्रधनुः । प्रिये पश्य पश्य ।

विद्युज्जिह्वेनेदं महेन्द्रचापोच्छ्रितायतभुजेन ।
जलधरविवृद्धहनुना विजृम्भितमिवान्तरिक्षेण ॥

तदेह्यभ्यन्तरमेव प्रविशावः ॥ इत्युत्थाय परिक्रामति ॥

प्रिये पश्य ।

तालीषु तारं विटपेषु मन्द्रं
शिलासु रूक्षं सलिलेषु चण्डम् ।
सङ्गीतवीणा इव ताड्यमाना
स्तालानुसारेण पतन्ति धाराः ॥

॥ इति निष्क्रान्ताः सर्वे ॥

इति मृच्छकटिकायां
दुर्दिनो नाम
पञ्चमोऽङ्कः ॥

॥ ततः प्रविशति चेटी ॥ १७८

चेटी। कधं अज्ज वि अज्जुआ ण विबुज्झदि। भोदु पविसिअ पबोधइस्सं।१।

॥ इति नाट्येन परिक्रामति ॥ ततः प्रविशत्याच्छादितशरीरा प्रसुप्ता वसन्तसेना।

चेटी। उट्ठेदु उट्ठेदु अज्जुआ पभादं संवुत्तं।२।

वसन्तसेना ॥ प्रतिबुध्य ॥ कधं रत्ति ज्जेव्व पभादं संवुत्तं।३।

चेटी। अम्हाणं एसो पभादो अज्जुआए उण रत्ति ज्जेव्व।४।

वसन्तसेना। हञ्जे कहिं तुम्हाणं जूदिअरो।५।

चेटी। अज्जुए वड्ढमाणअं समादिसिअ पुप्फकरण्डअं जिण्णुज्जाणं १७९
गदो अज्जचारुदत्तो।६।

वसन्तसेना। किं समादिसिअ।७।

चेटी। जोएहि रादीए ज्जेव्व पवहणं वसन्तसेणा गच्छदु त्ति।८।

वसन्तसेना। हञ्जे कहिं मए गन्तव्वं।९।

चेटी। अज्जुए जहिं चारुदत्तो।१०।

वसन्तसेना ॥ चेटीं परिष्वज्य ॥ हञ्जे सुट्ठु ण णिज्झाइदो रादीए ता अज्ज पच्चक्खं पेक्खिस्सं। हञ्जे किं पविट्ठा अहं अब्भन्तरचतुस्सालअं।११।

चेटी। ण केवलं अब्भन्तरचतुस्सालअं सव्वजणस्स हिअअं पि पविट्ठा।१२।

वसन्तसेना। अवि सन्तप्पदि चारुदत्तस्स परिअणो।१३। १८०

चेटी। सन्तप्पिस्सदि।१४।

वसन्तसेना। कदा।१।

चेटी। जदो अज्जुआ गमिस्सदि।२।

वसन्तसेना। तदो मए पढमं सन्तप्पिदव्वं। हज्जे गेण्ह एदं रअणावलिं। मम बहिणिआए अज्जाधूदाए गदुअ समप्पेहि भणिदव्वं च। अहं सिरीचारुदत्तस्स गुणणिज्जिदा दासी तदा तुम्हाणं पि। ता एसा तुह ज्जेव्व कण्ठाहरणं होदु रअणावली।३।

चेटी। कुप्पिस्सदि चारुदत्तो अज्जुआए दाव।४।

वसन्तसेना। गच्छ ण कुप्पिस्सदि।५।

१८१ चेटी ॥ गृहीत्वा ॥ जं आणवेसि।६।

॥ इति निष्क्रान्ता पुनः प्रविश्य ॥

चेटी। अज्जुए भणादि अज्जाधूदा। अज्जउत्तेण तुम्हाणं पसादीकदा ण जुत्तं मम एदं गेण्हिदुं। अज्जउत्तो ज्जेव्व मम आहरणविसेसो त्ति जाणादु भोदी।७।

॥ ततः प्रविशति दारकं गृहीत्वा रदनिका ॥

रदनिका। एहि वच्छ सअडिआए कीलेम्ह।८।

दारकः ॥ सकरुणम् ॥ रदनिए किं मम एदाए मट्टिआसअडिआए। तं ज्जेव्व सोवण्णसअडिअं देहि।९।

रदनिका ॥ सनिर्वेदं निःश्वस्य ॥ जाद कुदो अम्हाणं सुवण्णववहारो। तादस्स पुणो वि रिद्धीए सुवण्णसअडिआए कीलिस्ससि। ता जाव विणोदेमि णं अज्जुआवसन्तसेणाए समीवं उवसप्पिस्सं ॥ उपसृत्य ॥ अज्जुए पणमामि।१०।

१८२ वसन्तसेना। रदणिए साअदं दे। कस्स उण अअं दारओ अणलङ्किदसरीरो वि चन्दमुहो आणन्देदि मम हिअअं।११।

रदनिका। एसो क्खु अज्जचारुदत्तस्स पुत्तो रोहसेणो णाम।१२।

वसन्तसेना ॥ बाहू प्रसार्य ॥ एहि मे पुत्तअ आलिङ्ग ॥ इति अङ्के उपवेश्य ॥ अणुकिदं अणेण पिदुणो रूवं ।१।

रदनिका। ण केवलं रूवं सीलं पि तक्केमि। एदिणा अज्जचारुदत्तो अत्ताणअं विणोदेदि ।२।

वसन्तसेना। अध किंणिमित्तं एसो रोअदि ।३।

रदनिका। एदिणा पडिवेसिगिहवइदारअकेरिआए सुवण्णसअडिआए कीलिदं तेण अ सा णीदा। तदो उण तं मग्गन्तस्स मए इअं मट्टिआसअडिआ कदुअ दिण्णा। तदो भणादि रदणिए किं मम एदाए मट्टिआसअडिआए तं ज्जेव्व सोवण्णसअडिअं देहि त्ति ।४। १८३

वसन्तसेना। हद्धी हद्धी अअं पि णाम परसम्पत्तीए सन्तप्पदि। भअवं कअन्त पोक्खरवत्तपडिदजलविन्दुसरिसेहिं कीलसि तुमं पुरिसभाअधेएहिं ॥ इति साम्रा ॥ जाद मा रोद सुवण्णसअडिआए कीलिस्ससि ।५।

दारकः। रदणिए का एसा ।६।

वसन्तसेना। दे पिदुणो गुणणिज्जिदा दासी ।७।

रदनिका। जाद अज्जुआ दे जणणी भोदि ।८। १८४

दारकः। रदणिए अलिअं तुमं भणासि जइ अम्हाणं अज्जुआ जणणी ता कीस अलङ्किदा ।९।

वसन्तसेना। जाद मुद्धेण मुहेण अदिकरुणं मन्तेसि ॥ नाट्येनाभरणान्यवतार्य रुदती ॥ एसा दाणिं दे जणणी संवुत्ता। ता गेण्ह एदं अलङ्कारअं सोवण्णसअडिअं घडावेहि ।१०।

दारकः। अवेहि ण गेण्हिस्सं रोदसि तुमं ।११।

वसन्तसेना ॥ अश्रूणि प्रमृज्य ॥ जाद न रोदिस्सं गच्छ कील ॥ अलङ्कारैर्मृच्छकटिकां पूरयित्वा ॥ जाद कारेहि सुवण्णसअडिअं ।१२।

॥ इति दारकमादाय निष्क्रान्ता रदनिका ॥

१८५ प्रविश्य प्रवहणाधिरूढः

चेटः । लदणिए लदणिए णिवेदेहि अज्जुआए वशन्तशेणाए ओह्वालिअं पक्खदुआलए शज्जं पवहणं चिष्ठदि । १ ।

प्रविश्य

रदनिका । अज्जुए एसो वड्ढमाणओ विण्णवेदि पक्खदुआरए सज्जं पवहणं त्ति । २ ।

वसन्तसेना । चिट्ठदु मुहुत्तअं जाव अहं अत्ताणअं पसाधेमि । ३ ।

रदनिका ॥ निष्क्रम्य ॥ वड्ढमाणआ चिट्ठ मुहुत्तअं जाव अज्जुआ अत्ताणअं पसाधेदि । ४ ।

चेटः । ही ही भो मए बि जाणत्थलके विशुमलिदे ता जाव णं गेण्हिअ आअच्छामि । एदे णश्शाकडुआ बइल्ला । भोदु पवहणेण ज्जेव्व गदागदिं कलिश्शं ॥ इति निष्क्रान्तश्चेटः ॥ । ५ ।

वसन्तसेना । हञ्जे उवणेहि मे पसाहणं अत्ताणअं पसाहइस्सं । ६ । ॥ इति प्रसाधयन्ती स्थिता ॥

१८६ प्रविश्य प्रवहणाधिरूढः

स्थावरकश्चेटः ॥ आणत्तम्हि लाअशालशण्ठाणेण जं थावलआ पवहणं गेण्हिअ पुप्फकलण्डअं जिण्णुज्जाणं तुलिदं आअच्छेहि त्ति । भोदु तहिं ज्जेव्व गच्छामि । वहध बइल्ला वहध ॥ परिक्रम्यावलोक्य च ॥ कधं गामशअडेहिं लुद्धे मग्गे किं दाणिं एत्थ कलइश्शं ॥ साटोपम् ॥ अले ले ओशलध ओशलध ॥ आकर्ण्य ॥ किं भणाध । एशे कश्श केलके पवहणे त्ति । एशे लाअशालशण्ठाणकेलके पवहणेत्ति । ता शिग्घं ओशलध ॥ अवलोक्य ॥ कधं एशे अबले शहिअं विअ मं पेक्खिअ शहशा ज्जेव्व जूदपलाइदे विअ जूदिअले ओह्वालिअ अत्ताणअं अण्णदो अवक्कन्ते ता के उण एशे । अधवा किं मम एदिणा

तुलिदं गमिश्शं। अले ले गामेलुआ ओशलध ओशलध। किं भणाध। मुहुत्तअं चिट्ठ चक्कपलिवत्तिं देहि त्ति। अले ले लाअशालशण्ठाण केलके हग्गे शूले चक्कपलिवत्तिं दइश्शं। अधवा एशे एआई तबश्शी ता एव्वं कलेमि। एदं पवहणं अज्जचालुदत्तश्श लुक्खवाडिआए पक्खदुआलके थावेमि ॥ इति प्रवहणं संस्थाप्य ॥ एशे म्हि आअदे।१।

॥ इति निष्क्रान्तः ॥

चेटी। अज्जुए णेमिसद्दो विअ सुणीअदि। ता आअदो पवह १८७
णो।२।

वसन्तसेना। हञ्जे गच्छ तुवरदि मे हिअअं ता आदेसेहि पक्खदुआरअं।३।

चेटी। एदु एदु अज्जुआ।४।

वसन्तसेना ॥ परिक्रम्य ॥ हञ्जे वीसम तुमं।५।

चेटी। जं अज्जुआ आणावेदि।६। ॥ इति निष्क्रान्ता ॥

वसन्तसेना ॥ दक्षिणाक्षिस्पन्दं सूचयित्वा प्रवहणमधिरुह्य च ॥ किं णेदं फुरदि १८८
दाहिणं णअणं। अधवा चारुदत्तस्स ज्जेव्व दंसणं अणिमित्तं पमज्जि
स्सदि।७।

प्रविश्य

स्थावरकश्चेटः ॥ ओशालिदा मए शअडा ता जाव गच्छामि ॥ इति नाट्येनाधिरुह्य चालयित्वा स्वगतम् ॥ भालिके पवहणे। अधवा चक्कपलिवत्तिआए पलिश्शन्तश्श भालिके पवहणे पडिभाशदि। भोदु गमिश्शं। जाध गोणा जाध।८।

नेपथ्ये। अरे रे दोवारिआ अप्पमत्ता सएसु सएसु गुम्मट्ठाणेसु होध। एसो अज्ज गोबालदारओ गुत्तिअं भञ्जिअ गुत्तिबालअं वाबादिअ बन्धणं भेदिअ परिब्भट्ठो अवक्कमदि। ता गेण्हध गेण्हध।९।

॥ प्रविश्यापटीक्षेपेण सम्भ्रान्त एकचरणालग्ननिगडो ऽवगुण्ठित आर्यकः परिक्रामति ॥ १८९

चेटः ॥ स्वगतम् ॥ महन्ते णअलीए शम्भमे उप्पण्णे ता तुलिदं तुलिदं गमिश्शं ।१। ॥ इति निष्क्रान्तः ॥

आर्यकः ।

हित्वाहं नरपतिबन्धनापदेश
व्यापत्तिव्यसनमहार्णवं नराणाम् ।
पादाग्रस्थितनिगडैकपाशकर्षी
प्रभ्रष्टो गज इव बन्धनाद्भ्रमामि ॥

भो अहं खलु सिद्धादेशजनितपरित्रासेन राज्ञा पालकेन घोषादानीय विशसने गूढागारे बन्धनेन बद्धः । तस्माच्च प्रियसुहृच्छर्विलकप्रसादेन बन्धनाद्भ्रष्टो ऽस्मि ॥ अश्रूणि विमृज्य ॥

भाग्यानि मे यदि तदा मम को ऽपराधो
यद्वन्यनाग इव संयमितो ऽस्मि तेन ।
दैवी च सिद्धिरपि लङ्घयितुं न शक्या
गम्यो नृपो बलवता सह को विरोधः ॥

तत्कुत्र गच्छामि मन्दभाग्यः ॥ विलोक्य ॥ इदं कस्यापि साधोरनावृतपक्षद्वारं गेहम् ।

इदं गृहं भिन्नमनायतार्गलं विशीर्णसन्धिश्च महाकपाटः ।
ध्रुवं कुटुम्बी व्यसनाभिभूतां दशां प्रपन्नो मम तुल्यभाग्यः ॥

११० तदत्र तावत्प्रविशामि ।

नेपथ्ये । जाध गोणा जाध ।२।

आर्यकः ॥ आकर्ण्य ॥ अये प्रवहणमित एवाभिवर्तते ।

भवेद्गोष्ठीयानं न च विषमशीलैरधिगतं
वधूसंयानं वा तदभिगमनोपस्थितमिदम् ।
बहिर्नेतव्यं वा प्रवरजनयोग्यं विधिवशा
द्विविक्तत्वाच्छून्यं मम खलु भवेद्दैवविहितम् ॥

॥ ततः प्रवहणेन प्रविश्य ॥

वर्धमानकश्चेटः। ही माणहे आणीदे मए जाणत्थलके। लद्दणिए लदणिए णिवेदेहि अज्जुआए वशन्तशेणाए अवत्थिदे शज्जे पवहणे अहिलुहिअ पुष्फकलण्डअं जिण्णुज्जाणं गच्छदु अज्जुआ।१।

आर्यकः ॥ आकर्ण्य ॥ गणिकाप्रवहणं वहिर्यानं च भवत्वधिरोहामि ॥ इति स्वैरमुपसर्पति ॥

चेटः ॥ श्रुत्वा ॥ कधं णेउलशद्दे ता आगदा खु अज्जुआ। अज्जुए इमे णश्शाकडुआ बइल्ला। ता पिट्ठदो ज्जेव्व आलुहदु अज्जुआ।२।

॥ आर्यकः तथा करोति ॥ १११

चेटः। जधा पादुप्फालचालिदाणं णेउलाणं वीशन्ते शद्दे भलक्कन्ते अ पवहणे तथा तक्केमि शम्पदं अज्जुआए आलूढाए होदव्वं ता गच्छामि। जाध गोणा जाध।३। ॥ इति परिक्रामति ॥

प्रविश्य

वीरकः ॥ अरे रे अरे जअजअमाणअचन्दणअमङ्गलफुल्लभद्दप्पमुहा।

किं अच्छध वीसद्धा जो सो गोवालदारओ रुद्धो।
भेत्तूण समं वच्चइ णरवइहिअअं च बन्धणं च ॥

अरे रे पुरत्थिमे पदोलीदुआरए चिट्ठ तुमं तुमं पि पच्छिमे तुमं पि दक्खिणे तुमं पि उत्तरे। जो वि एसो पाआरखण्डो एदं अहिरुहिअ चन्दणेण समं अवलोएमि। एहि चन्दणअ एहि इदो दाव।४।

प्रविश्य संभ्रान्तः

चन्दनकः। अरे रे वीरअविसल्लभीमङ्गअदण्डकालअदण्डसूरप्पमुहा।

आअच्छध वीसत्था तुरिअं जत्तेह लहु करेज्जाह।
लच्छी जेण ण रण्णो पहवइ गोत्तन्तरं गन्तुं ॥ ।५।

११२ अवि अ।

उज्जाणेसु सहासु अ मग्गे णअरीअ आवणे घोसे।
तं तं जोहह तुरिआ सङ्का वा जाअए जत्थ॥
रे रे वीरअ किं किं दरिसेसि भणाहि दाव वीसत्थं।
भेत्तूण अ वन्धणअं को सो गोबालदारअं हरइ॥
कस्सट्ठमो दिणअरो कस्स चउत्थो अ वट्टए चन्दो।
छट्ठो अ भग्गवग्गहो भूमिसुओ पञ्चमो कस्स॥
भण कस्स जम्मछट्ठो जीवो णवमो तहेअ सूरसुओ।
जीअन्ते चन्दणए को सो गोबालदारअं हरइ॥ ।१।

११३ वीरकः। भड चन्दणआ।

अवहरइ को वि तुरिअं चंदणअ सवामि तुज्झ हिअएण।
जह अद्धुइअदिणअरे गोबालअदारओ खुडिदो॥ ।२।

चेटः। जाध गोणा जाध।३।

चन्दनकः ॥ दृष्ट्वा ॥ अरे रे पेक्ख पेक्ख।

ओहारिओ पवहणो वज्जइ मज्झेण राअमग्गस्स।
एदं ताव विआरह कस्स कहिं पवसिओ पवहणो॥ ।४।

वीरकः ॥ अवलोक्य ॥ अरे रे पवहणवाहआ मा दाव पवहणं वाहेहि। कस्स केरकं एदं पवहणं को वा इध आरूढो कहिं वा वञ्चदि।५।

११४ चेटः। एशे क्खु पवहणे अज्जचालुदत्ताह केलके पवहणे इध अज्जुआ वशन्तशेणा आलूढा पुप्फकलण्डअं जिण्णुज्जाणं कीलिदुं चालुदत्तश्श णीअदि।६।

वीरकः ॥ चन्दनकमुपसृत्य ॥ एसो पवहणवाहओ भणादि अज्जचारुदत्तस्स पवहणं वसन्तसेणा आरूढा पुप्फकरण्डअं जिण्णुज्जाणं णीअदि त्ति।७।

चन्दनकः । ता गच्छदु ।१।

वीरकः । अणवलोइदो ज्जेव्व ।२।

चन्दनकः । अध इं ।३।

वीरकः । कस्स पच्चएण ।४।

चन्दनकः । अज्जचारुदत्तस्स ।५।

वीरकः । को सो अज्जचारुदत्तो का वा वसन्तसेणा जेण अण ११५
वलोइदं वच्चदि ।६।

चन्दनकः । अरे अज्जचारुदत्तं ण आणासि ण वा वसन्तसेणिअं। जइ अज्जचारुदत्तं वसन्तसेणिअं वा ण आणासि ता गअणे जोण्हासहिदं चन्दं तुमं ण आणासि ।

को तं गुणारविन्दं सीलमिअङ्कं जणो ण आणादि ।
आबण्णदुक्खमोक्खं चउसाअरसारअं रअणं ॥
दो ज्जेव्व पूअणीआ इह णअरीए तिलअभूदा अ ।
अज्जा वसन्तसेणा धम्मणिही चारुदत्तो अ ॥ ।७।

वीरकः । अरे चन्दनआ ।

जाणामि चारुदत्तं वसन्तसेणं च सुट्ठु जाणामि । ११६
पत्ते अ राअकज्जे पिदरं पि अहं ण आणामि ॥ ।८।

आर्यकः ॥ स्वगतम् ॥ अयं मे पूर्ववैरी अयं मे पूर्वबन्धुः । यतः ।

एककार्यनियोगेऽपि नानयोस्तुल्यशीलता ।
विवाहे च चितायां च यथा हुतभुजोर्द्वयोः ॥

चन्दनकः । तुमं पि तत्तिल्लो सेणाबई रण्णो पच्चइदो । एदे धारिदा मए बइल्ला अवलोएहि ।९।

वीरकः । तुमं पि रण्णो पच्चइदो बलबई ता तुमं ज्जेव्व अवलोएहि ।१०।

चन्दनकः । मए अवलोइदं तुए अवलोइदं भोदि ।११।

वीरकः। जं तुए अवलोइदं तं एणा पालएण अवलोइदं ।१।

११७ चन्दनकः। अरे पवहणवाहआ ओणामेहि धुरं ।२।

चेटः ॥ तथा करोति ॥

आर्यकः ॥ स्वगतम् ॥ अपि रक्षिणो मामवलोकयन्ति। अशस्त्रश्चास्मि मन्दभाग्यः। अथवा।

भीमस्यानुकरिष्यामि बाहुः शस्त्रं भविष्यति।
वरं व्यायच्छतो मृत्युर्न गृहीतस्य बन्धने ॥

अथवा साहसस्य तावदनवसरः।

चन्दनकः ॥ नाट्येन प्रवहणमारुह्यावलोकयति ॥

आर्यकः। शरणागतोऽस्मि।

चन्दनकः ॥ संस्कृतमाश्रित्य ॥ अभयं शरणागतस्य।

आर्यकः।

त्यजति किल तं जयश्रीर्जहति च मित्राणि बन्धुवर्गश्च।
भवति च सदोपहास्यो यः खलु शरणागतं त्यजति ॥

चन्दनकः। कधं अज्जअओ गोबालदारओ सेणवित्तासिदो पत्तरहो विअ साउणिअस्स हत्थे णिबडिदो ॥ विचिन्त्य ॥ एसो अणवराधो सरणाअदो अज्जचारुदत्तस्स पवहणं आरूढो पाणप्पदस्स मे अज्जसव्विलअस्स मित्तं अण्णदो राअणिओओ। ता किं दाणिं एत्थ जुत्तं अणुचिट्ठिदुं। अधवा जं भोदि तं भोदि। पढमं जेव्व अभअं दिण्णं।

११८ भीदाभअप्पदाणं देन्तस्स परोबआररसिअस्स।
जइ होइ होउ णासो तह वि अ लोए गुणो जेव्व ॥

॥ सभयमवतीर्य ॥ दिट्ठो अज्जो ॥ इत्यर्धोक्ते ॥ ण अज्जुआ वसन्तसेणा। तदो एसा भणादि जुत्तं णेदं सरिसं णेदं जं अहं अज्जचारुदत्तं अहिसारिदुं गच्छन्ती राअमग्गे परिभूदा ।३।

वीरकः। चन्दणआ एत्थ मह संसओ समुप्पण्णो ।४।

चन्दनकः। कधं दे संसओ।१।

वीरकः। सम्भमघग्घरकण्ठो तुमं जादो सि जं तुए भणिदं। १११
दिट्ठो मए अज्जो पुणो अज्जुआ वसन्तसेणेत्ति ॥

एत्थ मे अप्पच्चओ।२।

चन्दनकः। अरे को अप्पच्चओ तुह्म। वअं दक्खिणत्ता अव्वत्तभासिणो खस खत्तिखडो कडत्थो विलअ कण्णाट कण्णप्पावरणअ द्दविड चोल चीण वत्सर खेर खानमुखमधुघातप्रभृतीनां म्लेच्छजातीनां अनेकदेशभाषाभिज्ञा यथेष्टं मन्त्रयामो दिट्ठो दिट्ठा वा अज्जो अज्जुआ वा किं शब्दविचारः स्त्रीपुन्नपुंसकव्याख्यानमप्रस्तुतम्।३।

वीरकः। णं अहं पि पलोएमि राअआणा एसा अहं रण्णो पच्चइदो।४।

चन्दनकः। तत्किमहमप्रत्ययः संवृत्तः। २००

वीरकः। णं सामिणिओओ।५।

चन्दनकः ॥ स्वगतम् ॥ अज्जगोबालदारओ अज्जचारुदत्तस्स पवहणं अहिरुहिअ अवक्कमदि त्ति जइ कहिज्जदि तदो अज्जचारुदत्तो रण्णा सासिज्जइ। ता को एत्थ उवाओ ॥ सुविचिन्त्य ॥ कण्णाटकलहप्पओअं करेमि ॥ प्रकाशम् ॥ अरे वीरअ मए चन्दणकेण पलोइदं पुणो वि तुमं पलोएसि को तुमं।६।

वीरकः। अरे तुमं पि को।७।

चन्दनकः। पूइज्जन्तो माणिज्जन्तो तुमं अप्पणो जादिं ण सुमरेसि।८।

वीरकः ॥ सक्रोधम् ॥ अरे का मह जादी।९।

चन्दनकः। को भणउ।१०। २०१

वीरकः। भणउ।११।

चन्दनकः। अहवा ण भणउ।१२।

जाणन्तो वि हि जादिं तुज्झ ण भणामि सीलविहवेण ।
चिट्ठउ मह च्चिअ मणे किं च कइत्थेण भग्गेण ॥ । १ ।

वीरकः । णं भणाउ भणाउ । २ ।

चन्दनकः ॥ संज्ञां ददाति ॥

वीरकः । अरे किं णेदं । ३ ।

चन्दनकः ।

सिणसिलाअलहत्थो पुरिसाणं कुच्चगण्ठिसण्ठवणो ।
कत्तरिवावडहत्थो तुमं पि सेणावई जादो ॥ । ४ ।

वीरकः । अरे चन्दणआ तुमं पि मानिज्जन्तो अप्पणो केरिकं जादिं ण सुमरेसि । ५ ।

२०२ चन्दनकः । अरे का मह चन्दणअस्स चन्दविसुद्धस्स जादी । ६ ।

वीरकः । भणाउ । ७ ।

चन्दनकः । भणाउ भणाउ । ८ ।

वीरकः ॥ नाट्येन संज्ञां ददाति ॥

चन्दनकः । अरे किं णेदं । ९ ।

वीरकः । अरे सुणाहि सुणाहि ।

तुज्झ वि जादी सुद्धा मादा भेरी पिदा वि दे पडहो ।
दुम्मुहकरडअभादा तुमं पि सेणावई जादो ॥ । १० ।

चन्दनकः ॥ सक्रोधम् ॥ अहं चन्दणओ चम्मारओ । ता पलोएहि पवहणं । ११ ।

वीरकः । अरे पवहणवाहआ परिवत्तावेहि पवहणं पलोइस्सं । १२ ।

चेटः ॥ तथा करोति ॥

२०३ वीरकः । नाट्येन प्रवहणमारोढुमिच्छति ॥

चन्दनकः । सहसा केशेषु गृहीत्वा पातयति पादेन ताडयति ॥

वीरकः ॥ सक्रोधमुत्थाय ॥ अरे अहं तुए वीसत्थो राआणत्तिं करेन्तो सहसा केसेसु गेण्हिअ पादेन ताडिदो। ता सुणु रे अहिअरणमज्झे जदि दे चउरङ्गं ण कप्पावेमि तदा ण होमि वीरओ ।१।

चन्दनकः। अरे राउलं अहिअरणं वा वच्च किं तए सुणहसरिसेण ।२।

वीरकः ॥ तथेति निष्क्रान्तः ॥

चन्दनकः ॥ दिशो ऽवलोक्य ॥ गच्छ रे पवहणवाहआ गच्छ। जइ को वि पुच्छदि तदो भणेसि चन्दणअवीरएहिं अवलोइदं पवहणं वच्चदि। अज्जे वसन्तसेणे इमं च अहिण्णाणं दे देमि ।३।

॥ इति खड्गं प्रयच्छति ॥ २०४

आर्यकः ॥ खड्गं गृहीत्वा सहर्षमात्मगतम् ॥

अये शस्त्रं मया प्राप्तं स्पन्दते दक्षिणो भुजः।
अनुकूलं च सकलं हन्त संरक्षितो ऽप्यहम् ॥

चन्दनकः। अज्जुए।

एत्थ मए विण्णविदा पच्चइदा चन्दणं पि सुमरेसि।
ण भणामि एस लुद्धो णेहस्स रसेण बोल्लामो ॥ ।४।

आर्यकः।

चन्दनश्चन्द्रशीलाढ्यो दैवादद्य सुहृन्मम।
चन्दनं भो स्मरिष्यामि सिद्धादेशस्तथा यदि ॥

चन्दनकः।

अभअं तुह देउ हरो विण्हू बम्हा रवी अ चन्दो अ।
हत्तूण सत्तुवक्खं सुम्भणिसुम्भे जधा देवी ॥ ।५।

चेटः ॥ प्रवहणेन निष्क्रान्तः ॥

चन्दनकः ॥ नेपथ्याभिमुखमवलोक्य ॥ णिक्कमन्तस्स मे पिअवअस्सो सव्वि २०५
लओ पिट्ठदो ज्जेव्व अणुलग्गो गदो। भोदु पधाणदण्डधारओ वीरओ

राग्रपच्चग्रग्रारो विरोधिदो ता जाव ग्रहं पि पुत्तभादरेहिं परिवुदो एदं ज्जेव्व ग्रणुगच्छामि ।१।

॥ इति निष्क्रान्ताः सर्वे ॥

इति मृच्छकटिकायां
प्रवहणविपर्ययो नाम
षष्ठो ऽङ्कः ॥

॥ ततः प्रविशति चारुदत्तो विदूषकश्च ॥ २०६

विदूषकः। भो पेक्ख पेक्ख पुप्फकरण्डअजिण्णुज्जाणस्स सस्सिरीअदं।१।

चारुदत्तः। वयस्य एवमेतत्। तथा हि।

वणिज इव भान्ति तरवः पण्यानीव स्थितानि कुसुमानि।
शुल्कमिव साधयन्तो मधुकरपुरुषाः प्रविचरन्ति॥

विदूषकः। भो इमं असक्कारमणीअं सिलाअलं उवविसदु भवं।२।

चारुदत्तः ॥ उपविश्य ॥ वयस्य चिरयति वर्धमानकः।

विदूषकः। भणिदो मए वड्ढमाणओ वसन्तसेणिअं गेण्हिअ लहुं लहुं आअच्छ त्ति।३।

चारुदत्तः। तत्किं चिरयति।

किं यात्यस्य पुरः शनैः प्रवहणं तस्यान्तरं मार्गते २०७
भग्ने ऽन्ते परिवर्तनं प्रकुरुते छिन्नो ऽथवा प्रग्रहः।
कर्मान्तोत्थितदारुवारितगतिर्मार्गान्तरं याचते
स्वैरं प्रेरितगोयुगः किमथवा स्वच्छन्दमागच्छति॥

प्रविश्य गुप्तार्यकप्रवहणस्थः

चेटः। जाध गोणा जाध।४।

आर्यकः ॥ स्वगतम् ॥

नरपतिपुरुषाणां दर्शनाद्भीतभीतः
सनिगडचरणत्वात्सावशेषापसारः।

अविदितमधिरूढो यामि साधोस्तु याने
परभृत इव नीडे रक्षितो वायसीभिः ॥

अहो नगरात्सुदूरमागतो ऽस्मि तत्किमस्मात्प्रवहणादवतीर्य वृक्षवाटिकागहनं प्रविशामि। उताहो प्रवहणस्वामिनं पश्यामि। अथवा कृतं वृक्षवाटिकागहनेन अभ्युपपन्नवत्सलः खलु तत्रभवानार्यचारुदत्तः श्रूयते तत्प्रत्यक्षीकृत्य गच्छामि।

स तावदस्माद्व्यसनान्नवोत्थितं
निरीक्ष्य साधुः समुपैति निर्वृतिम्।
शरीरमेतद्गतमीदृशीं दशां
धृतं मया तस्य महात्मनो गुणैः ॥

चेटः। इमं तं उज्जाणं जाव उवशप्पामि ॥ उपसृत्य ॥ अज्जमित्तेअ।१।

२०८ विदूषकः। भो पिअं दे णिवेदेमि वड्ढमाणओ मन्तेदि आगदाए वसन्तसेणाए होदव्वं।२।

चारुदत्तः। प्रियं नः प्रियम्।

विदूषकः। दासीएउत्ता किं चिरइदो सि।३।

चेटः। अज्ज मित्तेअ मा कुप्प जाणत्थलके विश्शुमलिदे त्ति कदुअ गदागदं कलेन्ते चिलइदे म्हि।४।

चारुदत्तः। वर्धमानक परिवर्तय प्रवहणम्। सखे मैत्रेय अवतारय वसन्तसेनाम्।

विदूषकः। किं णिअडेण बद्धा से गोडा जेण सअं णोदरदि ॥ उत्थाय प्रवहणमुद्घाट्य ॥ भो ण वसन्तसेणा वसन्तसेणो क्खु एसो।५।

चारुदत्तः। वयस्य अलं परिहासेन न कालमपेक्षते स्नेहः। अथवा स्वयमेवावतारयामि ॥ इत्युत्तिष्ठति ॥

आर्यकः ॥ दृष्ट्वा ॥ अये अयमेव प्रवहणस्वामी न केवलं श्रुतिर

मणीयो दृष्टिरमणीयो ऽपि। हन्त रञ्जितो ऽस्मि।

चारुदत्तः ॥ प्रवहणमधिरुह्य दृष्ट्वा च ॥ अये तत्को ऽयम्। २०१

करिकरसमबाहुः सिंहपीनोन्नतांसः
पृथुतरसमवक्षास्ताम्रलोलायताक्षः।
कथमिदमसमानं प्राप्त एवंविधो यो
वहति निगडयुग्मं पादलग्नं महात्मा ॥

ततः को भवान्।

आर्यकः। शरणागतो गोपालप्रकृतिरार्यको ऽस्मि।

चारुदत्तः। किं घोषादानीय यो ऽसौ राज्ञा पालकेन बद्धः।

आर्यकः। अथ किम्।

चारुदत्तः।

विधिनैवोपनीतस्त्वं चक्षुर्विषयमागतः।
अपि प्राणानहं जह्यां न तु त्वां शरणागतम् ॥

आर्यकः ॥ हर्षं नाटयति ॥

चारुदत्तः। वर्धमानक चरणान्निगडमपनय।

चेटः। जं अज्जो आणबेदि ॥ तथा कृत्वा ॥ अज्ज अबणीदाइं णिअलाइं।१।

आर्यकः। स्नेहमयान्यन्यानि दृढतराणि दत्तानि।

विदूषकः। सङ्गच्छेहि णिअडाइं एसो बि मुक्को अम्हे वज्जिस्सामो।२।

चारुदत्तः। धिक् शान्तम्। २१०

आर्यकः। सखे चारुदत्त अहमपि प्रणयेनेदं प्रवहणमारूढः। तत्क्षन्तव्यम्।

चारुदत्तः। अलंकृतो ऽस्मि स्वयंग्राहप्रणयेन भवता।

आर्यकः। अभ्यनुज्ञातो भवता गन्तुमिच्छामि।

चारुदत्तः। गम्यताम्।

आर्यकः। भवत्ववतरामि।

चारुदत्तः। सखे नावतरितव्यम्। प्रत्ययापनीतसंयमनस्य भवतो अतिलघुसञ्चारा गतिः। सुलभपुरुषसञ्चारे ऽस्मिन्प्रदेशे प्रवहणं विश्वासमुत्पादयति। तत्प्रवहणेनैव गम्यताम्।

आर्यकः। यथाह भवान्।

चारुदत्तः।

क्षेमेण व्रज बान्धवान्।

आर्यकः। ननु मया लब्धो भवान्बान्धवः।

चारुदत्तः।

स्मर्तव्यो ऽस्मि कथान्तरेषु भवता।

आर्यकः। आत्मापि विस्मर्यते।

चारुदत्तः।

त्वां रक्षन्तु पथि प्रयान्तममराः।

आर्यकः। संरक्षितो ऽहं त्वया।

चारुदत्तः।

स्वैर्भाग्यैः परिरक्षितो ऽसि।

आर्यकः। ननु हे तत्रापि हेतुर्भवान्।

चारुदत्तः। यतोद्यते पालके महती रक्षा वर्तते तच्छीघ्रमपक्रामतु भवान्।

२११ आर्यकः। एवं पुनर्दर्शनाय ॥ इति निष्क्रान्तः ॥

चारुदत्तः। कृत्वैवं मनुजपतेर्महद्व्यलीकं
स्थातुं हि क्षणमपि न प्रशस्तमस्मिन्।
॥ दृष्ट्वा ॥ मैत्रेय क्षिप निगडं पुराणकूपे
पश्येयुः क्षितिपतयो हि चारदृष्ट्या।

॥ वामाक्षिस्पन्दनं सूचयित्वा ॥ सखे मैत्रेय वसन्तसेनादर्शनोत्सुको ऽयं जनः। पश्य।

अपश्यतो ऽद्य तां कान्तां वामं स्फुरति लोचनम्।
अकारणपरित्रस्तं हृदयं व्यथते मम॥

तदेहि गच्छावः ॥ परिक्रम्य ॥ कथमभिमुखमनाभ्युदयिकं श्रमणकदर्शनम् ॥ विचार्य ॥ प्रविशत्वयमनेन पथा वयमप्यनेनैव पथा गच्छामः

॥ इति निष्क्रान्ताः सर्वे ॥

इति मृच्छकटिकायां
आर्यकापहरणं नाम
सप्तमो ऽङ्कः॥

॥ ततः प्रविशत्यार्द्रचीवरहस्तो भिक्षुः ॥

भिक्षुः । अज्जा कलेध धम्मशञ्चअं ।

शञ्जम्मध णिअपोटं णिच्चं जग्गेध झाणपडहेण ।
विशमा इन्दिअचोला हलन्ति चिलशञ्चिदं धम्मं ॥

अविअ । अणिच्चदाए पेक्खिअ णवल दाव धम्माण शलण म्हि ।

पञ्चजणा जेण मालिदा इत्थिअ मालिअ गाम लक्खिदे ।
अबले अ चण्डाल मालिदे अवशं शे णल शग्ग गाहदि ॥

शिल मुण्डिदे तुण्ड मुण्डिदे चित्त ण मुण्डिदे कीश मुण्डिदे ।
जाह उण अ चित्त मुण्डिदे शाहु शुश्टु शिल ताह मुण्डिदे ॥

२१३ गिह्निदकशाओदए एशे चीवले जाव एदं लश्टिअशालकाह केलके उज्जाणे पविशिअ पोक्खलिणीए पक्खालिअ लहुं लहुं अवक्कमिश्शं ।१।

॥ परिक्रम्य तथा करोति ॥

नेपथ्ये । चिश्ट ले दुश्ट शमणका चिश्ट चिश्ट ।२।

भिक्षुः ॥ दृष्ट्वा सभयम् ॥ ह्ही अविद ह्ही माणहे । एशे शे लाअशालशण्ठाणे आअदे । एक्केण भिक्खुणा अवलाहे किदे अण्णं पि जह्निं जह्निं भिक्खुं पेक्खदि तह्निं तह्निं गोण व्व णाशं भिन्दिअ ओवाहेदि । ता कह्निं अशलणे शलणं गमिश्शं । अधवा भश्टालके ज्जेव्व बुद्धे मे शलणे ।३।

प्रविश्य साखड्गेन विटेन सह

शकारः । चिश्ट ले दुश्ट शमणका चिश्ट चिश्ट । आबाणअम

ज्झपविश्टश्श विअ लत्तमूलअश्श शीशं ते मोडइश्शं ।१। ॥ इति ताडयति ॥

विटः । काणेलीमातः । न युक्तं निर्वेदधृतकषायं भिक्षुं ताडयितुं २१४ तत्किमनेन । इदं तावत्सुखोपगम्यमुद्यानं पश्यतु भवान् ।

अशरणशरणप्रमोदभूतैर्वनतरुभिः क्रियमाणचारुकर्म ।
हृदयमिव दुरात्मनामगुप्तं नवमिव राज्यमनिर्जितोपभोग्यम् ॥

भिक्षुः । शागदं पशीददु उबाशके ।२।

शकारः । भावे पेक्ख पेक्ख अक्कोशदि मं ।३।

विटः । किं ब्रवीति ।

शकारः । उबाशके त्ति मं भणादि । किं हग्गे णाबिदे ।४।

विटः । बुद्धोपासक इति भवन्तं स्तौति ।

शकारः । थुणु शमणका थुणु ।५।

भिक्षुः । तुमं धण्णे तुमं पुण्णे ।६।

शकारः । भावे धण्णे पुण्णे त्ति मं भणादि । किं हग्गे शलावके कोश्टके कोम्भकाले वा ।७।

विटः । काणेलीमातः । ननु धन्यस्त्वं पुण्यस्त्वमिति भवन्तं स्तौति । २१५

शकारः । भावे ता कीश एशे इध आगदे ।८।

भिक्षुः । चीवलं पक्खालिदुं ।९।

शकारः । अले दुश्ट शमणका एशे मम बहिणीबदिणा शव्वुज्जाणाणं पवले पुप्फकलण्डुज्जाणे दिण्णे । जहिं दाव शुणहका शिआला पाणिअं पिअन्ति हग्गे बि वलपुलिशे मणुश्शके ण ण्हाआमि तहिं तुमं पुक्खलिणीए पुलाणकुलुत्थजूशशवलाइं दुश्शगन्धिआइं चीवलाइं पक्खालेशि । ता तुमं एक्कपहालिअं कलेमि ।१०।

विटः । काणेलीमातः । तथा तर्कयामि यथानेनाचिरप्रव्रजितेन भवितव्यम् ।

शकारः। कथं भावे जाणादि।१।

२१६ विटः। किमत्र ज्ञेयम्। पश्य।

अद्याप्यस्य तथैव केशविरहाद्गौरी ललाटच्छविः
कालस्याल्पतया च चीवरकृतः स्कन्धे न जातः किणः।
नाभ्यस्ता च कषायवस्त्ररचना दूरं निगूढान्तरं
वस्त्रान्तं च पटोच्छ्रयात्प्रशिथिलं स्कन्धे न सन्तिष्ठते॥

भिक्षुः। उबाशके एव्वं अचिलप्पव्वजिदे अ ह्गे।२।

शकारः। ता कीश तुमं जादमेत्तक ज्जेव्व ण पव्वजिदे।३।

॥ इति ताडयति ॥

भिक्षुः। णमो बुद्धश्श।४।

विटः। किमनेन ताडितेन तपस्विना। मुच्यतां गच्छतु।

शकारः। अले चिष्ठ दाव जाव शम्पधालेमि।५।

विटः। केन सार्धम्।

शकारः। अत्तणो हडक्केण।६।

विटः। हन्त न गतः।

शकारः। पुत्तका हडक्का भष्टके पुत्तके एशे शमणके अवि णाम
२१७ किं गच्छदु किं चिष्ठदु ॥ स्वगतम् ॥ णाबि गच्छदु णाबि चिष्ठदु। भावे
भावे शम्पधालिदं मए हडक्केण शह एशे मह हडक्के भणादि।७।

विटः। किं ब्रवीति।

शकारः। माबि गच्छदु माबि चिष्ठदु माबि ऊशशदु माबि णीशशदु इध ज्जेव्व कत्ति पडिअ मलेदु।८।

भिक्षुः। णमो बुद्धश्श शलणागदे म्हि।९।

विटः। गच्छतु।

शकारः। णं शमएण।१०।

विटः। कीदृशः समयः।

शकारः । तधा कद्दमं फेलडु जधा पाणिअं काइलं ण होदि । अधवा पाणिअं पुञ्जीकदुअ कद्दमं फेलडु ।१।

विटः । अहो मूर्खता । २१८

विपर्यस्तमनश्चेष्टैः शिलाशकलवर्ष्मभिः ।
मांसवृक्षैरियं मूर्खैर्भाराक्रान्ता वसुन्धरा ॥

भिक्षुः ॥ नाट्येनाक्रोशति ॥

शकारः । किं भणादि ।२।

विटः । भवन्तं स्तौति ।

शकारः । थुणु थुणु पुणो बि थुणु ।३।

॥ तथा कृत्वा निष्क्रान्तो भिक्षुः ॥

विटः । काणेलीमातः पश्योद्यानस्य शोभाम् ।

अमी हि वृक्षाः फलपुष्पशोभिताः
कठोरनिष्पन्दलतोपवेष्टिताः ।
नृपाज्ञया रक्षिजनेन पालिता
नराः सदारा इव यान्ति निर्वृतिम् ॥

शकारः । शुष्ठु भावे भणादि

बहुकुशुमविचित्तिदा अ भूमी
कुशुमभलेण विणामिदा अ लुक्खा ।
दुमशिहललदा अ वन्दमाणा
पणशफलाइं व वाणला ललन्ति ॥ ।४।

विटः । काणेलीमातः । इदं शिलातलमध्यास्यताम् । २१९

शशारः । एशे म्हि आशिदे ॥ इति विटेन सह उपविशति ॥ भावे अज्ज बि तं वशन्तशेणिअं शुमलामि दुज्जणवअणं विअ हडक्कादो ण ओशलदि ।५।

विटः ॥ स्वगतम् ॥ तथा निरस्तो ऽपि स्मरति ताम् ।

अथवा ।

स्त्रीभिर्विमानितानां कापुरुषाणां विवर्धते मदनः ।
सत्पुरुषस्य स एव तु भवति मृदुर्नैव वा भवति ॥

शकारः । भावे काबि वेला थावलकचेडश्श भणिदश्श पवहणं गेण्हिअ लहुं लहुं आगच्छेशु त्ति । अज्ज बि णाअच्छदि त्ति चिलं म्हि बुभुक्खिदे मज्झण्हे ण शक्कीअदि पादेहिं गन्तुं । ता पेक्ख पेक्ख ।

णहमज्झगदे शूले दुप्पेक्खे कुबिदवाणलशलिच्छे ।
भूमी दढशन्तत्ता हदपुत्तशदेव्व गन्धाली ॥ ।१।

२२० विटः । एवमेतत् ।

छायासु प्रतिमुक्तशष्पकवलं निद्रायते गोकुलं
तृष्णार्तैश्च निपीयते वनमृगैरुष्णं पयः सारसम् ।
सन्तापादतिशङ्कितैर्न नगरीमार्गो नरैः सेव्यते
तप्तां भूमिमपास्य च प्रवहणं मन्ये क्वचित्संस्थितम् ॥

शकारः । भावे ।

शिलशि मम णिलीणे भाव शुज्जश्श पादे
शउणिखगविहङ्गा लुक्खशाखाशु लीणा ।
णलपुलिशमनुश्शा उण्हदीहं शशन्ता
घलशलणणिशण्णा आदवं णिव्वहन्ति ॥

भावे अज्ज वि शे चेडे णाअच्छदि । अधवा अत्तणो विणोदणणिमित्तं किं पि गाइश्शं ॥ इति गायति ॥ भावे भावे शुदं तुए जं मए गाइदं ।२।

विटः । किमुच्यते गन्धर्वो भवान् ।

२२१ शकारः । कधं गन्धव्वे ण भविश्शं ।

हिङ्गुज्जला जीलकभद्दमुस्ते
वचाह गण्ठी शगुडा हशुण्ठी ।

एशे मए शेविद गन्धजुत्ती
कधं ण हग्गे मधुलश्शले त्ति ॥

भावे भावे पुणो बि दाव गाइश्शं ॥ इति तथा करोति ॥ भावे भावे शुदं तुए जं मए गाइदं ।१।

विटः । किमुच्यते गन्धर्वो भवान् ।

शकारः । कधं गन्धव्वे ण भवामि ।

हिङ्गुज्जले दिण्णमलीचचुण्णे
वग्घालिदे तेल्लघिएण मिश्शे ।
भुत्ते मए पालहुदीअमंशे
कधं ण हग्गे मधुलश्शले त्ति ॥

भावे अज्ज बि चेडे णाअच्छदि ।२।

विटः । स्वस्थो भवतु भवान् । सम्प्रत्येवागमिष्यति ।

॥ ततः प्रविशति प्रवहणाधिरूढा वसन्तसेना चेटश्च ॥

चेटः । भीदे क्खु हग्गे मज्झण्हिके शुज्जे मा दाव कुबिदे लाअ २२२
शालश्शण्ठाणे हुविश्शदि । ता तुलिदं वहामि । जाध गोणा जाध ।३।

वसन्तसेना । हद्धी हद्धी ण हु वड्ढमाणअस्स अअं सरसंजोओ । किण्णेदं । किं ण हु अज्जचारुदत्तेण वाहणपरिस्समं परिहरन्तेण अण्णो मणुस्सो अण्णं पवहणं पेसिदं भविस्सदि । फुरदि दाहिणं लोअणं वेबदि मे हिअअं सुण्णाओ दिसाओ सव्वं ज्जेव्व विसण्ठुलं पेक्खामि ।४।

शकारः ॥ नेमिघोषमाकर्ण्य ॥ भावे भावे आगदे पवहणे ।५।

विटः । कथं जानासि ।

शकारः । किं ण पेक्खदि भावे । वुड्ढशूअले विअ घुलघुलाअमाणे लक्खीअदि ।६।

विटः ॥ दृष्ट्वा ॥ साधु लक्षितमयमागतः । २२३

शकारः। पुश्थका थावलका चेडा आगदे शि ।१।

चेटः। अधइं ।२।

शकारः। पवहणे वि आगदे ।३।

चेटः। अधइं ।४।

शकारः। गोणा वि आगदे ।५।

चेटः। अधइं ।६।

शकारः। तुमं पि आगदे ।७।

चेटः ॥ सहासम् ॥ भश्टके अहं पि आगदे ।८।

शकारः। ता पवेशेहि पवहणं ।९।

चेटः। कदलेण मग्गेण ।१०।

२२४ शकारः। एदेण ज्जेव्व पाआलखण्डेण ।११।

चेटः। भश्टके गोणा मलेन्ति पवहणे वि भज्जदि हग्गे वि चेडे मलामि ।१२।

शकारः। अले लाअशालके हग्गे गोणा मले अबले कीणिश्शं पवहणे भग्गे अबलं घडाबइश्शं तुमं मले अबले पवहणवाहके हुविश्शदि ।१३।

चेटः। शव्वं उबबणं हुविश्शदि हग्गे अत्तणकेलके ण हुविश्शं ।१४।

शकारः। अले शव्वं विणश्शदु पाआलखण्डेण ज्जेव्व पवेशेहि पवहणं ।१५।

चेटः। विभज्ज ले पवहणा शमं शामिणा विभज्ज विभज्ज। अण्णे २२५ पवहणे भोदु भश्टके गदुअ णिवेदेमि ॥ प्रविश्य ॥ कधं ण भग्गे भश्टके उवत्थिदे पवहणे ।१६।

शकारः। ण छिण्णा गोणा ण मला लज्जु तुमं पि ण मले ।१७।

चेटः। अधइं ।१८।

शकारः। भाव आगच्छ पवहणं पेक्खामो। भावे तुमं पि मे गुलु पलमगुलु पेक्खीअशि शादलके अब्भन्तलके त्ति पुलक्कलणीए त्ति तुमं दाव पवहणं अग्गदो अहिलुह।१।

विटः। एवं भवतु ॥ इत्यारोहति ॥

शकारः। अधवा चिश्ठ तुमं तुह बप्पकेलके पवहणे जेण तुमं अग्गदो अहिलुहसि। हग्गे पवहणशामी अग्गदो अहिलुहामि।२।

विटः। भवानेवं ब्रवीति। २२६

शकारः। जइ बि हग्गे एवं भणामि तधाबि तुह एशे आदले अहिलुह भश्टक त्ति भणिउं।३।

विटः। आरोहतु भवान्।

शकारः। एशे शम्पदं अहिलुहामि। पुश्थका थावलका चेडा पलिवत्ताबेहि पवहणं।४।

चेटः ॥ परावृत्य ॥ अहिलुहदु भश्टालके।५।

शकारः ॥ अधिरुह्यावलोक्य च त्रासं नाटयित्वा त्वरितमवतीर्य विटं कण्ठे अवलम्ब्य ॥ भावे भावे मडे शि मडे शि पवहणाधिलूढा लक्खशी चोले वा पलिवशदि। ता जइ लक्खशी तदो उभे बि मूशे अध चोले ता उभे बि क्खज्जे।६।

विटः। न भेतव्यं न भेतव्यं कुतो ऽत्र वृषभयाने राक्षससञ्चारः। मा नाम ते मध्याह्नार्कतापच्छिन्नदृष्टेः स्थावरकस्य सकञ्चुकां छायां दृष्ट्वा भ्रान्तिरुत्पन्ना। २२७

शकारः। पुश्थका थावलका चेडा जीवेशि।७।

चेटः। अधइं।८।

शकारः। भावे पवहणाहिलूढा इश्थिआ पडिवशदि ता अवलोएहि।९।

विटः। कथं स्त्री।

अवनतशिरसः प्रयामशीघ्रं
पथि वृषभा इव वर्षताडिताङ्गाः ।
मम हि सदसि गौरवप्रियस्य
कुलजनदर्शनकातरं हि चक्षुः ॥

वसन्तसेना ॥ सविस्मयमात्मगतम् ॥ कधं मम णअणाणं आआसअरो ज्जेव्व राअसालओ । ता संसइद म्हि मन्दभाआ । एसो दाणिं मम मन्दभाइणीए ऊसरक्खेत्तपडिदो विअ बीअमुट्ठी णिप्फलो इध आगमणो संवुत्तो । ता किं एत्थ करइस्सं ।१।

२२८ शकारः । कादले क्खु एशे वुड्ढखोडे पवहणं णावलोएदि । भावे आलोएहि पवहणं ।२।

विटः । को दोषः । भवत्वेवं तावत् ।

शकारः । कधं शिआला उड्डेन्ति वाअशा वज्जेन्ति ता जाव भावे अक्खीहिं भक्खीअदि दन्तेहिं पेक्खीअदि ताव हग्गे पलाइश्शं ।३।

विटः ॥ वसन्तसेनां दृष्ट्वा सविषादमात्मगतम् ॥ कथमये मृगी व्याघ्रमनुसरति । भोः कष्टम् ।

शरच्चन्द्रप्रतीकाशं पुलिनान्तरशायिनम् ।
हंसी हंसं परित्यज्य वायसं समुपस्थिता ॥

॥ जनान्तिकम् ॥ वसन्तसेने न युक्तमिदं नापि सदृशमिदम् ।

पूर्वं मादादवज्ञाय द्रव्यार्थे जननीवशात् ।

वसन्तसेना । ण ॥ इति शिरश्चालयति ॥

२२९ विटः । अशौण्डीर्यस्वभावेन वेशभावेन मन्यते ॥
ननूक्तमेव मया भवतीं प्रति ।

सममुपचर भद्रे सुप्रियं वाप्रियं वा ।

वसन्तसेना । पवहणविपज्जासेण आअदा सरणागद म्हि ।४।

विटः । न भेतव्यं न भेतव्यम् । भवत्वेनं वञ्चयामि ॥ शकारमुपगम्य ॥

काणेलीमातः सत्यं राक्षस्येवात्र प्रतिवसति।

शकारः। भावे भावे जइ लक्खशी पडिवशदि ता कीश ण तुमं मूशेदि अध चोले ता कीश ण तुमं खज्जे।१।

विटः। किमनेन निरूपितेन यदि पुनरुद्यानपरम्परया पद्भ्यामेव नगरीमुज्जयिनीं प्रविशावस्तदा को दोषः स्यात्।

शकारः। एवं किदे किं भोदि।२।

विटः। एवं कृते व्यायामः सेवितो धुर्याणां च परिश्रमः परिहृतो भवति।

शकारः। एवं भोदु। थावलआ चेडा णेहि पवहणं अधवा चि
ष्ठ चिष्ठ। देवदाणं बम्हणाणं च अग्गदो चलणेण गच्छामि। णहि
णहि पवहणं अहिलुहिअ गच्छामि। जेण दूलदो मं पेक्खिअ भ २३०
णिश्शन्ति एशे शे लट्ठिअशाले भट्टालके गच्छदि।३।

विटः ॥ स्वगतम् ॥ दुष्करं विषमौषधीकर्तुम्। भवत्वेवं तावत् ॥ प्रकाशम् ॥ काणेलीमातः एषा वसन्तसेना भवन्तमभिसारयितुमागता।

वसन्तसेना। सन्तं पावं सन्तं पावं।४।

शकारः ॥ सहर्षम् ॥ भावे भावे मं पवलपुलिशं मणुश्शं वाशुदेवाकं।५।

विटः। अथ किम्।

शकारः। तेण हि अपुव्वा शिली शमाशादिदा तश्शिं काले मए लोशाइदा शम्पदं पादेशुं पडिअ पशादेमि।६।

विटः। साध्वभिहितम्।

शकारः। एशे पादेशुं पडेमि ॥ इति वसन्तसेनामुपसृत्य ॥ अत्तिके अम्बि २३१
के शुणु मम विण्णत्तिं।

एशे पडामि चलणेशु विशालणेत्ते
हत्थञ्जलिं दशणहे तव शुद्धदन्ति।।७।

जं तं मए अबकिदं मअणाउलेण
तं खम्मिदा शि वलगत्ति तव म्हि दाशे ॥ ।१।

वसन्तसेना। अवेहि अणज्जं मन्तेसि ।२। ॥ इति पादेन ताडयति ॥

शकारः ॥ सक्रोधम् ॥

जे चुम्बिदे अम्बिकमादुकेहिं
गदे ण देवाण बि जे पणामं।
शे पाडिदे पादतलेण मुण्डे
वणे शिआलेण जधा मिदङ्गे ॥

२३२ अले थावलआ चेडा कहिं तुए एशा शमाशादिदा ।३।

चेटः। भट्टके गामशअलेहिं लुद्धे लाअमग्गे तदो चालुदत्तश्श लुक्खवाडिआए पवहणं थाबिअ तहिं ओदलिअ जाव चक्कवट्टिअं कलेमि ताव एशा पवहणविपज्जाशेण इध आलूढेत्ति तक्केमि ।४।

शकारः। कधं पवहणविपज्जाशेण आगदा ण मं अहिशालिदुं ता ओदल ओदल मम केलकादो पवहणादो। तुमं दलिद्दशत्थवाहपुत्तके अहिशालेशि मम केलिकाइं गोणाइं वाहेशि ता ओदल ओदल गब्भदाशि ओदल ।५।

२३३ वसन्तसेना। तं अज्जचारुदत्तं अहिसारेसि त्ति जं सच्चं अलंकिद म्हि इमिणा वअणेण। सम्पदं जं भोदु तं भोदु ।६।

शकारः। एदेहिं दे दशणक्कुप्पलमण्डलेहिं
हश्तेहिं चाडुशदताडणलम्पडेहिं।
कड्ढामि दे वलतणुं णिअजाणकादो
केशेशु बालिदइअं वि जहा जडाऊ ॥ ।७।

विटः। अग्राह्या मूर्धजेष्वेताः स्त्रियो गुणसमन्विताः।
न लताः पल्लवच्छेदमर्हन्त्युपवनोद्भवाः ॥

तदुत्तिष्ठ त्वहमेनामवतारयामि। वसन्तसेने अवतीर्यताम्।

वसन्तसेना ॥ अवतीर्य एकान्ते स्थिता ॥

शकारः ॥ स्वगतम् ॥ जे शे मम वचणावमाणेण तदा लोशग्गी शन्धुक्खिदे अज्ज एदाए पादप्पहालेणाणेण पज्जलिदे। तं शम्पदं मालेमि णं। भोदु एव्वं दाव ॥ प्रकाशम् ॥ भावे भावे।

जदिच्छशे लम्बदशाविशालं २३४
पावालअं शुत्तशदेहिं जुत्तं।
मंशं च खादुं तह तुश्टि कादुं
चुहू चुहू चुक्कु चुहू चुहू त्ति ॥।१।

विटः। ततः किम्।

शकारः। मम पिअं कलेहि।२।

विटः। वाढं करोमि वर्जयित्वा त्वकार्यम्।

शकारः। भावे भावे अकज्जाह गन्धे बि णत्थि लक्खशिआ बि णत्थि।३।

विटः। उच्यतां तर्हि।

शकारः। मालेहि वशन्तशेणिअं।४।

विटः ॥ कर्णौ पिधाय ॥

बालां स्त्रियं च नगरस्य विभूषणं च
वेश्यामवेशसदृशप्रणयोपचाराम्।
एनामनागसमहं यदि घातयामि
केनोडुपेन परलोकनदीं तरिष्ये ॥

शकारः। अहं ते भेडकं दइश्शं। अणं च विवित्ते उज्जाणे इध २३५
मालन्तं को तुमं पेक्खिश्शदि।५।

विटः। पश्यन्ति मां दश दिशो वनदेवताश्च
चन्द्रश्च दीप्तकिरणश्च दिवाकरो ऽयम्।
धर्मानिलौ च गगनं च तथान्तरात्मा

भूमिस्तथा सुकृतदुष्कृतसाक्षिभूता ॥

शकारः । तेण हि पडन्तीवालिदं कडुअ मालेहि ।१।

विटः । मूर्ख अपध्वस्तो ऽसि ।

शकारः । अधम्मभीलू एशे वुड्ढकोले । भोदु थावलकं चेडं अणुणेमि । पुत्तका थावलका चेडा शोवण्णकडुआइं दे दइश्शं ।२।

चेटः । अहं पि पहिलिश्शं ।३।

शकारः । शोवण्णं दे पीढं कालइश्शं ।४।

२२६ चेटः । अहं पि उवविशिश्शं ।५।

शकारः । शव्वं दे उच्छिट्ठअं दइश्शं ।६।

चेटः । अहं पि खाइश्शं ।७।

शकारः । शव्वचेडाणं महत्तलअं कलइश्शं ।८।

चेटः । भट्टके हुविश्शं ।९।

शकारः । ता मण्णेहि मम वअणं ।१०।

चेटः । भट्टके शव्वं कलइश्शं वज्जिअ अकज्जं ।११।

शकारः । अकज्जाह गन्धे वि णत्थि ।१२।

चेटः । भणादु भट्टके ।१३।

शकारः । एणं वशन्तशेणिअं मालेहि ।१४।

२२७ चेटः । पशीददु भट्टके । इअं मए अणज्जेण अज्जा पवहणपलिवत्तणेण आणीदा ।१५।

शकारः । अले चेडा तवावि ण पहवामि ।१६।

चेटः । पहवदि भट्टके शलीलाह ण चालित्ताह । ता पशीददु भट्टके भाआमि क्खु अहं ।१७।

शकारः । तुमं मम चेडे भविअ कश्श भाआशि ।१८।

चेटः । भट्टके पललोअश्श ।१९।

शकारः । के शे पललोए ।२०।

चेटः। भस्टके शुक्किददुक्किदपलिणामे।१।

शकारः। कीलिशे शुक्किदश्श पलिणामे।२।

चेटः। ज्ञादिशे भस्टके बङ्कशोवण्णमण्डिदे।३। २३८

शकारः। दुक्किदश्श कीलिशे।४।

चेटः। ज्ञादिशे हग्गे पलपिण्डपुस्टके ज्ञादि। ता अकज्जं ण कलइश्शं।५।

शकारः। अले ण मालिश्शशि ॥ इति बहुविधं ताडयति ॥ ।६।

चेटः। पिश्टदु भश्टके मालेदु भश्टके अकज्जं ण कलइश्शं।
जेण म्हि गब्भदाशे विणिम्मिदे भाअधेअदोशेहिं।
अहिअं च ण कीणिश्शं तेण अकज्जं पलिहलामि ॥ ।७।

वसन्तसेना। भाव सरणागद म्हि।८।

विटः। काणेलीमातः। मर्षय मर्षय। साधु स्थावरक साधु। २३९

अप्येष नाम परिभूतदशो दरिद्रः
प्रेष्यः परत्र फलमिच्छति नास्य भर्ता।
तस्मादमी कथमिवाद्य न यान्ति नाशं
ये वर्धयन्त्यसदृशं सदृशं त्यजन्ति ॥

अपि च।

रन्ध्रानुसारी विषमः कृतान्तो यदस्य दास्यं तव चेश्वरत्वम्।
श्रियं त्वदीयां यदयं न भुङ्क्ते यदेतदाज्ञां न भवान्करोति ॥

शकारः ॥ स्वगतम् ॥ अधम्मभीलुए वुड्ढखोडे पललोअभीलू एशे गब्भदाशे। हग्गे लश्टिअशाले कश्श भाआमि वलपुलिशमणुश्शे ॥ प्रकाशम् ॥ अले गब्भदाश चेडे गच्छ तुमं ओवलके पविशिअ वीशन्ते एअन्ते चिश्ट।९।

चेटः। जं भश्टके आणावेदि ॥ वसन्तसेनामुपसृत्य ॥ अज्जुए एत्तिके मे विहवे।१०। ॥ इति निष्क्रान्तः ॥

२४० शकारः ॥ परिकरं बध्नन् ॥ चिश्ठ वशन्तशेणिए मालइश्शं ।१।

विटः । आः ममाग्रतो व्यापादयिष्यति ॥ इति गले गृह्णाति ॥

शकारः भूमौ पतति ॥ भावे भश्टके मालेअदि ॥ इति मोहं ॥ नाटयति ॥ चेतनां लब्ध्वा ॥

शव्वकालं मए पुश्टे मंशेण अ घिएण अ ।
अज्ज कज्जे शमुप्पण्णे जादे मे वैलिए कधं ॥

॥ विचिन्त्य ॥ भोदु लद्धे मए उवाए । दिण्णा वुड्ढखोडेण शिलआलणा शण्णा । ता एदं पेशिअ वशन्तशेणं मालइश्शं । एव्वं दाव ॥ प्रकाशम् ॥ भावे जं तुमं मए भणिदे तं कधं हग्गे एव्वंवड्ढकाह्निं गब्भकुप्पमाणाह्निं कुलेह्निं जादे अकज्जं कलेमि । एव्वं एदं अङ्गीकलाविदुं मए भणिदं ।२।

२४१ विटः । किं कुलेनोपदिष्टेन शीलमेवात्र कारणम् ।
भवन्ति सुतरां स्फीताः सुक्षेत्रे कण्टकिद्रुमाः ॥

शकारः । भावे एशा तव अग्गदो लज्जाअदि ण मं अङ्गीकलेदि । ता गच्छ थावलचेडे मए पिशिठदे गदे वि एशे पलाइअ गच्छदि । ता तं गेण्हिअ आअच्छदु भावे ।३।

विटः ॥ स्वगतम् ॥

अस्मत्समक्षं हि वसन्तसेना शौण्डीर्यभावान्न भजेत मूर्खम् ।
तस्मात्करोम्येष विविक्तमस्या विविक्तविस्रम्भरसो हि कामः ॥

॥ प्रकाशम् ॥ एवं भवतु गच्छामि ।

वसन्तसेना ॥ पटान्ते गृहीत्वा ॥ णं भणामि सरणागद म्हि ।४।

विटः । वसन्तसेने न भेतव्यं न भेतव्यम् । काणेलीमातः वसन्तसेना तव हस्ते न्यासः ।

शकारः । एव्वं मम हश्ते एशा णाशेण चिश्ठदु ।५।

विटः । सत्यम् ।

शकारः। शच्चं।१। २४२

विटः ॥ किञ्चिद्गत्वा ॥ अथवा मयि गते नृशंसो हन्यादेनां तदपवारितशरीरः पश्यामि तावदस्य चिकीर्षितम् ॥ इत्येकान्ते स्थितः ॥

शकारः। भोदु मालिश्शं। अधवा कबडकाबडिके एशे बम्हणे वुड्ढखोडे कदाबि ओवालिदशलीले गडिअ शिआले भविअ कुलभुलिं कलेदि। ता एदश्श वञ्चणाणिमित्तं एव्वं दाव कलइश्शं ॥ कुसुमावचयं कुर्वन्नात्मानं मण्डयति ॥ वाशू वाशू वशन्तशेणिए वशन्तशेणिए एहि।२।

विटः। अये कामी संवृत्तः। हन्त निर्वृतो ऽस्मि गच्छामि ॥ इति निष्क्रान्तः ॥

शकारः।

शुवण्णअं देमि पिअं वदेमि पडेमि शीशेण शवेश्टणेण।
तधाबि मं णेच्छशि शुद्धदन्ति किं शे वअं कश्टमआ मणुश्शा॥।३।

वसन्तसेना। को एत्थ सन्देहो ॥ अवनतमुखी खलचरितमित्यादि श्लोकद्वयं पठति ॥ २४३

खलचरितनिकृष्टजातदोषः
कथमिह मां परिलोभसे धनेन।
सुचरितचरितं विशुद्धदेहं
न हि कमलं मधुपाः परित्यजन्ति॥

यत्नेन सेवितव्यः पुरुषः कुलशीलवान्दरिद्रो ऽपि।
शोभा हि पणस्त्रीणां सदृशजनसमाश्रयः कामः॥

अवि अ। सहआरपादवं सेविअ ण पलासपादवं अङ्गीकरिस्सं।४।

शकारः। दाशीएधीए दलिद्दचालुदत्ताके शहआलपादवे कडे हग्गे उण पलाशे भणिदे किंशुके बि ण कडे। एव्वं तुमं मे गालिं देन्ती अज्ज बि तं ज्जेव्व चालुदत्ताकं शुमलेशि।५।

वसन्तसेना। हिअअगदो ज्जेव्व किं त्ति ण सुमरीअदि।१।

२४४ शकारः। अज्ज वि दे हिअअगदं तुमं च शमं ज्जेव्व मोडेमि। ता दलिद्दशत्थवाहुअमणुश्शकामुकिणि चिश्ट।२।

वसन्तसेना। भण भण पुणो वि सलाहणीआइं एदाइं अक्खराइं।३।

शकारः। पलित्ताअदु दाशीएउत्ते दलिद्दचालुदत्ताके तुमं।४।

वसन्तसेना। परित्ताअदि जदि मं पेक्खदि।५।

शकारः। किं शे शक्के बालिपुत्ते महिन्दे
लम्भापुत्ते कालणेमी शुबन्धू।
लुद्दे लाआ दोणपुत्ते जडाऊ
चाणक्के वा धुन्धुमाले तिशङ्कू॥

२४५ अधवा। एदे वि दे ण लक्खन्ति।
चाणक्केण जधा शीदा मालिदा भालिधे जुगे।
एव्वं दे मोडइश्शामि जडाऊ विअ दोबदिं॥।६।

॥ इति ताडयितुमुद्यतः॥

वसन्तसेना। हा अत्ते कहिं सि। हा अज्जचारुदत्त एसो जणो असम्पुण्णमणोरधो ज्जेव्व विवज्जदि। ता उड्ढं कन्दइस्सं। अधवा वसन्तसेणा उड्ढं कन्ददि त्ति लज्जणीअं क्खु एदं। णमो अज्जचारुदत्तस्स।७।

शकारः। अज्ज वि गब्भदाशी तश्श ज्जेव्व पावश्श णामं गेण्हदि ॥ इति कण्ठे पीडयन्॥ शुमल गब्भदाशि शुमल।८।

वसन्तसेना। णमो अज्जचारुदत्तस्स।९।

२४६ शकारः। मल गब्भदाशि मल।१०। ॥ बाहूयेन कण्ठे निपीडयन्मारयति। वसन्तसेना मूर्छिता पतति निश्चेष्टा॥

शकारः ॥ सहर्षम्॥

एदं दोशकलण्डअं अविणअश्शाबाशभूदं खलं

लत्तं तश्श किलागदश्श लमणे कालागदं आअदं ।
किं एशे शमुदाहलामि णिअअं बाहूण शूलत्तणं
णीशाशे वि मलेइ अम्बअुमला शीदा जधा भालदे ॥
इच्छन्तं मम णेच्छशि त्ति गणिआ लोशेण मे मालिदा
अुणे पुप्फकलण्डके त्ति शहशा पाशेण उत्ताशिदा ।
शे वा वञ्चिदभाडुके मम पिदा मादेव शा दोप्पदी
जे शे पेक्खदि णेदिशं ववशिदं पुत्ताह शूलत्तणं ॥
भोदु शम्पदं वुड्ढखोडे आगमिश्शदि त्ति ता ओशलिअ चिश्ठामि २४७
॥ तथा करोति ॥ ।१।

प्रविश्य चेटेन सह

विटः । अनुनीतो मया स्थावरकश्चेटः । तद्यावत्काणेलीमातरं पश्यामि ॥ परिक्रम्यावलोक्य च ॥ अये मार्ग एव पादयोर्निपतितः । अनेन च पतता स्त्री व्यापादिता । भोः पाप किमिदमकार्यमनुष्ठितं त्वया । तवापि पापिनः पतनात्स्त्रीवधदर्शनेनातीव पातिता वयम् । अनिमित्तमेतत् । यत्सत्यं वसन्तसेनां प्रति शङ्कितं मे मनः । सर्वथा देवताः स्वस्ति करिष्यन्ति ॥ शकारमुपसृत्य ॥ काणेलीमातः एवं मया अनुनीतः स्थावरकश्चेटः ।

शकारः । भावे शाअदं दे पुश्चका थावलका चेडा तवावि शा अदं ।२।

चेटः । अधइं ।३।

विटः । मदीयं न्यासमुपनय ।

शकारः । कीदिशे णाशे ।४।

विटः । वसन्तसेना । २४८

शकारः । गदा ।५।

विटः । क्व ।

शकारः। भावश्श ज्जेव्व पिश्टदो ।१।

विटः ॥ सवितर्कम् ॥ न गता खलु सा तया दिशा।

शकारः। तुमं कदमाए दिशाए गदे ।२।

विटः। पूर्वया दिशा।

शकारः। शावि दक्खिणाए गदा ।३।

विटः। ग्रहं दक्षिणाया।

शकारः। शावि उत्तलाए ।४।

विटः। ग्रत्याकुलं कथयसि न शुध्यति मे ऽन्तरात्मा तत्कथय सत्यम्।

शकारः। शवामि भावश्श शीशं ग्रत्तणकेलकेहिं पादेहिं ता सण्ठावेहि हिग्रग्रं एशा शा मालिदा ।५।

२४१ विटः ॥ सविषादम् ॥ सत्यं त्वया व्यापादिता।

शकारः। जइ मम वग्रणे ण पत्तिग्राग्रशि ता पेक्ख पढमं लश्टिग्रशालशण्ठाणग्राह्न पलक्कमं ।६। ॥ इति दर्शयति ॥

विटः। हा हतो ऽस्मि मन्दभाग्यः ॥ इति मूर्छितः पतति ॥

शकारः। ही ही उवशन्ते भावे ।७।

चेटः। शमश्शशदु शमश्शशदु भावे। ग्रविग्रालिग्रं ग्राणत्तेण मए ज्जेव्व पढमं मालिदा ।८।

विटः ॥ समाश्वस्य सकरुणम् ॥ हा वसन्तसेने।

दाक्षिण्योदकवाहिनी विगलिता याता स्वदेशं रति
र्हाहालंकृतभूषणे सुवदने क्रीडारसोद्भासिनि।
हा सौजन्यनदि प्रहासपुलिने हा मादृशामाश्रये
हा हा नश्यति मन्मथस्य विपणिः सौभाग्यपण्याकरः॥

॥ सास्रम् ॥ कष्टं भोः कष्टम्।

किं नु नाम भवेत्कार्यमिदं येन त्वया कृतम्।

अपापा पापकल्पेन नगरश्रीर्निपातिता ॥

॥ स्वगतम् ॥ अये कदाचिदयं पाप इदमकार्यं मयि संक्रामयेत् । भव २५०
वितो गच्छामि ॥ इति परिक्रामति ॥

शकारः ॥ उपगम्य धारयति ॥

विटः । पाप मां मा स्प्राक्षीः । अलं त्वया गच्छाम्यहम् ।

शकारः । अले वशन्तशेणिअं शअं ज्जेव्व मालिअ मं दूशिअ कहिं पलाअशि । शम्पदं ईदिशे हग्गे अणाधे पाविदे ।१।

विटः । अपध्वस्तो ऽसि ।

शकारः । अत्थशदं दे देमि शुवण्णअं देमि कहावणं देमि शबोडिअं दे देमि । एशे शण्ठाणपलक्कमे शामण्णे भोदु मणुश्शआणं ।२।

विटः । धिक् तवैवास्तु ।

चेटः । शन्तं पावं ।३।

शकारः ॥ हसति ॥

विटः । अप्रीतिर्भवतु विमुच्यतां हि हासो
धिक् प्रीतिं परिभवकारिकामनार्याम् ।
मा भूच्च त्वयि मम सङ्गतं कदाचि
दाछिन्नं धनुरिव निर्गुणं त्यजामि ॥

शकारः । भावे पशीद पशीद एहि णअलीए पविशिअ की २५१
लेम्ह ।४।

विटः । अपतितमपि तावत्सेवमानं भवन्तं
पतितमिव जनो ऽयं मन्यते मामनार्यम् ।
कथमहमनुयायां त्वां हतस्त्रीकमेनं
पुनरपि नगरस्त्रीशङ्कितार्धाक्षिदृष्टम् ॥

॥ सकरुणम् ॥ वसन्तसेने ।

अन्यस्यामपि जातौ मा वेश्या भूस्त्वं हि सुन्दरि ।

चारित्रगुणसम्पन्ने जायेथा विमले कुले ॥

शकारः। मम केलके पुप्फकलण्डकजिण्णुज्जाणे वशन्तशेणिअं मालिअ कहिं पलाअशि। एहि मम आवुत्तश्श अग्गदो ववहालं देहि।१। ॥ इति धारयति ॥

विटः। आस्तिष्ठ जाल्म ॥ इति खड्गमाकर्षति ॥

शकारः ॥ सभयमपसृत्य ॥ किं ले भीदे शि ता आगछ।२।

विटः। न युक्तमवस्थातुम्। यत्रार्यशर्विलकचन्दनकप्रभृतयः सन्ति तत्र गच्छामि ॥ इति निष्क्रान्तः ॥

२५२ शकारः। णिधणं गच्छ। अले थावलका पुश्यका कीलिशे मए कडे।३।

चेटः। भट्टके महन्ते अकज्जे कडे।४।

शकारः। अले चेडे किं भणाशि अकज्जे कडे त्ति। भोदु एव्वं दाव ॥ नानाभरणान्यवतार्य ॥ गेण्ह एदं अलङ्कारअं मए ताव दिण्णे जत्तिके वेले अलङ्कलेमि तत्तिके मम अण्णं तव।५।

चेटः। भट्टके जेव्व एदे शोहन्ति किं मम एदेहिं।६।

शकारः। ता गच्छ एदाइं गोणाइं गेण्हिअ मम केलकाए पाशादबालग्गपदोलिकाए चिष्ठ जाव हग्गे आअच्छामि।७।

२५३ चेटः। जं भट्टके आणवेदि।८। ॥ इति निष्क्रान्तः ॥

शकारः। अत्तपलित्ताणे भावे गदे अदंशणं चेडे वि पाशादबालग्गपदोलिआए णिअलपूलिदं कदुअ थावइश्शं। एव्वं मन्ते लक्खिदे भोदि। ता गच्छामि अधवा पेक्खामि एदं किं एशा मला आदु पुणो वि मालइश्शं ॥ अवलोक्य ॥ कधं शुमला। भोदु एदिणा पावालेण पच्छादेमि णं। अधवा णामङ्किदे एशे ता के वि अज्जपुलिशे पच्चहिजाणादि। भोदु एदिणा वादालीपुञ्जिदेण शुक्खपण्णपुडेण पच्छादेमि ॥ तथा कृत्वा विचिन्त्य ॥ भोदु एव्वं दाव। शम्पदं अधिअलणं गच्छिअ

ववहालं लिहाबेमि। जधा अत्थश्श कालणादो शङ्खवाहपुत्तचालुदत्ताकेण मम केलके पुप्फकलण्डके जिण्णुज्जाणं पवेशिअ वशन्तशेणिआ वावादिदेत्ति।

चालुदत्तविणाशाय कलेमि कबडं णवं।
णअलीए विशुद्धाए पशुघादं व्व दालुणं॥

भोदु गच्छामि ॥ इति निष्क्रम्य दृष्ट्वा सभयम् ॥ अविद मादिके। जेण जेण गच्छामि मग्गेण तेण ज्जेव्व एशे दुट्ठशमणके गहिदकशाओदकं चीवलं गेण्हिअ आगच्छदि। एशे मए णश्शिअवाहिदे कदवेले कदाबि मं पेक्खिअ एदेण मालिद त्ति पआशइश्शदि ता कधं गच्छामि ॥ अवलोक्य ॥ भोदु एदं अद्धपडिदं पाआलखण्डं उल्लङ्घिअ गच्छामि। २५४

एशे म्हि तुलिदतुलिदे लङ्काणअलीए गअण गच्छन्ते।
भूमीए पाआले हणूमशिहले विअ महेन्दे॥ ।१।

॥ इति निष्क्रान्तः ॥ प्रविश्यापटीक्षेपेण २५५

भिक्षुः। पक्खालिदे एशे मए चीवलखण्डे किं णु क्खु शाहाए शुक्खाबइश्शं। इध वाणला विलुप्पन्ति। किं णु क्खु भूमीए धूली दोशे भोदि। ता कहिं पशालिअ शुक्खाबइश्शं ॥ दृष्ट्वा ॥ भोदु इध वादालीपुञ्जिदे शुक्खवत्तशञ्चए एशु पशालइश्शं ॥ तथा कृत्वा ॥ णमो बुद्धश्श ॥ इत्युपविशति ॥ भोदु धम्मक्खलाइं उदाहलामि॥ पञ्चजणा ॥ इत्यादिपूर्वोक्तं पठति ॥ अधवा अलं मम एदेण शग्गेण जाव ताए बुद्धोवाशिआए पच्चुवआलं ण कलेमि जाए दशाणं शुवण्णकाणं किदे जूदिअलेहिं णिक्कीदि तदो पहुदि ताए कीदं विअ अत्ताणअं अवगच्छामि ॥ दृष्ट्वा ॥ किं णु क्खु पण्णोदले शमुश्शशदि। अधवा।

वादादवेण तत्ता चीवलतोएण तिम्मिदा पत्ता।
एदे विथिण्णपत्ता मग्गे पत्ता विअ फुलन्ति॥ ।२।

वसन्तसेना ॥ संज्ञां लब्ध्वा हस्तं दर्शयति ॥

२५६ भिन्नुः। हा हा शुद्धालङ्कालभूशिदे इत्थिआहत्थे णिक्कमदि। कधं दुदिए बि हत्थे ॥ बहुविधं निर्वर्ण्य ॥ पच्चभिआणामि विअ एदं हत्थं। अधवा किं विचालेण। शच्चं शे ज्जेव्व हत्थे जेण मे अभअं दिण्णं। भोदु पेक्खिश्शं ॥ नाट्येनोद्घाट्य दृष्ट्वा प्रत्यभिज्ञाय च ॥ शा ज्जेव्व बुद्धोबाशिआ।१।

वसन्तसेना ॥ पानीयमाकाङ्क्षति ॥

२५७ भिन्नुः। कधं उदअं मग्गेदि। दूले च दिग्घिआ। किं दाणिं एत्थ कलइश्शं। भोदु एदं चीवलं शे उबलि गालइश्शं।२। ॥ तथा करोति ॥

वसन्तसेना ॥ संज्ञां लब्ध्वा उत्तिष्ठति ॥

भिन्नुः ॥ पटान्तेन वीजयति ॥

वसन्तसेना। अज्ज को तुमं।३।

भिन्नुः। किं ण मं शुमलेदि बुद्धोबाशिआ दशशुवण्णणिक्कीदं।४।

वसन्तसेना। सुमरामि ण उण जधा अज्जो भणादि वरं अहं उबरदा ज्जेव्व।५।

भिन्नुः। बुद्धोबाशिए किं णेदं।६।

वसन्तसेना ॥ सनिर्वेदम् ॥ जं सरिसं वेसभावस्स।७।

२५८ भिन्नुः। उट्ठेदु उट्ठेदु बुद्धोबाशिआ। एदं पादबशमीबजादं लदं ओलम्बिअ।८। ॥ इति लतां नामयति ॥

वसन्तसेना ॥ गृहीत्वा उत्तिष्ठति ॥

भिन्नुः। एदश्शिं विहाले मम धम्मबहिणिआ चिश्ठदि तहिं शमश्शशिदमणा भविअ उबाशिआ गेहं गमिश्शदि। ता शणं शणं गच्छदु बुद्धोबाशिआ ॥ इति परिक्रामतः ॥ दृष्ट्वा ॥ ओशलध अज्जा ओशलध एशा तलुणी इत्थिआ एशे भिक्खु त्ति। शुद्धे मम

एशे धम्मे। हत्थशञ्जदमुहशञ्जदइन्दिअशञ्जदे शे क्खु माणुशे किं कलेदि तश्श लाउले पललोअहत्थे णिश्चले। १।

॥ इति निष्क्रान्ताः सर्वे ॥

इति मृच्छकटिकायां

वसन्तसेनामोटनो नाम

अष्टमो ऽङ्कः ॥

२५१ ॥ ततः प्रविशति शोधनकः ॥

शोधनकः । आणत्तम्हि अधिअरणभोइएहिं । अरे सोहणआ ववहारमण्डवं गदुअ आसणाइं सज्जीकरेहि त्ति । ता जाव अधिअरणमण्डवं सज्जिदुं गच्छामि ॥ परिक्रम्यावलोक्य च ॥ एदं अधिअरणमण्डवं ता पविसामि ॥ प्रविश्य सम्मार्ज्यासनमाधाय ॥ विवित्तं कारिदं मए अधिअरणमण्डवं विरइदा मए आसणा ता जाव अधिअरणिआणं उण णिवेदेमि ॥ परिक्रम्यावलोक्य च ॥ कधं एसो रट्ठिअसालो दुट्ठदुज्जणमनुस्सो इदो एव्व आअच्छदि ता दिट्ठिपधं परिहरिअ गमिस्सं ।१। ॥ इत्येकान्ते स्थितः ॥

॥ ततः प्रविशति उज्ज्वलवेशधारी शकारः ॥

२६० शकारः । ण्हादे हं शलिलजलेहिं पाणिएहिं
उज्जाणे उववणकाणणे णिशण्णे ।
णालीहिं शह जुवदीहिं इश्थिकाहिं
गन्धव्वे विअ शुहिदेहिं अङ्गकेहिं ॥

खणेण गण्ठी खण जूलके मे खणेण मे चञ्चलकुन्तले वा ।
खणेण मुक्के खण उद्धचूडे चित्ते विचित्ते हगे लाअशाले ॥

अविअ । विशगण्ठिगब्भपविश्टेण विअ कीडएण अन्तलं मग्गमाणेण पाविदं मए मह्दन्तलं ता कश्श एदं किविणचेश्टिअं पाडइश्शं ॥ स्मृत्वा ॥ आं शुमलिदं मए दलिद्दचालुदत्तश्श एदं किविणचेश्टिअं पाडइश्शं । अण्णं च दलिद्दे क्खु शे तश्श शव्वं शम्भावीअदि । भोदु अधिअलणमण्डवं गदुअ अग्गदो ववहालं लिहावइश्शं

जधा अज्जचालुदत्ताकेण वशन्तशेणिआ मोडिअ मालिदा। ता जाव अधिअलणमण्डवं ज्जेव्व गच्छामि ॥ परिक्रम्यावलोक्य च ॥ एदं तं अधिअलणमण्डवं एत्थ पविशामि ॥ प्रविश्यावलोक्य च ॥ कधं आसणाइं दिण्णाइं चिष्ठन्ति दाव आअश्शन्ति अधिअलणभोइआ एदश्शिं दुव्वचत्तले मुहुत्तअं उबविशिअ पडिबालइश्शं ।१। ॥ इति स्थितः ॥

शोधनकः ॥ अन्यतः परिक्रम्य पुरो दृष्ट्वा ॥ एदे अधिअरणिआ आअच्छ २६१
न्ति। ता जाव उबसप्पामि ।२। ॥ इत्युपसर्पति ॥

॥ ततः प्रविशति श्रेष्ठिकायस्थादिभिः परिवृतो ऽधिकरणिकः ॥

अधिकरणिकः। भो भोः श्रेष्ठिकायस्थौ ।

उभौ। आणबेदु अज्जो ।३।

अधिकरणिकः। अहो व्यवहारपराधीनतया दुष्करं खलु परचित्तग्रहणमधिकरणिकैः ।

छन्नं कार्यमुपक्षिपन्ति पुरुषा न्यायेन दूरीकृतं २६२
स्वान्दोषान्कथयन्ति नाधिकरणे रागाभिभूताः स्वयम् ।
तैः पक्षापरपक्षवर्धितबलैर्दोषैर्नृपः स्पृश्यते
सङ्क्षेपादपवाद एव सुलभो द्रष्टुर्गुणो दूरतः ॥

अपिच।

छन्नं दोषमुदाहरन्ति कुपिता न्यायेन दूरीकृताः
स्वान्दोषान्कथयन्ति नाधिकरणे सन्तो ऽपि नष्टा ध्रुवम् ।
ये पक्षापरपक्षदोषसहिताः पापानि सङ्कुर्वते
सङ्क्षेपादपवाद एव सुलभो द्रष्टुर्गुणो दूरतः ॥

यतः। अधिकरणिकः खलु ।

शास्त्रज्ञः कपटानुसारकुशलो वक्ता च न क्रोधन
स्तुल्यो मित्रपरस्वकेषु चरिते दृष्टे च दत्तोत्तरः ।
क्लीबान्पालयिता शठान्व्यथयिता धर्म्यो न लोभान्वितो

दार्भावे परतन्त्रबद्धहृदयो राज्ञश्च कोपापहः ॥

श्रेष्ठिकायस्थौ। अज्जस्स वि णाम दोस त्ति वुच्चदि। जदि एव्वं
ता चन्दालोए वि अन्धआरो त्ति वुच्चदि ।१।

अधिकरणिकः। भद्र शोधनक अधिकरणमण्डपस्य मार्गमादेशय।
२६३ शोधनकः। एदु एदु अधिअरणभोइओ एदु ।२।

॥ इति परिक्रामन्ति ॥

शोधनकः। एदं अधिअरणमण्डवं ता पविसन्तु अधिअरणभोइ
आ ॥ सर्वे उपविशन्ति ॥ ।३।

अधिकरणिकः। भद्र शोधनक बहिर्निष्क्रम्य ज्ञायतां कः कार्या
र्थीति।

शोधनकः। जं अज्जो आणवेदि ॥ इति निष्क्रम्य ॥ अज्जा अधिअर
णिआ भणन्ति को इध कज्जत्थीति ।४।

शकारः ॥ सहर्षम् ॥ उवत्थिए अधिअलणिए ॥ साटोपं परिक्रम्य ॥ हग्गे
वलपुलिशे मणुश्शे वाशुदेवे लष्ठिअशाले लाअशाले कज्जत्थी ।५।

शोधनकः ॥ ससम्भ्रमम् ॥ ही मादिके पढमं ज्जेव्व रट्ठिअशालो क
२६४ ज्जत्थी। भोदु अज्ज मुहुत्तअं चिट्ठ दाव अधिअरणिआणं णिवेदेमि
॥ उपगम्य ॥ अज्जा एसो क्खु रट्ठिअशालो कज्जत्थी ववहालं उवत्थिदो ।६।

अधिकरणिकः। कथं प्रथममेव राष्ट्रियश्यालः कार्यार्थी। यथा
सूर्योदये उपरागो महापुरुषनिपातमेव कथयति। शोधनक व्याकुले
नाद्य व्यवहारेण भवितव्यम्। भद्र निष्क्रम्योच्यतां गच्छाद्य न दृश्यते
तव व्यवहार इति॥

शोधनकः। जं अज्जो आणवेदि। ॥ इति निष्क्रम्य शकारमुपगम्य ॥ अज्ज
अधिअरणिआ भणन्ति। अज्ज गच्छ ण दीसदि तव ववहारो ।७।

शकारः ॥ सक्रोधम् ॥ किं ण दीशदि मम ववहाले। जइ ण दी
शदि तदो आवुत्तं लाआणं पालअं बहिणीवदिं विणविअ बहिणिं

अत्तिकं च विषाबिअ एदं अधिअलणिअं फेलइश्शं अणं अधिअलणिअं ठाबइश्शं ।१। ॥ इति गन्तुमिच्छति ॥

शोधनकः। अज्ज रट्ठिअसालअ मुहुत्तअं चिट्ठ दाव अधिअरणि २६५ आणं णिवेदेमि ॥ अधिकरणिकमुपगम्य ॥ एसो रट्ठिअसालो कुबिदो भणादि ।२। ॥ इति तदुक्तं भणति ॥

अधिकरणिकः। सर्वमस्य मूर्खस्य सम्भाव्यते। तदुच्यतामागच्छ दृश्यते तव व्यवहारः।

शोधनकः ॥ शकारमुपगम्य ॥ अज्ज अधिअरणिआ भणन्ति आअच्छ दीसदि तव ववहारो ता पविसदु अज्जो ।३।

शकारः ॥ सहर्षमात्मगतम् ॥ हो पढमं भणादि ण दीशदि शम्पदं दीशदि त्ति ता णाम भीदभीदा अधिअलणभोइआ ह्रेत्तिअं हग्गे भणिश्शं तेत्तिअं पत्तिआबइश्शं। भोदु पविशामि ॥ प्रविश्योपसृत्य च ॥ शुशुहं अम्हाणं तुम्हाणं पि शुहं देमि ण देमि च ।४।

अधिकरणिकः ॥ स्वगतम् ॥ अहो स्थिरसंस्कारता व्यवहारार्थिनः २६६ ॥ प्रकाशम् ॥ उपविश्यताम्।

शकारः। आं अत्तणकेलका मे भूमी ता जहिं मे लोअदि तहिं उबविशामि ॥ श्रेष्ठिनं प्रति ॥ एश उबविशामि ॥ शोधनकं प्रति ॥ ण एत्थ उबविशामि ॥ इति अधिकरणिकमस्तके हस्तं दत्वा ॥ एत्थ उबविशामि ।५। ॥ इति भूमावुपविशति ॥

अधिकरणिकः। भवान्कार्यार्थी।

शकारः। अध इं ।६।

अधिकरणिकः। तत्कार्यं कथय।

शकारः। कण्णे कज्जं कधइश्शं। एअंवड्डके गल्लकुप्पमाणाह कुले हग्गे जादे।

लाअशशुले मम पिदा लाआ तादश्श होइ जामादा। २६७

लाअश्शालए कग्गे ममाबि बहिणीवई लाआ ॥ । १ ।

अधिकरणिकः । सर्वं ज्ञायते ।

किं कुलेनोपदिष्टेन शीलमेवात्र कारणम् ।
भवन्ति नितरां स्फीताः सुक्षेत्रे कण्टकद्रुमाः ॥

तदुच्यतां कार्यम् ।

शकारः । एव्वं भणामि । अवलद्धाह बि ण अ मे किंपि कलइश्शदि । तदो तेण बहिणीबदिणा पलितुश्टेण मे कीलिदुं लक्खिदुं शव्वुज्जाणाणं पवले पुप्फकलण्डकजिण्णुज्जाणे दिण्णे तहिं च पेक्खिदुं अणुदिणं शोशाबेदुं शोधाबेदुं पोश्टाबेदुं लुणाबेदुं गच्छामि। देव्वजोएण पेक्खामि ण पेक्खामि वा इत्थिआशलीलं णिबडिदं । २ ।

२६८ अधिकरणिकः । अथ ज्ञायते का स्त्री विपन्नेति ।

शकारः । हंहो अधिअलणभोइआ किंत्ति ण आणामि तं तादिशिं णअलमण्डणं कञ्चणशदभूशणिअं । केणाबि कुपुत्तेण अत्थकल्लवत्तश्श कालणादो शुण्णं पुप्फकलण्डकजिण्णुज्जाणं पविशिअ बाहुपाशबलक्कालेण वसन्तशेणिआ मालिदा । ण मए । ३ । ॥ इत्यर्धोक्ते मुखमावृणोति ॥

अधिकरणिकः । अहो नगररक्षिणां प्रमादः । भो श्रेष्ठिकायस्थौ न मयेति व्यवहारपदं प्रथममभिलिख्यताम् ।

कायस्थः । जं अज्जो आणवेदि ॥ तथा कृत्वा ॥ अज्ज लिहिदं । ४ ।

शकारः ॥ स्वगतम् ॥ ही मादिके । उत्तलाअन्तेण विअ पाअशपिण्डलकेण अज्ज मए अत्ता एव्व णिपाशिदो। भोदु एव्वं दाव ॥ प्रकाशम् ॥ अहो अधिअलणभोइआ णं भणामि मए ज्जेव्व दिश्टा। किं कोलाहलं कलेध । ५ । ॥ इति पादेन लिखितं प्रोञ्छति ॥

२६९ अधिकरणिकः । कथं त्वया ज्ञातं यथा खल्वर्थनिमित्तं बाहुपाशेन व्यापादिता ।

शकारः । हंहो णूणं शूणशूणगीवालिआए णीअवणकेहिं आद्लणट्ठाणेहिं तक्केमि ।१।

श्रेष्ठिकायस्थौ । जुज्जादि विअ ।२।

शकारः ॥ स्वगतम् ॥ दिष्टिआ पच्चुवजीविद म्हि अविद मादिके ।३।

श्रेष्ठिकायस्थौ । कं एसो ववहारो अवलम्बदि ।४।

अधिकरणिकः । इह हि द्विविधो व्यवहारः ।

श्रेष्ठिकायस्थौ । केरिसो ।५।

अधिकरणिकः । वाक्यानुसारेण अर्थानुसारेण च । यस्तावद्वाक्यानुसारेण स अर्थिप्रत्यर्थिभ्यः । यश्चार्थानुसारेण स अधिकरणिक २७०
बुद्धिनिष्पाद्यः ।

श्रेष्ठिकायस्थौ । ता वसन्तसेणामादरं अवलम्बदि ववहारो ।६।

अधिकरणिकः । एवमिदम् । भद्र शोधनक वसन्तसेनामातरमनुद्वेजयन्नाह्वय ।

शोधनकः ॥ इति निष्क्रम्य गणिकाया मात्रा सह प्रविश्य ॥ एदु एदु अज्जा ।७।

वृद्धा । गदा मे दारिआ मित्तहरअं अत्तणो जोव्वणं अणुभविदुं । एसो उण दीहाऊ भणादि आअच्छ अधिअरणिओ सद्दावेदि ता मोहपरवसं विअ अत्ताणअं अवगच्छामि हिअअं मे थरहरेदि । अज्ज आदेसेहि मे अधिअरणमण्डवस्स मग्गं ।८।

शोधनकः । एदु एदु अज्जा ।९। ॥ उभौ परिक्रामतः ॥

शोधनकः । एदं अधिअरणमण्डवं । एत्थ पविसदु अज्जा ।१०। २७१

॥ इत्युभौ प्रविशतः ॥

वृद्धा ॥ उपसृत्य ॥ सुहं तुम्हाणं भोदु भावमिस्साणं ।११।

अधिकरणिकः । भद्रे स्वागतमास्यताम् ।

वृद्धा । तधा ।१२। ॥ इत्युपविष्टा ॥

शकारः ॥ साक्षेपम् ॥ आगदाशि वुड्ढकुट्टणि आगदाशि ।१३।

अधिकरणिकः। अये त्वं किल वसन्तसेनामाता।

वृद्धा। अधइं।१।

अधिकरणिकः। अथेदानीं वसन्तसेना क्व गता।

वृद्धा। मित्तघरअं।२।

अधिकरणिकः। किन्नामधेयं तस्या मित्रम्।

वृद्धा ॥ स्वगतम् ॥ अदिलज्जणीअं क्खु एदं ॥ प्रकाशम् ॥ जणस्स पुच्छणीओ अअं अत्थो ण उण अधिअरणिअस्स।३।

२७२ अधिकरणिकः। अलं लज्जया व्यवहारस्त्वां पृच्छति।

श्रेष्ठिकायस्थौ। ववहारो पुच्छदि ण एत्थ दोसो कधेहि।४।

वृद्धा। कधं ववहारो। ता सुणन्तु अज्जमिस्सा। सो क्खु सत्थवाहविणअदत्तस्स णत्तिओ साअरदत्तस्स तणओ सुगहिदणामहेओ अज्जचारुदत्तो णाम सेट्ठिचत्तरे पडिवसदि तहिं मे दारिआ जोव्वणसुहं अणुभवदि।५।

शकारः। शुदं अज्जेहिं। लिहीअन्तु एदे अक्खला चालुदत्तेण शह मम विवादे।६।

श्रेष्ठिकायस्थौ। चारुदत्तो मित्तो त्ति णत्थि दोसो।७।

अधिकरणिकः। व्यवहारो ऽयं चारुदत्तमवलम्बते।

श्रेष्ठिकायस्थौ। एव्वं विअ।८।

२७३ अधिकरणिकः। धनदत्त वसन्तसेना आर्यचारुदत्तस्य गृहं गतेति लिख्यतां व्यवहारस्य प्रथमः पादः। कथमार्यचारुदत्तो ऽप्यस्माभिराह्वाययितव्यः। अथवा व्यवहारस्तमाह्वयति। भद्र शोधनक गच्छ आर्यचारुदत्तं स्वैरमसम्भ्रान्तमनुद्विग्नं सादरमाहूय प्रस्तावेनाधिकरणिकस्त्वां द्रष्टुमिच्छतीति।

शोधनकः। जं अज्जो आणवेदि ॥ इति निष्क्रान्तश्चारुदत्तेन सह प्रविश्य च ॥ एदु एदु अज्जो।९।

चारुदत्तः ॥ विचिन्त्य ॥

परिज्ञातस्य मे राज्ञा शीलेन च कुलेन च ।
यत्सत्यमिदमाह्वानमवस्थामभिशङ्कते ॥

॥ सवितर्कं स्वगतम् ॥

ज्ञातो नु किं स खलु बन्धनविप्रयुक्तो
मार्गागतः प्रवहणेन मयापनीतः ।
चारेक्षणस्य नृपतेः श्रुतिमागतो वा
येनाहमेवमभियुक्त इव प्रयामि ॥

अथवा किं विचारितेन । अधिकरणमण्डपमेव गच्छामि । भद्र शोधनक अधिकरणस्य मार्गमादेशय ।

शोधनकः । एदु एदु अज्जो ।१। ॥ इति परिक्रामतः ॥

चारुदत्तः ॥ सशङ्कम् ॥ तत्किमपरम् । २७४

रूक्षस्वरं वाशति वायसो ऽयममात्यभृत्या मुहुराह्वयन्ति ।
सव्यं च नेत्रं स्फुरति प्रसह्य ममानिमित्तानि हि खेदयन्ति ॥

शोधनकः । एदु एदु अज्जो सैरं असम्भन्तं ।२।

चारुदत्तः ॥ परिक्रम्याग्रतो ऽवलोक्य च ॥

शुष्कवृक्षस्थितो ध्वाङ्क्ष आदित्याभिमुखस्तथा ।
मयि चोदयते वामं चक्षुर्घोरमसंशयम् ॥

॥ पुनरन्यतो ऽवलोक्य ॥ अये कथमयं सर्पः ।

मयि विनिहितदृष्टिर्भिन्ननीलाञ्जनाभः
स्फुरितविततजिह्वः शुक्लदंष्ट्राचतुष्कः ।
अभिपतति सरोषो जिह्मिताध्मातकुक्षि
र्भुजगपतिरयं मे मार्गमाक्रम्य सुप्तः ॥

अपि चेदम् ।

स्खलति चरणं भूमौ न्यस्तं न चार्द्रतमा मही

स्फुरति नयनं वामो बाहुर्मुहुश्च विकम्पते ।
शकुनिरपरश्चायं तावद्विरौति हि नैकशः
कथयति महाघोरं मृत्युं न चात्र विचारणा ॥

सर्वथा देवताः स्वस्ति करिष्यन्ति ।

शोधनकः । एदु एदु अज्जो इमं अधिअरणमण्डवं पविसदु अज्जो ।१।

२७५ चारुदत्तः ॥ प्रविश्य समन्तादवलोक्य ॥ अहो अधिकरणमण्डपस्य पराश्रीः । इह हि ।

चिन्तासक्तनिमग्नमन्त्रिसलिलं दूतोर्मिशङ्खाकुलं
पर्यन्तस्थितचारनक्रमकरं नागाश्वहिंस्राश्रयम् ।
नानावाशककङ्कपक्षिरुचिरं कायस्थसर्पास्पदं
नीतिक्षुण्णतटं च राजभवनं हिंस्रैः समुद्रायते ॥

भवतु ॥ प्रविशन् शिरोघातमभिनीय सवितर्कम् ॥ अहह इदमपरम् ।

सव्यं मे स्पन्दते चक्षुर्विरौति वायसस्तथा ।
पन्थाः सर्पेण रुद्धो ऽयं स्वस्ति चास्मासु दैवतः ॥

तावत्प्रविशामि ॥ इति प्रविशति ॥

अधिकरणिकः । अयमसौ चारुदत्तो य एषः ।

घोणोन्नतं मुखमपाङ्गविशालनेत्रं
नैतद्धि भाजनमकारणदूषणानाम् ।
नागेषु गोषु तुरगेषु तथा नरेषु
न ह्याकृतिः सुसदृशं विजहाति वृत्तम् ॥

चारुदत्तः । भो अधिकृतेभ्यः स्वस्ति । हंहो नियुक्ता अपि कुशलं भवताम् ।

अधिकरणिकः ॥ ससम्भ्रमम् ॥ स्वागतमार्यस्य । भद्र शोधनक आर्यस्यासनमुपनय ।

शोधनकः ॥ आसनमुपनीय ॥ एदं आसनं एत्थ उबविसदु अज्जो ।१। २७६

चारुदत्तः ॥ उपविशति ॥

शकारः ॥ सक्रोधम् ॥ आगदे शि ले इश्थिआघादआ आगदे शि। अहो णाए ववहाले अहो धम्मे ववहाले जं एदाह इश्थिआघाद आह आशणे दीअदि ॥ सगर्वम् ॥ भोदु णं दीअदु ।२।

अधिकरणिकः। आर्य चारुदत्त अस्ति भवतो ऽस्या आर्याया दुहित्रा सह प्रसक्तः प्रणयः प्रीतिर्वा।

चारुदत्तः। कस्याः।

अधिकरणिकः। अस्याः ॥ इति वसन्तसेनामातरं दर्शयति ॥

चारुदत्तः ॥ उत्थाय ॥ आर्ये अभिवादये।

वृद्धा। जाद चिरं मे जीव ॥ स्वगतम् ॥ अअं सो चारुदत्तो सुणिक्खित्तं क्खु दारिआए जोव्वणं ।३।

अधिकरणिकः। आर्य गणिका तव मित्रम्।

चारुदत्तः ॥ लज्जां नाटयति ॥

शकारः। २७७

लज्जाए भीलुदाए वा चालित्तं अलिए णिगूहदु।
सअं मालिअ अत्थकालणा एणिं गेण्हदि तं ण भश्टके ॥ ।४।

श्रेष्ठिकायस्थौ। अज्ज चारुदत्त भणाहि अलं लज्जाए ववहारो क्खु एसो ।५।

चारुदत्तः। भो अधिकृता मया कथमीदृशं वक्तव्यं गणिका मम मित्रमिति। अथवा यौवनमत्रापराध्यति न चारित्र्यम्।

अधिकरणिकः।

व्यवहारः सविघ्नो ऽयं त्यज लज्जां हृदि स्थिताम्।
ब्रूहि सत्यमलं धैर्यं छलमत्र न गृह्यते ॥

अलं लज्जया व्यवहारस्त्वां पृच्छति।

चारुदत्तः। अधिकृत केन सह मम व्यवहारः।

शकारः ॥ साटोपम् ॥ अए मए शह ववहाले ।१।

चारुदत्तः। त्वया सह मम व्यवहारः सुदुःसहः।

२७८ शकारः। अए इश्थिआघादआ लअणशदभूशणिअं वशन्तशेणिअं मालिअ शम्पदं कवडकावडिके भविअ णिगूहेशि ।२।

चारुदत्तः। असम्बद्धः खल्वसि।

अधिकरणिकः। आर्य चारुदत्त अलमनेन ब्रूहि सत्यमपि गणिका तव मित्रम्।

चारुदत्तः। एवमेवम्।

अधिकरणिकः। आर्य वसन्तसेना क्व।

चारुदत्तः। गृहं गता।

श्रेष्ठिकायस्थौ। कधं गदा कदा गदा गच्छन्ती वा केण अणुगदा।३।

चारुदत्तः। ॥ स्वगतम् ॥ किं प्रच्छन्नं गतेति ब्रवीमि।

श्रेष्ठिकायस्थौ। अज्ज कधेहि ।४।

चारुदत्तः। गृहं गता किमन्यद्ब्रवीमि।

२७९ शकारः। मम केलकं पुप्फकलण्डकजिण्णुज्जाणं पवेशिअ अत्थ णिमित्तं बाहुपाशबलक्कालेण मालिदा अए शम्पदं वदशि घलं गदे त्ति ।५।

चारुदत्तः। आः असम्बद्धप्रलापिन्।

अभ्युक्षितो ऽसि सलिलैर्न वलाहकानां
चापाग्रपक्षसदृशं भृशमन्तरा ते।
मिथ्यैतदाननमिदं भवतस्तथाहि
हेमन्तपद्ममिव निष्प्रभतामुपैति॥

अधिकरणिकः ॥ जनान्तिकम् ॥

तुलनं चाद्रिराजस्य समुद्रस्य च तारणम्।

ग्रहणं चानिलस्येव चारुदत्तस्य दूषणम् ॥

॥ प्रकाशम् ॥ आर्यचारुदत्तः स्वल्वसौ कथमकार्यं करिष्यति ॥ घोषोत्यादि पठति ॥

शकारः । किं पक्खवादेण ववहाले दीशदि ।१।

अधिकरणिकः । अपेहि मूर्ख ।

वेदार्थान्प्राकृतस्त्वं वदसि न च ते जिह्वा निपतिता
मध्याह्ने वीक्षसे ऽर्कं न तव सहसा दृष्टिर्विचलिता ।
दीप्ताग्नौ पाणिमन्तः क्षिपसि न च ते तत्क्षणं दह्यते ऽसौ २८०
चारित्र्याच्चारुदत्तं चलयसि न ते देहं हरति भूः ॥

आर्यचारुदत्तः कथमकार्यं करिष्यति ।

कृत्वा समुद्रमुदकोच्छ्रयमात्रशेषं
दत्तानि येन हि धनान्यनपेक्षितानि ।
स श्रेयसां कथमिवैकनिधिर्महात्मा
पापं करिष्यति धनार्थमवैरिजुष्टम् ॥

शकारः । किं पक्खवादेण ववहाले दीशदि ।२।

वृद्धा । हदास जो दाणिं णासीकदं सुवण्णभण्डअं रत्तिं चोरेहिं अवहिद त्ति तस्स कारणादो चउस्समुद्दसारभूदं रअणावलिं देदि सो दाणिं अत्थकारणादो इमं अकज्जं करेदि । हा जाद एहि मे पुत्ति ।३।

॥ इति रोदिति ॥

अधिकरणिकः । आर्य चारुदत्त किमसौ पद्भ्यां गता उत प्रवहणेनेति ।

चारुदत्तः । ननु मम प्रत्यक्षं न गता । तन्न जाने किं पद्भ्यां गता उत प्रवहणेनेति ।

प्रविश्य सामर्षः २८१

वीरकः ।

पादप्पहारपरिभवविमाणणालद्धगरुअवेरस्स ।
अणुसोअन्तस्स इअं कधंपि रत्ती पभादा मे ॥

ता जाव अधिअरणमण्डवं उवसप्पामि ॥ प्रविष्टकेन ॥ सुहं अज्जमिस्साणं ।१।

अधिकरणिकः । अये नगररक्षाधिकृतो वीरकः । वीरक किमागमनप्रयोजनम् ।

वीरकः । ही ही बन्धणभेअणसम्भमे अज्जकं अण्णेसन्तो ओहारिअं पवहणं वच्चदि त्ति विआरं करेन्तो अण्णेसन्तो अरे तुए वि आलोइदे मए वि आलोइदव्वो त्ति भणन्तो ज्जेव्व चन्दणमहत्तरएण पादेण ताडिदो म्हि । एदं सुणिअ अज्जमिस्सा पमाणं ।२।

२८२ अधिकरणिकः । भद्र जानीषे कस्य तत्प्रवहणमिति ।

वीरकः । इमस्स अज्जचारुदत्तस्स वसन्तसेणा आरूढा पुप्फकरण्डकजिण्णुज्जाणं कीलिदुं णीअदि त्ति पवहणवाहएण कहिदं ।३।

शकारः । पुणो वि शुदं अज्जमिश्शेहिं ।४।

अधिकरणिकः ।

एष भो निर्मलज्योत्स्नो राहुणा ग्रस्यते शशी ।
जलं कूलावपातेन प्रसन्नं कलुषायते ॥

वीरक पश्चादिह भवतो न्यायं द्रक्ष्यामः । य एष अधिकरणे द्वारेऽश्वस्तिष्ठति तमेनमारुह्य गत्वा पुष्पकरण्डकोद्यानं दृश्यतामस्ति तत्र काचित्स्त्री विपन्ना न वेति ।

वीरकः । जं अज्जो आणवेदि ॥ इति निष्क्रान्तः प्रविश्य च ॥ गदो म्हि तहिं दिट्ठं च मए इत्थिआकलेवरं सावदेहिं विलुप्पन्तं ।५।

श्रेष्ठिकायस्थौ । कधं तुए जाणिदं इत्थिआकलेवरं त्ति ।६।

२८३ वीरकः । सावसेसेहिं केसहत्थपाणिपादेहिं उवलक्खिदं मए ।७।

अधिकरणिकः । अहो धिग्वैषम्यं लोकव्यवहारस्य ।

यथा यथेदं निपुणं विचार्यते तथा तथा सङ्कटमेव दृश्यते ।
अहो सुसन्ना व्यवहारनीतयो मतिस्तु गौः पङ्कगतेव सीदति ॥

चारुदत्तः । ॥ स्वगतम् ॥

यथैव पुष्पं प्रथमे विकाशे समेत्य पातुं मधुपाः पतन्ति ।
एवं मनुष्यस्य विपत्तिकाले छिद्रेष्वनर्था बहुलीभवन्ति ॥

अधिकरणिकः । आर्य चारुदत्त सत्यमभिधीयताम् ।

चारुदत्तः ।

दुष्टात्मा परगुणमत्सरी मनुष्यो
रागान्धः परमिह हन्तुकामबुद्धिः ।
किं यो यद्वदति मृषैव जातिदोषा-
त्तद्ग्राह्यं भवति न तद्विचारणीयम् ॥

अपि च । यो ऽहं लतां कुसुमितामपि पुष्पहेतो-
राकृष्य नैव कुसुमावचयं करोमि ।
सो ऽहं कथं भ्रमरपक्षरुचौ सुदीर्घे
केशे विगृह्य रुदतीं प्रमदां निहन्मि ॥

शकारः । हंहो अधिअलणभोइआ किं तुम्हे पक्खबादेण ववहालं पेक्खध जेण अज्ज वि एशे हदाशचालुदत्ते आशणे धालीअ २८४
दि । १ ।

अधिकरणिकः । भद्र शोधनक । एवं क्रियताम् ।

शोधनकः ॥ तथा करोति ॥

चारुदत्तः । विचार्यतां भो अधिकृता विचार्यताम् ॥ इति आसनादवतीर्य भूमौ उपविशति ॥

शकारः ॥ स्वगतं सहर्षं नर्तित्वा ॥ ही अणेण मए कडे पावे अप्पणश्श मश्तके निबडिदे । ता जहिं चालुदत्तके उबविशादि तहिं हग्गे

उवविशामि ॥ तथा कृत्वा ॥ चालुदत्ता पेक्ख पेक्ख मं ता भण भण मए मालिद त्ति ।१।

चारुदत्तः । भो अधिकृताः ॥ दुष्टात्मेति पूर्वोक्तं पठति ॥ सनिश्वासं स्वगतम् ॥

मैत्रेय भोः किमिदमद्य ममोपघातो
हा ब्राह्मणि द्विजकुले विमले प्रसूता ।
हा रोहसेन न हि पश्यसि मे विपत्तिं
मिथ्यैव नन्दसि परव्यसनेन नित्यम् ॥

२८५ प्रेषितश्च मया तद्वार्तान्वेषणाय मैत्रेयो वसन्तसेनासकाशं शकटिकानिमित्तं च तस्य प्रदत्तान्यलङ्करणानि प्रत्यर्पयितुम् । तत्कथं चिरयते ।

॥ ततः प्रविशति गृहीताभरणो विदूषकः ॥

विदूषकः । पेसिदो म्हि अज्जचारुदत्तेण वसन्तसेणासआसं तहिं अलङ्करणाइं गेण्हिअ जधा अज्ज मित्तिअ वसन्तसेणाए वच्छो रोहसेणो अत्तणो अलङ्कारेण अलङ्करिअ जणणीसआसं पेसिदो इमस्स आहरणं दादव्वं ण उण गेण्हिदव्वं ता समप्पेहि त्ति। ता जाव वसन्तसेणासआसं ज्जेव्व गच्छामि ॥ परिक्रम्यावलोक्य आकाशे ॥ कधं भावरेभिलो। भो भाव रेभिल किण्णिमित्तं तुमं उव्विग्गउव्विग्गो विअ लक्खीअसि ॥ आकर्ण्य ॥ किं भणासि । अज्जचारुदत्तो अधिअरणं सद्दाविअदि त्ति ता ण हु अप्पेण कज्जेण होदव्वं ॥ विचिन्त्य ॥ ता पच्छा वसन्तसेणागेहं गमिस्सं । अधिअरणमण्डवं दाव गमिस्सं ॥ परिक्रम्यावलोक्य च ॥ इदं अधिअरणमण्डवं ता जाव पविसामि ॥ प्रविश्य ॥ सुहं अधिअरणभोइआणं कहिं मम पिअवअस्सो ।२।

२८६ अधिकरणिकः । नन्वेष तिष्ठति ।

विदूषकः । वअस्स सोत्थि भोदु ।३।

चारुदत्तः । भविष्यति ।

विदूषकः । अवि क्खेमं दे ।४।

चारुदत्तः । एतदपि भविष्यति ।

विदूषकः । भो वअस्स किंणिमित्तं उण उव्विग्गउव्विग्गो विअ लक्खीअसि । कुदो वा सद्दाइदो ।१।

चारुदत्तः । वयस्य ।

मया खलु नृशंसेन परलोकमजानता ।
स्त्रीरतिश्चाविशेषेण शेषमेषो ऽभिधास्यति ॥

विदूषकः । किं किं । २८७

चारुदत्तः ॥ कर्णे ॥ एवमिति ।

विदूषकः । को एव्वं भणादि ।२।

चारुदत्तः ॥ सञ्ज्ञया शकारं निर्दिशति ॥ नन्वेष तपस्वी हेतुभूतः कृतान्तो मां व्याहरति ।

विदूषकः । एदं कीस ण भणीअदि गेहं गद त्ति ।३।

चारुदत्तः । उच्यमानमपि अवस्थादोषान्न गृह्यते ।

विदूषकः । भो भो अज्जा जेन दाव पुरट्ठावणविहारारामदेउलेहिं तडागकूवेहिं अलङ्किदा उज्जअणी सो अत्थकल्लवत्तकारणादो ईदिसं अकज्जं अणुचिट्ठदि त्ति ॥ सक्रोधम् ॥ अरे रे काणेलीसुदा राअसालसण्ठाणआ उस्सङ्खलआ किदजणदोसभण्डआ बहुसुवण्णमण्डिदमक्कडआ भण भण मम अग्गदो जो दाणिं मम पिअवअस्सो कुसुमिदं माधवीलदं पि आअड्ढिअ कुसुमावचअं ण करेदि कदाबि आअड्ढिदाए पल्लवच्छेदो भोदि त्ति सो कधं एरिसं अकज्जं उहअलोअविरुद्धं करेदि । चिट्ठ रे कुट्टणीउत्ता चिट्ठ चिट्ठ जाव एदिणा तव हिअअकुडिलेण दण्डअट्ठेण मत्थअं दे सदखण्डं करेमि ।४।

शकारः ॥ सक्रोधम् ॥ शुणान्तु शुणान्तु अज्जमिश्शा । चालुदत्ताकेण २८८
शह मम विवादे ववहाले वा ता कीश एशे काकपदशीशमश्तके मम शिले शदखण्डे कलेशि । मा दाव ले दाशीएउत्ता दुश्टवडुव्वका ।५।

विदूषकः ॥ दण्डकाष्ठमुद्यम्य पूर्वोक्तं पठति ॥

शकारः ॥ सक्रोधमुत्थाय ताडयति ॥

विदूषकः ॥ प्रतीपं ताडयति । अन्योन्यं ताडयतः । विदूषकस्य कक्षादेशादाभरणानि पतन्ति ॥

२८९ शकारः ॥ तानि गृहीत्वा दृष्ट्वा ससाध्वसम् ॥ पेक्खन्तु अज्जा एदे क्खु ताए तबश्शिणीए केलका अलङ्कारा ॥ चारुदत्तमुद्दिश्य ॥ इमश्श अत्थकल्लवत्तश्श कालणा एशा मालिदा वाबादिदा अ ।१।

॥ अधिकरणिकाः सर्वे अधोमुखाः स्थिताः ॥

चारुदत्तः ॥ जनान्तिकम् ॥

अयमेवंविधे काले दृष्टो भूषणविस्तरः ।
अस्माकं भाग्यवैषम्यात्पतितः पातयिष्यति ॥

विदूषकः । भो कीस भूदत्थं ण णिवेदीअदि ।२।

चारुदत्तः । वयस्य ।

दुर्बलं नृपतेश्चक्षुर्नैतत्तत्त्वं निरीक्षते ।
केवलं वदतो दैन्यमश्लाघ्यं मरणं भवेत् ॥

अधिकरणिकः । कष्टं भोः कष्टम् ।

अङ्गारकविरुद्धस्य प्रक्षीणस्य बृहस्पतेः ।
ग्रहो ऽयमपरः पार्श्वे धूमकेतुरिवोत्थितः ॥

२९० श्रेष्ठिकायस्थौ ॥ वसन्तसेनामातरमुद्दिश्य ॥ अवहिदा दाव अज्जा एदं सुवण्णभण्डअं अवलोएदु सो ज्जेव्व एसो ण वेत्ति ।३।

वृद्धा ॥ विलोक्य ॥ संरिसो एसो ण उण सो ।४।

शकारः । आं वुड्ढकुट्टणि अक्खीहिं मन्तिदं वाआए मूकिदं ।५।

वृद्धा । हदास अबेहि ।६।

श्रेष्ठिकायस्थौ । अप्पमत्तं कधेहि सो ज्जेव्व एसो ण वेत्ति ।७।

वृद्धा । अज्ज सिप्पिकुसलदाए ओबन्धेदि दिट्ठिं ण उण सो ।८।

अधिकरणिकः। भद्रे अपि जानास्येतान्याभरणानि।

वृद्धा। णं भणामि। ण हु ण हु अणभिजाणिदो अहवा कदा २११ वि सिप्पिणा घडिदो भवे।१।

अधिकरणिकः। पश्य श्रेष्ठिन्।

वस्त्वन्तराणि सदृशानि भवन्ति नूनं
रूपस्य भूषणगुणस्य च कृत्रिमस्य।
दृष्ट्वा क्रियामनुकरोति हि शिल्पिवर्गः
सादृश्यमेव कृतहस्ततया च दृष्टम्॥

श्रेष्ठिकायस्थौ। अज्जचारुदत्तस्स केरकाइं एदाइं।२।

चारुदत्तः। न खलु न खलु।

श्रेष्ठिकायस्थौ। ता कस्स।३।

चारुदत्तः। इहात्रभवत्या दुहितुः।

श्रेष्ठिकायस्थौ। कधं एदाइं ताए विओअं गदाइं।४।

चारुदत्तः। एवं गतानि अां इदम्।

श्रेष्ठिकायस्थौ। अज्ज चारुदत्त एत्थ सच्चं वत्तव्वं। पेक्ख पेक्ख।

सच्चेण सुहं खु लब्भइ सच्चालाबि ण होइ पादई। २१२
सच्चं त्ति दुवे बि अक्खरा मा सच्चं अलिएण गूहेहि॥।५।

चारुदत्तः। आभरणान्याभरणानीति न जाने किं त्वस्मद्गृहादानीतानीति जाने।

शकारः। उज्जाणं पवेशिअ पढमं मालेशि कवडकावडिआए शम्पदं णिगूहेशि।६।

अधिकरणिकः। आर्य चारुदत्त सत्यमभिधीयताम्।

इदानीं सुकुमारे ऽस्मिन्निःशङ्कं कर्कशाः कशाः।
तव गात्रे पतिष्यन्ति सहास्माकं मनोरथैः॥

चारुदत्तः। अपापानां कुले जाते मयि पापं न विद्यते।
यदि सम्भाव्यते पापमपापेन च किं मया ॥

॥ स्वगतम् ॥ न च मे वसन्तसेनाविरहितस्य जीवितेन कृत्यम् ॥ प्रकाशम् ॥ भोः किं बहुना।

मया किल नृशंसेन लोकद्वयमजानता।
स्त्रीरत्नञ्च विशेषेण शेषमेषो ऽभिधास्यति ॥

२१३ शकारः। वाबादिदा अले तुमं पि भण वाबादिदेत्ति ।१।

चारुदत्तः। त्वयैवोक्तम्।

शकारः। शुणेध शुणेध भट्टालका एदेण मालिदा। एदेण ज्जेव्व शंशए छिण्णे एदश्श दलिद्दचालुदत्ताह शालीले दण्डे ण धालीअदु।२।

अधिकरणिकः। शोधनक यथाह राष्ट्रियः। भो राजपुरुषा गृह्यतामयं चारुदत्तः ॥ राजपुरुषा गृह्णन्ति ॥

वृद्धा। पसीदन्तु पसीदन्तु अज्जमिस्सा जो दाणिं चोरेहिं अवहदस्स ॥ इत्यादि पूर्वोक्तं पठति ॥ ता जदि वाबादिदा मम दारिआ तदा वि जीअदु मे दीहाऊ। अण्णंच। अत्थिप्पच्चत्थिणं ववहारो। अहं अत्थिणी ता मुञ्चध एदं ।३।

२१४ शकारः। अबेहि गब्भदाशि गच्छ किं तव एदिणा ।४।

अधिकरणिकः। आर्ये गम्यताम्। हे राजपुरुषा निष्क्रामयतैनाम्।

वृद्धा। हा जाद हा पुत्तअ ।५। ॥ इति रुदती निष्क्रान्ता ॥

शकारः ॥ स्वगतम् ॥ कडं मए एदश्श अत्तणो शलिशं शम्पदं गच्छामि ।६। ॥ इति निष्क्रान्तः ॥

अधिकरणिकः। आर्य चारुदत्त निर्णये वयं प्रमाणं शेषे राजा तथापि शोधनक विज्ञाप्यतां राजा पालकः।

अयं हि पातकी विप्रो न वध्यो मनुरब्रवीत्।
राष्ट्रादस्मात्तु निर्वास्यो विभवैरक्षतैः सह ॥

शोधनकः। जं अज्जो आणवेदि ॥ इति निष्क्रम्य पुनः प्रविश्य सास्रम् ॥ अज्जा गद म्हि। तहिं रास्रा पालअो भणादि जेण अत्थकल्लवत्तस्स कारणादो वसन्तसेणा वाबादिदा तं तहिं ज्जेव्व आहरणाइं गले बन्धिअ डिण्डिमं ताडिअ दक्खिणमसाणं णइअ सूले भञ्जेध त्ति। जो को वि अवरो एरिसं अकज्जं अणुचिट्ठदि सो एदिणा सणिआरदण्डेण सासीअदि।१।

चारुदत्तः। अहो अविमृश्यकारी राजा पालकः। २१५

अथवा। ईदृशे व्यवहाराग्नौ मन्त्रिभिः परिपातिताः।
स्थाने खलु महीपाला गच्छन्ति कृपणां दशाम् ॥

अपिच। ईदृशैः श्वेतकाकीयै राज्ञः शासनदूषकैः।
अपापानां सहस्राणि हन्यन्ते च हतानि च ॥

सखे मैत्रेय गच्छ मद्वचनादम्बामपश्चिममभिवादयस्व। पुत्रं च मे रोहसेनं परिपालयस्व।

विदूषकः। मूले छिन्ने कुदो पादवस्स परिपालणं।२।

चारुदत्तः। मा मैवम्।

नृणां लोकान्तरस्थानां देहप्रतिकृतिः सुतः।
मयि यो यस्तव स्नेहो रोहसेने स युज्यताम् ॥

विदूषकः। अहं ते पिअवअस्सो भविअ तुए विरहिदं पाणाइं धारेमि।३।

चारुदत्तः। रोहसेनमपि तावद्दर्शय। २१६

विदूषकः। एव्वं जुज्जदि।४।

अधिकरणिकः। भद्र शोधनक अपसार्यतामयं बटुः।

शोधनकः ॥ तथा करोति ॥

अधिकरणिकः। कः को ऽत्र भोश्चाण्डालानां दीयतामादेशः।

॥ इति चारुदत्तं विसृज्य निष्क्रान्ताः सर्वे राजपुरुषाः ॥

शोधनकः। इदो आअच्छदु अज्जो ।१।

चारुदत्तः ॥ सकरुणम् ॥ मैत्रेय भोः किमिदम् ॥ इत्यादि पठति। आकाशे ॥

विषसलिलतुलाग्निप्रार्थिते मे विचारे
क्रकचमिह शरीरे वीक्ष्य दातव्यमद्य।
अथ रिपुवचनाद्वा ब्राह्मणं मां निहंसि
पतसि नरकमध्ये पुत्रपौत्रैः समेतः ॥

अयमागतो ऽस्मि।

॥ इति निष्क्रान्ताः सर्वे ॥

इति मृच्छकटिकायां
व्यवहारो नाम
नवमो ऽङ्कः ॥

॥ ततः प्रविशति चाण्डालद्वयेनानुगम्यमानश्चारुदत्तः ॥ २१७

उभौ। तक्किण कलश्र कालण णववह्बन्धणश्रणे णिउणा।
श्रइलेण शीशछेश्रणशूलालोबेसु कुशल म्ह॥

श्रोशलध श्रज्जा श्रोशलध। एशे श्रज्जचालुदत्ते।
दिणकलवीलदामे गह्दिदे श्रम्हेहिं वज्झपुलिशेहिं।
दीवे व्व मन्दणेहे थोश्रं थोश्रं खश्रं जाइ॥।१।

चारुदत्तः ॥ सविषादम् ॥

नयनसलिलसिक्तं पांशुरूक्षीकृताङ्गं
पितृवनसुमनोभिर्वेष्टितं मे शरीरम्।
विरसमिह रटन्तो रक्तगन्धानुलिप्तं
बलिमिव परिभोक्तुं वायसास्तर्कयन्ति॥

चाण्डालौ। श्रोशलध श्रज्जा श्रोशलध। २१८
किं पेक्खध शप्पुलिशं वज्झन्तं कालपलशुधलएहिं।
शुश्रणशउणाधिवाशं शज्जणपुलिशद्दुमं एदं॥
श्राश्रच्छ ले चालुदत्ता श्राश्रच्छ।२।

चारुदत्तः। पुरुषभाग्यानामचिन्त्याः खलु व्यापारा यदहमीदृशीं दशामनुप्राप्तः।

सर्वगात्रेषु विन्यस्तै रक्तचन्दनहस्तकैः।
पिष्टचूर्णावकीर्णश्च पुरुषो ऽहं पशूकृतः॥

॥ अग्रतो निरूप्य ॥ श्रहो तारतम्यं नराणाम्।
श्रमी हि दृष्ट्वा मम देहमेतं मर्त्यं धिगस्त्वित्युपजातखेदाः।

अशक्नुवन्तः परिरक्षितुं मां स्वर्गं लभस्वेति वदन्ति पौराः ॥

चाण्डालौ । ओशलध अज्जा ओशलध । किं पेक्खध ।

इन्दे पवाहिअन्ते गोप्पशवे शङ्कमं च तालाणं ।
शुपुलिशपाणविपत्ती चत्तालि इमे ण दट्ठव्वा ॥ ।१।

२९९ एकः । हण्डे आहिन्ता पेक्ख पेक्ख ।

णअलीपधाणभूदे वज्झीअन्ते कदन्तअणाए ।
किं लुअदि अन्तलिक्खे आदु अणब्भे पडदि वज्जे ॥ ।२।

द्वितीयः । अले ले गोहा ।

ण अ लुअदि अन्तलिक्खे णोअ अणब्भे पडदि वज्जे ।
महिलाशमूहमेहे णिवडइ णअणम्बुधालाहिं ॥

। अविअ ।

वज्झम्मि णीअमाणे जणश्श शव्वश्श लोदमाणश्श ।
णअणशलिलेहिं शित्ते लच्छादो ण उणमइ लेणू ॥ ।३।

चारुदत्तः ॥ निरूप्य सकरुणम् ॥

एताः पुनर्हर्म्यगताः स्त्रियो मां वातायनार्धेन विनिःसृतास्याः ।
हा चारुदत्तेत्यभिभाषमाणा बाष्पं प्रणालीभिरिवोत्सृजन्ति ॥

३०० चाण्डालौ । आअच्छ ले चालुदत्ता आअच्छ इमं घोशणट्ठाणं । आहणेध डिण्डिमं घोशेध घोशणं ।४।

उभौ । शुणाध अज्जा शुणाध । एशे शत्थवाहविणअदत्तश्श णत्तिके शाअलदत्तश्श पुत्तके अज्जचालुदत्ते णाम । एदिणा किल अकज्जकालिणा गणिआ वशन्तशेणा अत्थकल्लवत्तश्श कालणादो शुण्णं पुप्फकलण्डअजिण्णुज्जाणं पवेशिअ बाहुपाशबलक्कालेण मालिद त्ति । एशे शलोत्ते गहिदे शअं अ पडिवण्णे । तदो लण्णा पालएण अम्हे आणत्ता एदं मालेदुं । जदि अवले ईदिशं उहअलोअविलुद्धं अकज्जं कलेदि तं पि लाआ पालए एव्वं ज्जेव्व शाशदि ।५।

चारुदत्तः ॥ सनिर्वेदं स्वगतम् ॥

मखशतपरिपूतं गोत्रमुद्भासितं मे ३०१
सदसि निबिडचैत्यब्रह्मघोषैः पुरस्तात् ।
मम मरणदशायां वर्तमानस्य पापै-
स्तदसदृशमनुष्यैर्घुष्यते घोषणायाम् ॥

॥ उद्वीक्ष्य कर्णौ पिधाय ॥ हा वसन्तसेने ।

शशिविमलमयूखशुभ्रदन्ति
सुरुचिरविद्रुमसन्निभाधरोष्ठि ।
तव वदनभवामृतं निपीय
कथमवशो ह्ययशोविषं पिबामि ॥

उभौ । ओशलध अज्जा ओशलध ।
एशे गुणलअणणिही शज्जणदुक्खाण उत्तलणशेदू ।
अशुवण्णं मण्डणअं अवणीअदि अज्ज णअलीदो ॥
। अण्णं च ।
शव्वे क्खु होइ लोए लोए शुहशंठिदाण तत्तिल्ला ।
विणिवडिदाण णलाणं पिअआली दुल्लहो होदि ॥ ।१।

चारुदत्तः ॥ सर्वतो ऽवलोक्य ॥ ३०२

अमी हि वस्त्रान्तररुद्धवक्त्राः
प्रयान्ति मे दूरतरं वयस्याः ।
परो ऽपि बन्धुः समसंस्थितस्य
मित्रं न कश्चिद्विषमस्थितस्य ॥

चाण्डालौ । ओशालणं कदं विविक्तं लाअमग्गं । ता आणेध एदं दिण्णवज्झचिण्हं ।२।

चारुदत्तः । मैत्रेय भोः किमिदम् ॥ इत्यादि पठति ॥

नेपथ्ये । हा ताद हा पिअवअस्स ।३।

चारुदत्तः ॥ आकर्ण्य सकरुणम् ॥ भोः स्वजातिमहत्तर इच्छाम्यहं भवतः सकाशात्प्रतिग्रहं कर्तुम् ।

चाण्डालौ । किं अम्हाणं हत्थादो पडिग्गहं कलेशि ।१।

चारुदत्तः । शान्तं पापं नापरीक्ष्यकारी दुराचारः पालक इव चाण्डालः । तत्परलोकार्थं पुत्रमुखं द्रष्टुमभ्यर्थये ।

चाण्डालौ । एव्वं कलीअदु ।२।

३०३ नेपथ्ये । हा ताद हा आवुक ।३।

चारुदत्तः ॥ श्रुत्वा सकरुणम् ॥ भोः स्वजातिमहत्तर ॥ इत्यादि पठति ॥

चाण्डालौ । आअच्छदु ।

अपरः । आअच्छदु ।४।

उभौ । अले पउला खणं अन्तलं देध एशे अज्जचालुदत्ते पुत्तमुहं पेक्खदु ॥ नेपथ्याभिमुखम् ॥ अज्ज इदो इदो । आअच्छ ले दालआ आअच्छ ।५।

॥ ततः प्रविशति दारकमादाय विदूषकः ॥

विदूषकः । तुवरदु तुवरदु भद्दमुहो पिदा दे मारिदुं णीअदि ।६।

दारकः । हा ताद हा आवुक ।७।

विदूषकः । हा पिअवअस्स कहिं मए तुमं पेक्खिदव्वो ।८।

चारुदत्तः ॥ पुत्रं मित्रं च वीक्ष्य ॥ हा पुत्र हा मैत्रेय ॥ सकरुणम् ॥ भोः कष्टम् ।

चिरं खलु भविष्यामि परलोके पिपासितः ।
अत्यल्पमिदमस्माकं निवापोदकभोजनम् ॥

३०४ किं पुत्राय प्रयच्छामि ॥ आत्मानं वीक्ष्य यज्ञोपवीतं दृष्ट्वा ॥ आं इदं तावदस्ति मम च ।

अमौक्तिकमसौवर्णं ब्राह्मणानां विभूषणम् ।
देवतानां पितॄणां च भागो येन प्रदीयते ॥

॥ इति यज्ञोपवीतं ददाति ॥

चाण्डालः । आगच्छ ले चालुदत्ता आगच्छ ।१।

द्वितीयः । अले अज्जचालुदत्तं णिलुबबदेण णामेण आलबेशि । अले पेक्ख ।

अब्भुदए अवशाणे तहेअ लत्तिन्दिवं अहदमग्गा ।
उद्दामेव्व किशोली णिअदी खु पडिच्छिदं जादि ॥

। अणं च ।

शुक्खा वत्तदेशा शे किं पणमिअमत्थएण कादव्वं ।
लाहुगहिदे वि चन्दे ण वन्दणीए जणपदश्श ॥ ।२।

बालकः । अरे रे चण्डालआ कहिं आवुकं णेध ।३। ३०५

चारुदत्तः । वत्स ।

अंसेन बिभ्रत्करवीरमालां स्कन्धेन शूलं हृदयेन शोकम् ।
आघातमद्याहमनुप्रयामि शामित्रमालब्धुमिवाध्वरे ऽजः ॥

चाण्डालः ।

णहु अम्हे चण्डाला चण्डालउलम्मि जादपुव्वा वि ।
जे अहिभवन्ति शाहुं ते पावा ते अ चण्डाला ॥ ।४।

दारकः । ता कीस मारेध आवुकं ।५।

चाण्डालः । अत्त लाअणिओओ क्खु अबलज्झदि ण हु अम्हे ।६।

दारकः । वावादेध मं मुञ्चध आवुकं ।७।

चाण्डालः । एवं भणन्ते चिलं मे जीव ।८। ३०६

चारुदत्तः ॥ सास्रं पुत्रं कण्ठे गृहीत्वा ॥

इदं तत्स्नेहसर्वस्वं सममाढ्यदरिद्रयोः ।
अचन्दनमनौशीरं हृदयस्यानुलेपनम् ॥

। अंसेन बिभ्रत् ॥ इत्यादि पुनः पठति । अवलोक्य स्वगतम् ॥

। अमी हि वस्त्रान्तनिरुद्धवक्त्रा ॥ इत्यादि पुनः पठति ॥

विदूषकः । भो भद्दमुहा मुञ्चेध पिअवअस्सं चारुदत्तं मं वा

बादेध ।१।

चारुदत्तः। शान्तं पापम् ॥ दृष्ट्वा स्वगतम् ॥ अत्रगच्छामि। समस्थित ॥ इत्यादि पठति। प्रकाशम् ॥

॥ एताः पुनर्हर्म्यगताः स्त्रियो माम् ॥ इत्यादि पुनः पठति ॥

चाण्डालः। ओशलध अज्जा ओशलध।

किं पेक्खध शप्पुलिशं अजशवशेण पणट्ठजीवाशं।
कूवम्मि खुडिदपाशं कञ्चणकलशं व्व डुब्बन्तं ॥ ।२।

चारुदत्तः ॥ सकरुणम् ॥ शशिविमलमयूख ॥ इत्यादि पठति ॥

२०७ अपरः। अले पुणो वि घोशेह्नि ।३।

चाण्डालः ॥ तथा करोति ॥

चारुदत्तः। प्राप्तोऽहं व्यसनकृतां दशामनार्यां
यत्रेदं फलमपि जीवितावसानम्।
एषा च व्यथयति घोषणा मनो मे
श्रोतव्यं यदिदमसौ त्वया हतेति ॥

ततः प्रविशति प्रासादस्थो बद्धः

स्थावरकः। घोषणामाकर्ण्य सवैक्लव्यम् ॥ कधं अपावे चालुदत्ते वावादी अदि। हग्गे णिअलेण शामिणा बन्धिदे। भोदु अक्कन्दामि। शुणाध अज्जा शुणाध। एत्थ दाणिं मए पावेण पवहणपलिवत्तेण पुप्फकलण्डकजिण्णुज्जाणं वशन्तशेणा णीदा। तदो मम शामिणा मं ण कामेशि त्ति कडुअ बाहुपाशबलक्कालेण मालिदा ण उण एदिणा अज्जेण। कधं विदूलदाए ण को वि शुणादि। ता किं कलेमि। अत्ताणअं पाडेमि ॥ विचिन्त्य ॥ जदि एव्वं कलेमि तदा अज्जचालुदत्ते ण वावादी अदि। भोदु इमादो पाशादबालग्गपदोलिकादो एदिणा जिण्णगवक्खेण अत्ताणअं णिक्खिवामि। वलं हग्गे उअलदे ण उण एशे कुलउत्तविहगाणं वाशपादवे अज्जचालुदत्ते। एव्वं जइ विवज्जामि लद्धे मए

पललोए ॥ इत्यात्मानं पातयित्वा ॥ ही ही णं ऽणा ऽबलदम्हि भग्गे मे दण्डणिअले। ता चण्डालघोशं शमणेशामि ॥ दृष्ट्वोपसृत्य ॥ हंहो २०८
चण्डाला अन्तलं अन्तलं ।१।

चाण्डालौ। अले के अन्तलं मग्गेदि ।२।

चेटः। शृणवन्तु ॥ इति पूर्वोक्तं पठति ॥

चारुदत्तः। अये।

को ऽयमेवंविधे काले कालपाशस्थिते मयि।
अनावृष्टिहते शस्ये द्रोणमेघ इवोत्थितः ॥

भोः श्रुतं भवद्भिः।

न भीतो मरणादस्मि केवलं दूषितं यशः। २०९
विशुद्धस्य हि मे मृत्युः पुत्रजन्मसमो भवेत् ॥

अन्यच्च। तेनास्म्यकृतवैरेण क्षुद्रेणात्यल्पबुद्धिना।
शरेणेव विषाक्तेन दूषितेनापि दूषितः ॥

चाण्डालौ। थावलअ अबि शच्चं भणाशि ।३।

चेटः। शच्चं कुग्गे त्ति मा कश्श बि कधइश्शशि त्ति पाशादबालग्गपदोलिआए दण्डणिअलेण बन्धिअ णिक्खित्ते ।४।

प्रविश्य

शकारः ॥ सहर्षम् ॥

मंशेण तिक्खाम्बिलकेण भत्ते शाकेण शूपेण शमच्छकेण।
भुत्तं मए अत्तणअश्श गेहे शालिश्शकूलेण गुलोदणेण ॥

॥ कर्णं दत्वा ॥ भिण्णकंशखंखणाए चण्डालवाआए शलशंजोए जधा अ एशे उक्खालिदे वज्झडिण्डिमशद्दे पडहाण अ शुणीअदि तधा तक्केमि दलिद्दचालुदत्ताके वज्झट्ठाणं णीअदि त्ति। ता पेक्खिश्शं। शत्तुविणाशे णाम मह्हले हलअश्श पलिदोशे होदि। शुदं च मए जे बि किल शत्तुं वाबादअन्तं पेक्खदि तश्श अण्णाशिं जम्मन्तले अक्खि

लोगे ण होदि। मए क्खु विशगण्ठिगब्भपविश्टेण विश्र कीडएण
३१० किं पि श्रत्तलं मग्गमाणेण उप्पाडिदे ताह्र दलिद्दचालुदत्ताह्र वि
णाशे। शम्पदं श्रत्तणकेलिकाए पाशादबालग्गपदोलिकाए श्रहिलु
हिश्र श्रत्तणो पलक्कमं पेक्खामि ॥ तथा कृत्वा दृष्ट्वा च ॥ ही ही एदाह्र
दलिद्दचालुदत्ताह्र वज्कं णीश्रमाणाह्र एवड्डे जणशम्मद्दे जं वेलं श्र
म्हालिशे पवले वलमणुश्शे वज्कं णीश्रदि तं वेलं कीदिशं भवे
॥ निरीक्ष्य ॥ कधं एशे शे णववलद्दके विश्र मण्डिदे दक्खिणं दिशं
णीश्रदि। श्रध किंणिमित्तं मम केलिकाए पाशादबालग्गपदोलिकाए
शमीवे घोशणा णिबडिदा णिवालिदा श्र ॥ विलोक्य ॥ कधं थावलक
चेडे बि णत्थि इध। मा णाम तेण इदो गदुश्र मन्तभेदे कडे भवीश्र
दि। ता जाव णं श्रण्णेशामि।१। ॥ इति श्रवतीर्योपसर्पति ॥

३११ चेटः ॥ दृष्ट्वा ॥ भट्टालका एशे शे श्रागदे।२।

चाण्डालौ।

श्रोशलध देध मग्गं दालं ढक्केध होध तुण्हीश्रा।
श्रविणश्रतिक्खविशाणे दुट्ठवइल्ले इदो एदि॥।३।

शकारः। श्रले ले श्रत्तलमत्तलं देध ॥ उपसृत्य ॥ पुश्यका थावलका चेडा एहि गच्छम्ह।४।

३१२ चेटः। ही ही श्रणज्ज वशन्तशेणिश्रं मालिश्र ण पलितुश्टेशि शम्पदं पणइजणकप्पपादपं श्रज्जचालुदत्तं मालइदुं ववशिदे शि।५।

शकारः। ण हि लश्रणकुम्भशलिशे हग्गे इश्थिश्रं वाबादेमि।६।

सर्वे। श्रहो तुए मारिदा ण श्रज्जचारुदत्तेण।७।

शकारः। के एव्वं भणादि।८।

सर्वे ॥ चेटमुद्दिश्य ॥ णं एसो साहू।९।

शकारः ॥ अपवार्य सभयम् ॥ श्रविदमादिके कधं थावलके चेडे शुम्हु ण मए शङ्खदे। एशे क्खु मम श्रकज्जश्श शक्खी ॥ विचिन्त्य ॥ एव्वं

दाव कलइश्शं ॥ प्रकाशम् ॥ अलिअं भस्टालका हो एशे चेडे शुवण्ण चोलिआए मए गह्निदे पिस्टिदे मालिदे अ ता किद्वेल्ले एशे जं भणादि किं शव्वं शच्चं ॥ अपवारितकेन चेटस्य कटकं प्रयच्छति ॥ स्वैरकम् ॥ पुश्शका ३१३
थावलका चेडा एदं गेण्हिअ अण्णधा भणाहि ।१।

चेटः ॥ गृहीत्वा ॥ पेक्खध पेक्खध भस्टालका हो शुवण्णेण मं पलोभेदि ।२।

शकारः ॥ कटकमाछिद्य ॥ एशे शे शुवण्णके जश्श कालणादो मए बद्धे ॥ सक्रोधम् ॥ हंहो चण्डाला मए क्खु एशे शुवण्णभण्डाले णिउत्ते शुवण्णं चोलअन्ते मालिदे पिस्टिदे । ता जदि ण पत्तिआअध ता पिस्टिं दाव पेक्खध ।३।

चाण्डालौ ॥ दृष्ट्वा ॥ शोह्णं भणादि । विउत्ते चेडे किं ण प्पडबदि ।४।

चेटः । ही मादिके ईदिशे दाशभावे जं शच्चं कं पि ण पत्तिआ ३१४
एदि ॥ सकरुणम् ॥ अज्ज चालुदत्त एत्तिके मे विह्वे ।५।

॥ इति पादयोः पतति ॥

चारुदत्तः ।

उत्तिष्ठ भोः पतितसाधुजनानुकम्पिन्
निष्कारणोपगतबान्धवधर्मशील ।
यत्नः कृतोऽपि सुमहान्मम मोक्षणाय
दैवं न संवदति किं न कृतं त्वयाद्य ॥

चाण्डालौ । भट्टके पिट्टिअ एदं चेडं णिक्कालेह्नि ।६।

शकारः । णिक्कम ले ॥ इति निष्क्रामयति ॥ अले चण्डाला किं विलम्बेध मालेध एदं ।७।

चाण्डालौ । जदि तुवलेशि ता शअं ज्जेव्व मालेहि ।८।

रोहसेनः । अरे चण्डालआ मारेध मं मुञ्चध आवुक्तं ।९।

३१५ शकारः । शपुत्तं ज्जेव्व एदं मालेध ।१।

चारुदत्तः । सर्वमस्य मूर्खस्य सम्भाव्यते । तद्गच्छ पुत्र मातुः समीपम् ।

रोहसेनः । किं मए गदेण कादव्वं ।२।

चारुदत्तः ।

आश्रमं वत्स गन्तव्यं गृहीत्वाद्यैव मातरम् ।
मा पुत्र पितृदोषेण त्वमप्येवं गमिष्यसि ॥

तद्वयस्य गृहीत्वैनं व्रज ।

विदूषकः । भो वअस्स एव्वं तुए जाणिदं तुए विणा अहं पाणाइं धारेमि त्ति ।३।

चारुदत्तः । वयस्य स्वाधीनजीवितस्य तव न युज्यते प्राणपरित्यागः ।

विदूषकः ॥ स्वगतम् ॥ जुत्तं णेदं । तधावि ण सक्कुणोमि पिअवअस्सविरहिदो पाणाइं धारेदुं त्ति । ता बम्हणीए दारअं समप्पिअ पाणपरिच्चाएण अत्तणो पिअवअस्समणुगमिस्सं ॥ प्रकाशम् ॥ भो वअस्स पराणेमि एदं लहुं ।४।

३१६ ॥ इति सकण्ठग्रहं पादयोः पतति ॥ दारको ऽपि रुदन्पतति ॥

शकारः । अले णं भणामि शपुत्ताकं चालुदत्ताकं वावादेध त्ति ।५।

चारुदत्तः ॥ भयं नाटयति ॥

चाण्डालौ । णहि अम्हाणं ईदिशी लाआणत्ती जधा शपुत्ताकं वावादेध त्ति । ता णिक्कम ले दालआ णिक्कम ।६।

॥ इति निष्क्रामयतः ॥

चाण्डालौ । इमं तइअं घोशणट्ठाणं ताडेध डिण्डिमं ।७।

॥ पूर्वोक्तं घोषयतः ॥

शकारः ॥ स्वगतम् ॥ कधं शे ण पत्तिआअन्ति पौला ॥ प्रकाशम् ॥ हंहो चालुदत्ता वडुव्वका ण पत्तिआअदि एशे पौलजणे। ता अत्तणकेलिकाए जीहाए भणेहि मए वशन्तशेणा वाबादिदेत्ति।१।

चारुदत्तः ॥ तूष्णीमास्ते ॥ ३१७

शकारः। अले चण्डालआ गोह्हे ण भणादि चालुदत्तवडुव्वके। ता भणावेध खड्गमिणा जज्जलवंशखण्डेन शङ्खलेण तालिअ तालिअ।२।

चाण्डालः ॥ प्रहारमुद्यम्य ॥ भो अज्ज चालुदत्त भणाहि।३।

चारुदत्तः ॥ सकरुणम् ॥

प्राप्यैतद्व्यसनमहार्णवप्रपातं
न त्रासो न च मनसो ऽस्ति मे विषादः।
एको मां दहति जनापवादवह्नि
र्वक्तव्यं यदिह मया हता प्रियेति॥

शकारः ॥ पुनस्तथैव ॥

चारुदत्तः ॥ भो भो पौराः। मया खलु नृशंसेन ॥इत्यादि पुनः पठति॥

शकारः। वाबादिदा।४।

चारुदत्तः। एवमस्तु।

चाण्डालः। अले तव अत्त वज्झबालिआ।५।

द्वितीयः। अले तव।६। ३१८

प्रथमः। अले लेक्खअं कलेम्ह।७।

॥ इति बहुविधं लेखकं कृत्वा ॥

प्रथमः। अले जदि मम केलिका वज्झबालिआ ता चिट्ठदु दाव मुहुत्तअं।८।

द्वितीयः। किंणिमित्तं।९।

प्रथमः। अले भणिदो म्हि पिदुणा शग्गं गच्छन्तेण जधा पुत्त वीरअ जइ तुह वज्झबाली होदि मा शहशा वाबादीअशि वज्झं।१०।

द्वितीयः। अले किंणिमित्तं ।१।

३१९ प्रथमः। कदाबि को बि शाहू अत्थं दइअ वज्कं मोआबेदि। कदाबि लण्णो पुत्ते भोदि तेण शव्ववज्झाणं मोक्खे भोदि। कदाबि हत्थी बन्धं खण्डेदि तेण शम्भमेण वज्के मुक्के भोदि। कदाबि लाअपलिवत्ते भोदि तेण शव्ववज्झाणं मोक्खे भोदि ।२।

शकारः। किं किं लाअपलिवत्ते होदि ।३।

चाण्डालः। अले ले वज्झबालिआए लेक्खअं कलेम्ह ।४।

शकारः। अले शिग्घं मालेध चालुदत्ताकं ।५।

॥ इत्युक्त्वा चेटं गृहीत्वा एकान्ते स्थितः ॥

चाण्डालः। अज्ज चालुदत्त लाअणिओओ क्खु अबरज्कादि ण अम्हे चण्डाला। ता शुमलेहि जं शुमलिदव्वं ।६।

३२० चारुदत्तः।

प्रभवति यदि धर्मो दूषितस्यापि मेऽद्य
प्रबलपुरुषवाक्यैर्भाग्यदोषात्कथञ्चित्।
सुरपतिभुवनस्था यत्र तत्र स्थिता वा
व्यपनयतु कलङ्कं स्वस्वभावेन सैव ॥

भोः क्व तावन्मया गन्तव्यम्।

चाण्डालः ॥ अग्रतो दर्शयित्वा ॥ अले एदं दीशदि दक्खिणमशाणं जं पेक्खिअ वज्का कत्ति पाणाइं मुञ्चन्ति। पेक्ख पेक्ख।

अद्धं कलेवलं पलिवत्तं कड्ढन्ति दीहगोमाओ।
अद्धं पि शूललग्गं वेशं विअ अट्टहाशश्श ॥ ।७।

चारुदत्तः। हा हतोऽस्मि मन्दभाग्यः ॥ इति सावेगमुपविशति ॥

शकारः। ण दाव गमिश्शं चालुदत्ताकं वाबादअन्तं दाव पेक्खामि ॥ परिक्रम्य दृष्ट्वा ॥ कधं उबविश्टे ।८।

चाण्डालः। चालुदत्ता किं भीदे शि ।९।

चारुदत्तः ॥ सहसोत्थाय ॥ मूर्ख । न भीरुर्मरणादस्मि । ॥ इत्यादि पुनः पठति ॥ ३२१

चाण्डालः । अज्ज चालुदत्त गअणदले पडिवशन्ता चन्दशुज्जा बि विपत्तिं लहन्ति किं पुण जणा मलणभीलुआ माणवा वा लोए । को बि उट्ठिदो पडदि को बि पडिदो बि उट्ठेदि । उट्ठणपडणाहवशणपालिआ शवश्श उण अत्थि । एदाइं हिअए कदुअ शन्धालेहि अत्ताणअं ॥ चाण्डालं प्रति ॥ एदं चउत्थं घोशणट्ठाणं ता उग्घोशम्ह ।१।

॥ पुनस्तथैवोद्घोषयतः ॥

चारुदत्तः । हा प्रिये वसन्तसेने ॥ शशिशकलमयूख ॥ इत्यादि पठति ॥

॥ ततः प्रविशति ससम्भ्रमा वसन्तसेना भिक्षुश्च ॥

भिक्षुः । ही माणहे अट्ठाणपलिश्शन्तं शमश्शाशिअ वशन्तशेणिअं णअन्ते अणुग्गहिदम्हि पव्वज्जाए । उवाशिके कहिं तुमं ३२२
णइश्शं ।२।

वसन्तसेना । अज्जचारुदत्तस्स ज्जेव्व गेहं । तस्स दंसणेण मअलञ्छणस्स विअ कुमुदिणिं आणन्देहि मं ।३।

भिक्षुः ॥ स्वगतम् ॥ कदलेण मग्गेण पविशामि ॥ विचिन्त्य ॥ लाअमग्गेण ज्जेव्व गच्छामि । उवाशिके एहि एहि इमं लाअमग्गं ॥ आकर्ण्य ॥ किं णु क्खु एशे लाअमग्गे महन्ते कलअले शुणीअदि ।४।

वसन्तसेना ॥ अग्रतो निरूप्य ॥ कधं पुरदो महाजणसमूहो । अज्ज, जाणाहि दाव किं णेदं त्ति । विसमभरक्कन्ता विअ वसुन्धरा एअवा सोणदा उज्जइणी वट्टदि ।५।

चाण्डालः । इमं अ पच्छिमं घोशणट्ठाणं ता ताडेध डिण्डिमं ३२३
उग्घोशेध घोशणं ॥ तथा कृत्वा ॥ भो चालुदत्त पडिबालेहि मा भाआहि लहुं ज्जेव्व मालीअशि ।६।

चारुदत्तः । भगवत्यो देवताः ।

भिक्षुः ॥ श्रुत्वा ससम्भ्रमम् ॥ उबाशिके तुमं किल चालुदत्तेण मालिदाशि त्ति चालुदत्ते मालिदुं णीअदि ।१।

वसन्तसेना ॥ ससम्भ्रमम् ॥ हद्धी हद्धी कधं मम मन्दभाइणीए कदे अज्जचारुदत्तो वाबादीअदि। भो तुरिदं तुरिदं आदेसेह्नि मग्गं ।२।

भिक्षुः। तुवलदु तुवलदु बुद्धोबाशिआ अज्जचालुदत्तं जीअन्तं शमश्शाशिदुं। अज्जा अन्तलमन्तलं देध ।३।

वसन्तसेना। अन्तरमन्तरं ।४।

३२४ चाण्डालः। अज्ज चालुदत्त शामिणिओओ अवरज्झदि ता शुमलेह्नि जं शुमलिदव्वं ।५।

चारुदत्तः। किं बहुना। प्रभवति ॥ इत्यादिश्लोकद्वयं पठति ॥

चाण्डालः ॥ खड्गमाकृष्य ॥ अज्ज चालुदत्त उत्ताणे भविअ शमं चिट्ठ एक्कपहालेण मालिअ तुमं शग्गं णेम्ह ।६।

चारुदत्तः ॥ तथा तिष्ठति ॥

चाण्डालः ॥ प्रहर्तुमीहते खड्गपतनं हस्तादभिनयन् ॥ ह्नी कधं।

आअड्ढिदे शलोशं मुट्ठीए मुट्ठिणा गहीदे वि।
धलणीए कीश पडिदे दालुणए अशणिशणिहे खग्गे ॥

जधा एदं शंवुत्तं तधा तक्केमि ण विवज्जदि अज्ज चालुदत्ते त्ति। भअवदि शह्यवाशिणि पशीद पशीद अवि णाम चालुदत्तश्श मोक्खे भवे तदो अणुगहिदं तुए चण्डालउलं भवे ।७।

३२५ अपरः। जधाणत्तमणुचिट्ठम्ह ।८।

प्रथमः। भोदु एव्वं कलेम्ह ।९।

॥ इत्युभौ चारुदत्तं शूले समारोपयितुमिच्छतः ॥

चारुदत्तः। प्रभवति ॥ इत्यादि पुनः पठति ॥

भिक्षुः। वसन्तसेना च ॥ दृष्ट्वा ॥ अज्जा मा दाव मा दाव अज्जा एसा अहं मन्दभाइणी जाए कारणादो एसो वाबादीअदि ।१०।

चाण्डालः ॥ दृष्ट्वा ॥

तुलिदं का उण एशा अंशपडन्तेण चिउलभालेण।
मा मेत्ति वाहलन्ती उट्ठिदहत्था इदो एदि।१।

वसन्तसेना। अज्ज चारुदत्त किं णेदं ॥ इत्युरसि पतति ॥ ।२।

भिक्षुः। अज्ज चालुदत्त किं णेदं ॥ इति पादयोः पतति ॥ ।३।

चाण्डालः ॥ सभयमुपसृत्य ॥ कधं वशन्तशेणा णं क्खु अम्हेहिं ३२६ शाह्म ण वावादिदे।४।

भिक्षुः ॥ उत्थाय ॥ अले जीवदि अज्जचालुदत्ते।५।

चाण्डालः। जीवदि वश्शशदं।६।

वसन्तसेना ॥ सहर्षम् ॥ पच्चुज्जीविद म्हि।७।

चाण्डालः। ता जाव जधाशंवुत्तं लाइणो जण्णवाडगदश्श णिवेदेम्ह।८।

॥ इति निष्क्रामतः ॥

शकारः ॥ वसन्तसेनां दृष्ट्वा सत्रासम् ॥ हीमादिके केण गब्भदाशी जीवाविदा। उक्कन्ताइं मे पाणाइं। भोदु पलाइश्शं।९।

॥ इति पलायते ॥

चाण्डालः। अले णं अम्हाणं लाआणत्ती जेण शा गणिआ ३२७ वावादिदा तं मालेध ता लट्ठिअशालअं जेव्व अण्णेशम्ह।१०।

॥ इति निष्क्रान्तौ ॥

चारुदत्तः ॥ सविस्मयम् ॥

केयमभ्युद्यते शस्त्रे मृत्युवक्त्रगते मयि।
अनावृष्टिहते शस्ये द्रोणवृष्टिरिवागता॥

॥ अवलोक्य च ॥

वसन्तसेना किमियं द्वितीया समागता सैव दिवः किमित्थम्।
भ्रान्तं मनः पश्यति वा ममैनां वसन्तसेना न मृताथ सैव॥

अथवा ।

किं नु स्वर्गात्पुनः प्राप्ता मम जीवातुकाम्यया ।
तस्या रूपानुरूपेण किमुतान्येयमागता ॥

वसन्तसेना ॥ सास्रमुत्थाय पादयोर्निपत्य ॥ अज्ज चारुदत्त सा जेव अहं पाबा जाए कारणादो इअं तुए असरिसी अवत्था पाविदा ।१।

नेपथ्ये । अच्चरिअं अच्चरिअं जीवदि वसन्तसेणा ।२।

३२८ ॥ इति सर्वे पठन्ति ॥

चारुदत्तः ॥ आकर्ण्य सहसोत्थाय स्पर्शसुखमभिनीय निमीलिताक्ष एव ॥ प्रिये वसन्तसेना त्वम् ।

वसन्तसेना । सा जेव्व अहं मन्दभाआ ।३।

चारुदत्तः ॥ निरूप्य सहर्षम् ॥ कथं वसन्तसेनैव ॥ सानन्दम् ॥

कुतो बाष्पाम्बुधाराभिः स्नपयन्ती पयोधरौ ।
मयि मृत्युवशं प्राप्ते विद्येव समुपागता ॥

प्रिये वसन्तसेने ।

त्वदर्थमेतद्विनिपात्यमानं देहं त्वयैव प्रतिमोचितं मे ।
अहो प्रभावः प्रियसङ्गमस्य मृतो ऽपि को नाम पुनर्ध्रियेत ॥

अपिच । प्रिये पश्य ।

रक्तं तदेव वरवस्त्रमियं च माला
कान्तागमेन हि वरस्य यथा विभाति ।
एते च वध्यपटहध्वनयस्तथैव
जाता विवाहपटहध्वनिभिः समानाः ॥

वसन्तसेना । अदिदक्खिणदाए किं णेदं ववसिदं अज्जेण ।४।

चारुदत्तः । प्रिये त्वं किल मया हतेति ।

पूर्वानुबद्धवैरेण शत्रुणा प्रभविष्णुना ।
नरके पततानेन मनागस्मि निपातितः ॥

वसन्तसेना ॥ कर्णौ पिधाय ॥ सन्तं पावं तेण म्हि राअसालेण वा ३२९
वादिदा ।१।

चारुदत्तः ॥ भिक्षुं दृष्ट्वा ॥ अयमपि कः ।

वसन्तसेना । तेण अणज्जेण वावादिदा एदिणा अज्जेण जीवाबिद म्हि ।२।

चारुदत्तः । कस्त्वमकारणबन्धुः ।

भिक्षुः । ण पच्चभिआणादि मं अज्जो । अहं शे अज्जश्श चलण शंवाहणचित्तए शंवाहके णाम जूदिअलेहिं गहिदे एदाए उबाशिआए अज्जश्श केलके त्ति अलङ्कालएण णिक्कीदे म्हि । तेण अ जूदणिव्वेदेण शक्कशमणके शंवुत्ते म्हि । एशा बि अज्जा पवहणविपज्जाशेण पुप्फकलण्डकजिण्णुज्जाणं गदा तेण अणज्जेण ण मं बहु मण्णेशि त्ति बाहुपाशबलक्कालेण मालिदा ।३।

नेपथ्ये ॥ कलकलः ॥ ३३०

जयति वृषभकेतुर्दक्षयज्ञस्य हन्ता
तदनु जयति भेत्ता षण्मुखः क्रौञ्चशत्रुः ।
तदनु जयति कृत्स्नां शुभ्रकैलासकेतुं
विनिहतवरवैरी चार्यको गां विशालाम् ॥

॥ प्रविश्य सहसा शर्विलकः ॥

शर्विलकः । हत्वा तं कुनृपमहं हि पालकं भो
स्तद्राज्ये द्रुतमभिषिच्य चार्यकं तम् ।
तस्याज्ञां शिरसि निधाय शेषभूतां
मोक्ष्ये ऽहं व्यसनगतं च चारुदत्तम् ॥
हत्वा रिपुं तं बलमित्रहीनं
पौरान्समाश्वास्य पुनः प्रकर्षात् ।
प्राप्तं समग्रं वसुधाधिराज्यं

राज्यं सुरारेरिव शत्रुराज्यम् ॥

३३१ ॥ अग्रतो निरूप्य ॥ भवत्वत्र तेन भवितव्यं यत्रायं जनपदसमवायः। अपि नामायमारम्भः क्षितिपतेरार्यकस्य चारुदत्तस्य जीवितेन सफलः स्यात्। त्वरिततरमुपसृत्य ॥ अपयात जाल्माः ॥ दृष्ट्वा सहर्षम् ॥ अपि ध्रियते चारुदत्तः सह वसन्तसेनया सम्पूर्णाः खल्वस्मत्स्वामिनो मनोरथाः।

दिष्ट्या भो व्यसनमहार्णवादपारा
दुत्तीर्णं गुणधृतया सुशीलवत्या।
नावेव प्रियतमया चिरान्निरीक्षे
ज्योत्स्नाढ्यं शशिनमिवोपरागमुक्तम् ॥

तत्कृतमहापातकः कथमिवैनमुपसर्पामि। अथवा। सर्वत्रार्जवं शोभते ॥ प्रकाशं उपसृत्य बद्धाञ्जलिः ॥ आर्य चारुदत्त।

चारुदत्तः। ननु कोऽत्रभवान्।

शर्विलकः।

येन ते भवनं भित्त्वा न्यासापहरणं कृतम्।
सोऽहं कृतमहापापस्त्वामेव शरणं गतः ॥

चारुदत्तः। सखे मैवं। त्वयासौ प्रणयः ॥ इति कण्ठे गृह्णाति ॥

शर्विलकः। अन्यच्च।

आर्यकेणार्यवृत्तेन कुलं मानं च रक्षता।
पशुवद्यज्ञवाटस्थो दुरात्मा पालको हतः ॥

चारुदत्तः। किम्।

शर्विलकः।

त्वद्यानं यः समारुह्य गतस्त्वां शरणं पुरा।
पशुवद्वितते यज्ञे हतस्तेनाद्य पालकः ॥

३३२ चारुदत्तः। शर्विलक यो ऽसौ पालकेन घोषादानीय निष्कारणं कूटागारे बद्ध आर्यकनामा त्वया मोचितः।

शर्विलकः। यथाह तत्रभवान्।

चारुदत्तः। प्रियं नः प्रियम्।

शर्विलकः। प्रतिष्ठितमात्रेण तव सुहृदा आर्यकेण उज्जयिन्यां वेणातटे कुशावत्यां राज्यमतिसृष्टम्। तत्प्रतिमान्यतां प्रथमः सुहृत्प्रणयः ॥ परिवृत्य ॥ अरे रे आनीयतामयं पापो राष्ट्रियशठः।

नेपथ्ये। यथाज्ञापयति शर्विलकः।

शर्विलकः। आर्य नन्वयमार्यको राजा विज्ञापयति इदं मया युष्मद्गुणोपार्जितं राज्यं तदुपयुज्यताम्।

चारुदत्तः। अस्मद्गुणोपार्जितं राज्यम्।

नेपथ्ये। अरे रे राष्ट्रियश्यालक। एह्येहि स्वस्याविनयस्य फलमनुभव।

॥ ततः प्रविशति पुरुषैरधिष्ठितः पश्चाद्बाहुबद्धः शकारः ॥

शकारः। ह्हीमादिके।

एवं दूलमदिक्कन्ते उद्दामे विअ गद्दहे।
आणीदि क्खु हगे बद्धे क्कुडे अशो व्व दुक्कले।१।

॥ दिशो ऽवलोक्य ॥

शमन्तदो उवट्ठिदे शे लष्टिअबन्धे। ता कं दाणिं अशलणे श ३३३ लणं पवज्जामि ॥ विचिन्त्य ॥ भोदु तं ज्जेव्व अब्भुववण्णशलणलक्खणं शलणं गच्छामि ॥ उपसृत्य ॥ अज्ज चालुदत्त पलित्ताहि पलित्ताहि ॥ इति पादयोः पतति ॥ ।२।

नेपथ्ये। अज्ज चारुदत्त मुञ्च मुञ्च वावादेम्ह एदं।३।

शकारः। भो अशलणशलणे पलित्ताआहि।४।

चारुदत्तः ॥ सानुकम्पम् ॥ अहह अभयमभयं शरणागतस्य।

शर्विलकः ॥ सावेगम् ॥ आ अपनीयतामसौ चारुदत्तपार्श्वात् ॥ चारुदत्तं प्रति ॥ ननूच्यतां किमस्य पापस्यानुष्ठीयतामिति।

आकर्षन्तु सुबद्ध्वैनं श्वभिः सङ्खाद्यतामथ ।
शूले वा तिष्ठतामेष पाट्यतां क्रकचेन वा ॥

चारुदत्तः । किमहं यद्ब्रवीमि तत्क्रियते ।

शर्विलकः । को ऽत्र सन्देहः ।

३३४ शकारः । भस्टालआ चालुदत्त शलणागदे म्हि । पलित्ताआहि पलित्ताआहि । जं तुज्झ शलिशं तं कलेहि । पुणो ण दूशइश्शं ।१।

नेपथ्ये पौराः । वावादेध किंणिमित्तं पातकी जीवावीअदि ।२।

वसन्तसेना ॥ वध्यमालां चारुदत्तस्य कण्ठादपनीय शकारस्योपरि क्षिपति ॥

शकारः । गब्भदाशि पशीद पशीद । ण पुणो मालइश्शं ता पलित्ताआहि ।३।

शर्विलकः । अरे रे अपनयत । आर्य चारुदत्त आज्ञाप्यतां किमस्य पापस्यानुष्ठीयताम् ।

चारुदत्तः । किमहं यद्ब्रवीमि तत्क्रियते ।

शर्विलकः । को ऽत्र सन्देहः ।

चारुदत्तः । सत्यम् ।

शर्विलकः । सत्यम् ।

चारुदत्तः । यद्येवं शीघ्रमयम् ।

शर्विलकः । किं हन्यताम् ।

३३५ चारुदत्तः । न हि न हि मुच्यताम् ।

शर्विलकः । किमर्थम् ।

चारुदत्तः । शत्रुः कृतापराधः शरणमुपेत्य पादयोः पतितः शस्त्रेण न हन्तव्यः ।

शर्विलकः । एवं तर्हि श्वभिः खाद्यताम् ।

चारुदत्तः । न हि न हि उपकारहतस्तु कर्तव्यः ।

शर्विलकः । अहो आश्चर्यं किं करोमि वदत्वार्यः ।

चारुदत्तः । तन्मुच्यताम् ।

॥ इति मुक्तः ॥

शकारः । हीमादिके पच्चुज्जीविदे म्हि ।१। ॥ इति पुरुषैः सह निष्क्रान्तः ॥

शर्विलकः । आर्ये वसन्तसेने परितुष्टो राजा भवतीं वधूशब्देनानुगृह्णाति ।

वसन्तसेना । अज्ज कदत्थ म्हि ।२।

शर्विलकः ॥ वसन्तसेनामवगुण्ठ्य चारुदत्तं प्रति ॥ आर्य किमस्य भिक्षोः क्रियताम् ।

चारुदत्तः । भिक्षो किं तव बहुमतम् ।

भिक्षुः । ईदिशं अणिच्चत्तणं पेक्खिअ दिउणे मे पव्वज्जाए बहु ३३६
माणे शंवुत्ते ।३।

चारुदत्तः । सखे दृढो ऽस्य निश्चयः । तत्पृथिव्यां सर्वविहारेषु कुलपतिरयं क्रियताम् ।

शर्विलकः । यथाह आर्यः ।

भिक्षुः । प्रियं नः प्रियम् ।

वसन्तसेना । सम्पदं जीवाविद म्हि ।४।

शर्विलकः । स्थावरकस्य किं क्रियताम् ।

चारुदत्तः । सुवृत्त अदासो भवतु । ते चाण्डालाः सर्वचाण्डालानामधिपतयो भवन्तु । चन्दनकस्य पृथ्वीदण्डपालता भवतु तस्य राष्ट्रियश्यालस्य यथैव क्रिया पूर्वं वर्तमाना तथैवास्तु ।

शर्विलकः । एवं यथाह आर्यः । परमेनं मुञ्च मुञ्च व्यापादयामि ।

चारुदत्तः । अभयं शरणागतस्य । शत्रुः कृतापराधः ॥ इति पुनः पठति ॥

शर्विलकः । तदुच्यतां किं ते भूयः प्रियं करोमि ।

चारुदत्तः । अतः परं प्रियमस्ति ।

लब्धा चारित्र्यशुद्धिश्चरणनिपतितः शत्रुरप्येष मुक्तः

प्रोत्खातारातिमूलः प्रियसुहृदचलामार्यकः शास्ति राजा ।
प्राप्ता भूयः प्रियेयं प्रियसुहृदि भवान्सङ्गतो मे वयस्यो
लभ्यं किं चातिरिक्तं यदपरमधुना प्रार्थये ऽहं भवन्तम् ॥

१३७ काश्चित्तुच्छयति प्रपूरयति वा काश्चिन्नयत्युन्नतिं
काश्चित्पातविधौ करोति च पुनः काश्चिन्नयत्याकुलान् ।
अन्योन्यं प्रतिपक्षसंहतिमिमां लोकस्थितिं बोधय
न्नेष क्रीडति कूपयन्त्रघटिकान्यायप्रसक्तो विधिः ॥

तथापीदमस्तु ।

क्षीरिण्यः सन्तु गावो भवतु वसुमती सर्वसम्पन्नशस्या
पर्जन्यः कालवर्षी सकलजनमनोनन्दिनो वान्तु वाताः ।
मोदन्तां जन्मभाजः सततमभिमता ब्राह्मणाः सन्तु सन्तः
श्रीमन्तः पान्तु पृथ्वीं प्रशमितरिपवो धर्मनिष्ठाश्च भूपाः ॥

॥ इति निष्क्रान्ताः सर्वे ॥

इति मृच्छकटिकायां
संहारो नाम
दशमो ऽङ्कः ॥

॥ समाप्ता चेयं मृच्छकटिका ॥

॥ शुभमस्तु ॥

अथ

प्राकृतभाषाव्याख्या ॥

॥ पत्रं २ ॥

।१। कष्टं कष्टं भोः। चिरसङ्गीतोपासनेन शुष्कपुष्करनालानीव मम बुभुक्षया म्लानान्यङ्गानि। तद्यावद्गृहं गत्वा जानामि अस्ति किमपि कुटुम्बिन्योपपादितं नवेति।

।२। एतत्तदस्माकं गृहं तत्प्रविशामि।

॥ पत्रं ३ ॥

।१। आश्चर्यं किं नु खल्वस्माकं गृहे ऽपरमिव संविधानकं वर्तते। आयामितपण्डुलोदकप्रवाहा रथ्या लोहकटाहपरिवर्तनकृष्णसारा कृतविशेषकेव युवती अधिकतरं शोभते भूमौ स्निग्धेन गन्धेन उद्दीप्यमानेवाधिकं बाधते मां बुभुक्षा। तत्किं पूर्वविहितं निधानमुत्पन्नं भवेत्। अथवा अहमेव बुभुक्षात ओदनमयं जीवलोकं पश्यामि। नास्ति किल प्रातराशो ऽस्माकं गृहे प्राणात्ययं मां बुभुक्षा बाधते। इह सर्वं नवमिव संविधानं वर्तते। एका वर्णकं पिनष्टि अपरा सुमनसो गुम्फति।

।२। किं न्विदं भवतु कुटिम्बिनीमाहूय परमार्थं ज्ञास्यामि।

।३। आर्ये इतस्तावत्।

।४। आर्य इयमस्मि।

।५। आर्ये स्वागतं ते।

।६। आज्ञापयत्वार्यः को नियोगो ऽनुष्ठीयतामिति।

।७। आर्ये चिरसङ्गीतोपासनेन। अस्ति किमप्यस्माकं गृहे ऽशितव्यं नवेति।

।८। आर्य सर्वमस्ति।

।९। किं किमस्ति।

।१०। तद्यथा। गुडौदनं घृतं दधि तण्डुला आर्येण अत्तव्यं रसायनमस्तीति। एवं ते देवा आशासताम्।

।११। किमस्माकं गृहे सर्वमस्ति अथवा परिहससि।

।१२। परिहसिष्यामि तावत्। आर्य अस्ति आपणे।

।१३। आ अनार्ये एवं तव आशा छेत्स्यते। अभावं गमिष्यसि यदिदानीमहं वरण्डलम्बुक इव दूरमुत्क्षिप्य पातितः।

।१४। मर्षयतु मर्षयत्वार्यः परिहासः खलु मया कृतः।

।१५। तत्किं पुनरिदं नवमिव संविधानकं वर्तते। एका वर्णकं पिनष्टि अपरा सुमनसो गुम्फति। इयं च पञ्चवर्णकुसुमोपहारशोभिता भूमी।

।१६। आर्य उपवासो गृहीतः।

।१७। किन्नामधेयो ऽयमुपवासः।

।१८। अभिरूपपतिर्नाम।

॥ पत्रं ४ ॥

।१। आर्ये ऐहलौकिको ऽथवा पारलौकिकः।

।२। आर्य पारलौकिकः।

।३। प्रेक्षन्तां प्रेक्षन्तामार्यमिश्रा मदीयेन भक्तपरिव्ययेन पारलौकिको भर्तान्विष्यते।

।४। आर्य प्रसीद प्रसीद त्वमेव मम जन्मान्तरे ऽपि भर्ता भविष्यसीत्युपोषितास्मि।

।५। अथायमुपवासः केनोपदिष्टः।

।६। आर्यस्यैव प्रियवयस्येन चूर्णवृद्धेन।

।७। आ दास्याः पुत्र चूर्णवृद्ध कदा नु खलु त्वां कुपितेन राज्ञा पालकेन नववधूकेशकलापमिव ससुगन्धं छेद्यमानं प्रेक्षिष्ये।

।८। प्रसीदतु प्रसीदत्वार्यो नन्वार्यस्यैव पारलौकिको ऽयमुपवासो ऽनुष्ठीयते।

।९। आर्ये उत्तिष्ठ उत्तिष्ठ कथय कथय इहोपवासे केन कार्यम्।

।१०। अस्मादृशजनयोग्येन ब्राह्मणेनोपनिमन्त्रितेन।

।११। तेन हि गच्छत्वार्या। अहमप्यस्मादृशजनयोग्यं ब्राह्मणमुपनिमन्त्रयामि।

।१२। यदार्य आज्ञापयति।

।१३। तत्कथं मयैवं सुसमृद्धायामुज्जयिन्यामस्मादृशजनयोग्यो ब्राह्मणो ऽन्वेषितव्यः। एष चारुदत्तस्य मित्रं मैत्रेय इत एवागच्छति। भवतु प्रक्ष्यामि तावत्। आर्य मैत्रेय अस्माकं गृहे ऽग्रितुमग्रणीर्भवत्वार्यः।

।१४। भो अन्यं ब्राह्मणमुपनिमन्त्रयतु भवान्। व्यापृत इदानीमहम्।

॥ पत्रं ५ ॥

।१। आर्य सम्पन्नं भोजनं निःसपत्नं च। अपि च दक्षिणा कापि ते भविष्यति।

।२। भो यथेदानीं प्रथममेव प्रत्यादिष्टो ऽसि तत्क इदानीं ते निर्बन्धो पदे पदे मामनुसन्धातुम्।

।३। प्रत्यादिष्टो ऽस्म्येतेन भवतु अन्यं ब्राह्मणमुपनिमन्त्रयामि।

॥ पत्रं ६ ॥

।१। अथवा मया मैत्रेयेण परस्य आमन्त्रणकानि भक्षितव्यानि। हा अवस्थे तुलयसे। य इदानीमहं तत्रभवतश्चारुदत्तस्य ऋद्ध्याहोरात्रप्रयत्नसिद्धैरुदारसुरभिगन्धिभिर्मोदकैरेवाशितो ऽभ्यन्तरचतुःशालकद्वार उपविष्टो मल्लकशतपरिवृतश्चित्रकर इवाङ्गुलीभिः स्पृष्ट्वा स्पृष्ट्वापनयामि। नगरचत्वरवृषभ इव रोमन्थायमानस्तिष्ठामि। स इदानीमहं तस्य दरिद्रतया यत्र तत्र चरित्वा गृहपारावत इवावासनिमित्तमिहागच्छामि। एष आर्यचारुदत्तस्य प्रियवयस्येन चूर्णवृद्धेन जातीकुसुमवासितः प्रावारको ऽनुप्रेषितः सिद्धीकृतदेव

कार्यस्यार्यचारुदत्तस्योपनेतव्य इति। तद्यावदार्यचारुदत्तं पश्यामि। एष चारुदत्तः सिद्धीकृतदेवकार्यो गृहदेवतानां बलिं कुर्वन्नित एवागच्छति।

।२। एष आर्यचारुदत्तः। तद्यावत्साम्प्रतमुपसर्पामि। स्वस्ति भवते वर्धतां भवान्।

॥ पत्रं ७ ॥

।१। यद्भवानाज्ञापयति। भो वयस्य एष ते प्रियवयस्येन चूर्णवृद्धेन जातीकुसुमवासितः प्रावारकोऽनुप्रेषितः सिद्धीकृतदेवकार्यस्यार्यचारुदत्तस्य त्वयोपनेतव्य इति।

।२। भो इदं किं चिन्त्यते।

।३। भो वयस्य। मरणाद्दारिद्र्याद्वा कतरत्ते रोचते।

।४। भो वयस्य अलं सन्तप्तेन। प्रणयिजनसंक्रामितविभवस्य सुरजनपीतशेषस्य प्रतिपच्चन्द्रस्येव परिक्षयोऽपि तेऽधिकतरं रमणीयः।

॥ पत्रं ८ ॥

।१। भो वयस्य एते खलु दास्याःपुत्रा अर्थकल्यवर्ता वरटाभीता इव गोपालदारका यत्र यत्र न खाद्यन्ते तत्र तत्र गच्छन्ति।

।२। भो वयस्य तमेवार्यकल्यवर्तं स्मृत्वालं सन्तप्तेन।

।३। न गमिष्यामि।

॥ पत्रं ९ ॥

।१। यत एवं पूज्यमाना देवता न प्रसीदन्ति तत्को गुणो देवेष्वर्चितेषु।

।२। भो न गमिष्यामि। अन्यः कोऽपि प्रयुज्यताम्। मम पुनर्ब्राह्मणस्य सर्वमेव विपरीतं परिणमति आदर्शगतेव च्छाया वामतो दक्षिणा दक्षिणतो वामा। अन्यच्च एतस्यां प्रदोषवेलायामिह राजमार्गे गणिका विटाश्चेटा राजवल्लभाश्च पुरुषाः सञ्चरन्ति। तस्मान्मण्डूकलुब्धस्येव कालसर्पस्य मूषिक इवाभिमुखावस्थित इदानीं भविष्यामि। त्वमिहोपविष्टः किं करिष्यसि।

॥ पत्रं १० ॥

।१। तिष्ठ वसन्तसेनिके तिष्ठ।

किं यासि धावसि पलायसे प्रस्खलन्ती
वासु प्रसीद न मरिष्यसि तिष्ठ तावत्।
कामेन दह्यते खलु मे हृदयं तपस्वि
अङ्गारराशिपतितमिव मांसखण्डम् ॥

।२। अज्जुके तिष्ठ तिष्ठ।

उत्त्रासिता गच्छस्यन्तिकान्मे
सम्पूर्णपुच्छेव ग्रीष्ममयूरी।
अपवल्गति स्वामिभट्टारको मे
वने गतः कुक्कुटशावक इव ॥

।३। तिष्ठ वसन्तसेनिके तिष्ठ।

मम मदनमनङ्गं मन्मथं वर्धयन्ती
निशि च शयनके मे निद्रां प्रक्षिपन्ती।
प्रसरसि भयभीता प्रस्खलन्ती स्खलन्ती
मम वशमनुयाता रावणस्येव कुन्ती ॥

॥ पत्रं ११ ॥

।१। एषा नाणकमोषिकामकशिका मत्स्याशिका लासिका
निर्नासा कुलनाशिकावशिका कामस्य मञ्जूषिका।
एषा वेशवधूः सुवेषनिलया वेशाङ्गना वेशिका
एतान्यस्या दश नामानि मया कृतान्यद्यापि मां नेच्छति॥

।२। कान्तस्फनदु बहुभूषणशब्दमिश्रं
किं द्रौपदीव पलायसे रामभीता।
एष हरामि सहसेति यथा हनूमान्
विश्वावसोर्भगिनीमिव तां सुभद्राम्॥

।३। रमय च राजवल्लभं
ततः खादिष्यसि मत्स्यमांसकम्।
एतैर्मत्स्यमांसैः
शुनिका मृतकं न सेवते॥

।४। अस्माभिश्चण्डमभिसार्यमाणा
वने शृगालीव कुक्कुरैः।
पलायसे शीघ्रं त्वरितं सवेगं
सवेष्टनं मम हृदयं हरन्ती।

।५। पल्लवक पल्लवक परभृतिके परभृतिके।

।६। भाव भाव मनुष्यो मनुष्यः।

॥ पत्रं १२ ॥

।१। माधविके माधविके।

।२। भाव भाव स्त्रियमन्विच्छति।

।३। स्त्रीणां शतं मारयामि। शूरो ऽहम्।

।४। हाधिक् हाधिक्। कथं परिभ्रष्टः परिश्रान्तः। अत्र मयात्मा स्वयमेव रक्षितव्यः।

।५। वसन्तसेनिके विलप विलप परभृतिकां वा पल्लवकं वा सर्वं वा वसन्तमासम्। मयाभिसार्यमाणां त्वां कः परित्रास्यते।

किं भीमसेनो जमदग्निपुत्रः
कुन्तीसुतो वा दशकन्धरो वा।
एषो हं गृहीत्वा केशहस्तं
दुःशासनस्यानुकृतिं करोमि॥

ननु पश्य पश्य।

असिः सुतीक्ष्णः पतितं च मस्तकं
छिन्त शीर्षमुत मारयत वा।
अलं तवैतेन पलायितेन
मुमूर्षुर्यो भवति न स खलु जीवति॥

।६। आर्य अबला खल्वहम्।

।७। अत एव न मारिष्यसे।

।८। कथमनुनयो ऽप्य स्य भयमुत्पादयति। भवत्वेवं तावत्। आर्य अस्मात्किमप्यलङ्करणं तर्क्यते।

॥ पत्रं १३ ॥

।१। तत्किं खल्विदानीम्।

।२। अहं देवपुरुषो मनुष्यो वासुदेवः कामयितव्यः।

।३। शान्तं पापम्। अपेहि अनार्ये मन्त्रयसे।

।४। भाव भाव पश्य। अन्तरेण सुस्निग्धा एषा गणिका येन मां भणति एहि श्रान्तो ऽसि क्लान्तो ऽसीति। अहमन्यग्रामान्तरं न गतो नगरान्तरं वा न गतः। अज्जुके शपामि भावस्य शीर्षमात्मीयाभ्यां पादाभ्यां तवैव पृष्ठानुपृष्ठिकयाहिण्डक्लान्तः क्लान्तो ऽस्मि संवृत्तः।

।५। गुणाः खल्वनुरागस्य कारणं न पुनर्बलात्कारः।

॥ पत्रं १४ ॥

।१। भाव भाव एषा गर्भदासी कामदेवायतनोद्यानात्प्रभृति तस्य दरिद्रचारुदत्तस्यानुरक्ता न मां कामयते। वामतस्तस्य गृहम्। यथा तव मम हस्तादेषा न परिभ्रश्यति तथा करोतु भावः।

।२। अथ किं वामतस्तस्य गृहम्।

।३। आश्चर्यं वामतस्तस्य गृहमिति यत्सत्यमपराध्यतापि दुर्जनेन प्रियसङ्गमं प्रापिता।

।४। भाव भाव बलीयान्खल्वन्धकारः। माषराशिप्रविष्टेव मसीगुटिका दृश्यमाना दृश्यमानैव प्रनष्टा वसन्तसेनिका।

।५। भाव भाव अन्वेषयामि वसन्तसेनिकाम्।

।६। भाव भाव किमिव।

।७। शृणोमि माल्यगन्धं अन्धकारपूरितया पुनर्नासिकया न सुव्यक्तं पश्यामि भूषणशब्दम्।

॥ पत्रं १५ ॥

।१। आश्चर्यं भित्तिपरामर्शसूचितं पक्षद्वारकं खल्वेतत् जानामि च संयोगेन गृहस्य संवृतं पक्षद्वारकम्।

।२। भो न गमिष्यामि।

।३। भो वयस्य यदि मया गन्तव्यं तदेषापि मम सहायिनी रदनिका भवतु।

॥ पत्रं १६ ॥

।१। यदार्य आज्ञापयति।

।२। भवति रदनिके गृहाण बलिं प्रदीपं च। अपावृतं पक्षद्वारकं करोमि।

।३। मम अभ्युपपत्तिनिमित्तमिवापावृतं पक्षद्वारकम्। तद्यावत्प्रविशामि। हा धिक्। कथं प्रदीपः।

।४। अपावृतपक्षद्वारकेण पिण्डीकृतेन वातेन निर्वापितः प्रदीपः। भवति रदनिके निष्क्रम त्वं पक्षद्वारकेण अहमप्यभ्यन्तरचतुःशालात्प्रदीपं प्रज्वाल्यागच्छामि।

।५। भाव भाव अन्वेषयामि वसन्तसेनिकाम्।

।६। भाव भाव गृहीता गृहीता।

।७। इतस्तावद्भूत्वैकान्ते भावस्तिष्ठतु। भाव भाव गृहीता गृहीता।

।८। भट्टारक चेटो ऽहम्।

।९। इतो भाव इतश्चेटः। भावश्चेटश्चेटो भावः। युवां तावदेकान्ते तिष्ठतम्। भाव भाव साम्प्रतं गृहीता गृहीता वसन्तसेनिका।

अन्धकारे पलायमाना माल्यगन्धेन सूचिता।
केशहस्ते परामृष्टा चाणक्येनेव द्रौपदी ॥

॥ पत्रं १७ ॥

।१। एषासि वासु शिरसि गृहीता
केशेषु बालेषु शिरोरुहेषु।
आक्रोश विक्रोश लप चण्डं
शम्भुं शिवं शङ्करमीश्वरं वा॥

।२। किमार्यमिश्रैर्व्यवसितम्।

।३। भाव भाव यथा दधिभक्तपरिलुब्धाया मार्जार्याः स्वरपरिवृत्तिर्भवति तथा दास्या दुहित्रा स्वरपरिवृत्तिः कृता।

।४। ही ही भोः। प्रदोषमन्दमारुतेन पशुबन्धोपनीतस्येव छागलस्य हृदयं पोस्फुर्यते प्रदीपः। भवति रदनिके।

।५। भाव भाव मनुष्यो मनुष्यः।

।६। युक्तं न्वेतत्सदृशं न्वेतयदार्यचारुदत्तस्य दरिद्रतया साम्प्रतं परपुरुषा गृहं प्रवेश्यन्ते।

।७। आर्य मैत्रेय पश्य पश्य मे परिभवम्।

।८। किं तव परिभवो ऽथवास्माकम्।

।९। ननु युष्माकमेव।

।१०। किमेष बलात्कारः।

।११। अथ किम्।

।१२। सत्यम्।

॥ पत्रं १८ ॥

।१। सत्यम्।

।२। मा तावत्। भोः स्वके गृहे कुक्कुरो ऽपि चण्डो भवति किं पुनरहं ब्राह्मणः। तदेते नास्मादृशजनभागधेयकुटिलेन दन्तकाष्ठेन दुष्टस्येव शुष्कवेणुकस्य मस्तकं ते प्रहारैः कुट्टयिष्यामि।

।३। नात्रैषो ऽपराध्यति। एष खल्वत्रापराध्यति। अरे रे राजश्यालक संस्थानक दुर्मनुष्य युक्तं न्वेतत्। यद्यपि नाम तत्रभवानार्यचारुदत्तो दरिद्रः संवृत्तस्तत्किं तस्य गुणैर्नालङ्कृतोज्जयिनी येन तस्य गृहं प्रविश्य परिजनस्येदृश उपमर्दः क्रियते।

मा दुर्गत इति परिभवो नास्ति कृतान्तस्य दुर्गतो नाम।
चारित्र्येण विहीन आढ्यो ऽपि च दुर्गतो भवति ॥

।४। किमियम्।

।५। सत्पुरुष उत्तिष्ठ उत्तिष्ठ। अजानता मया त्वमुपालब्धः। साम्प्रतं पुनर्जानन्ननुनयामि।

।६। भणातु भवान्।

॥ पत्रं १९ ॥

।१। न कथयिष्यामि।

।२। किन्निमित्तं पुनर्भाव एतस्य दुष्टवटुकस्य कृपणामञ्जलिं कृत्वा पादयोर्निपतितः।

।३। कस्मात्त्वं भीतः।

।४। के इव तस्य गुणा यस्य गृहं प्रविश्याशितव्यमपि नास्ति।

।५। कः स गर्भदास्याः पुत्रः ।

शूरो विक्रान्तः पाण्डवः श्वेतकेतुः
पुत्रो राधाया रावण इन्द्रदत्तः ।
आहो कुन्त्यां तेन रामेण जातः
अश्वत्थामा धर्मपुत्रो जटायुः ॥

॥ पत्रं २० ॥

।१। अगृहीत्वा वसन्तसेनिकाम् ।

।२। कथमिव ।

।३। अगृहीत्वा वसन्तसेनिकां न गमिष्यामि ।

।४। यदि गच्छसि गच्छ त्वम् । अहं न गमिष्यामि ।

।५। गतः खलु भावो ऽभावम् । अरे काकपद्मस्तशीर्षक दुष्टवटुक उपविश उपविश ।

।६। उपवेशिता एव वयं ।

।७। केन ।

।८। कृतान्तेन ।

।९। तदुत्तिष्ठोत्तिष्ठ ।

।१०। उत्थास्यामः ।

।११। कदा ।

।१२। यदा पुनरपि दैवमनुकूलं भविष्यति ।

।१३। अरे रुदिहि रुदिहि ।

॥ पत्रं २१ ॥

।१। रोदिता एव वयम् ।

।२। केन ।

।३। दुर्गत्या ।

।४। अरे हस हस ।

।५। हसिष्यामः ।

।६। कदा ।

।७। पुनरपि आर्यचारुदत्तस्य ।

।८। अरे रे दुष्टवटुक भणिष्यसि मम वचनेन तं दरिद्रचारुदत्तम् । एषा ससुवर्णा सहिरण्या नवनाटकदर्शनोत्थिता सूत्रधारीव वसन्तसेना नाम गणिका दारिका कामदेवायतनोद्यानात्प्रभृति त्वामनुरक्तास्माभिर्बलात्कारानुनीयमाना तव गृहं प्रविष्टा । तद्यदि मम हस्ते स्वयमेव प्रस्थाप्यैनां समर्पयसि ततो ऽधिकरणे व्यवहारं विना लघु निर्यातयतस्तव मयानुबद्धा प्रीतिर्भविष्यति । अथवानिर्यातयत आमरणान्तिकं वैरं भविष्यति । अपिच पश्य पश्य ।

कर्कारुका गोमयलिप्तवृन्ताः
शाकं च शुष्कं तलितं खलु मांसम् ।
भक्तं च हैमन्तिकरात्रिसिद्धं
आर्णां च वैरं न खलु भवति पूतिः ॥

शोभनं भणिष्यसि लघुकं भणिष्यसि तथा भणिष्यसि यथाहमात्मीयायां प्रासादबालाग्रकपोतपालिकायामुपविष्टः

श्रोष्यामि। तथा यदि न भणिष्यसि तदा कपाटतलप्रविष्टं कपित्थमिव मस्तकं ते स्फोटयिष्यामि।

।९। भणिष्यामि।

।१०। चेट गतः सत्यमेव भावः।

॥ पत्रं २२ ॥

।१। अथ किम्।

।२। तच्छीघ्रमपक्रमावः।

।३। तद्गृह्णातु भट्टारको ऽस्मि।

।४। तवैव हस्ते तिष्ठतु।

।५। एष भट्टारक गृह्णातु ननु भट्टारको ऽस्मि।

।६। निर्वल्कलं मूलकत्वग्वर्णो
स्कन्धेन गृहीत्वा च कोषसुप्तम्।
कुक्कुरैः कुक्कुरीभिश्च शब्दायमानो
यथा शृगालः शरणं प्रयामि॥

।७। भो रदनिके न खलु ते ऽयमपमानस्तत्रभवतश्चारुदत्तस्य निवेदयितव्यः। दौर्गत्यपीडितस्य मन्ये द्विगुणतरा पीडा भविष्यति।

।८। आर्य मैत्रेय रदनिका खल्वहं संयतमुखी।

।९। एवमेतत्।

।१०। कथं परिजन इति मामवगच्छति। आश्चर्य जातीकुसुमवासितः प्रावारको ऽनुदासीनमस्य यौवनं प्रतिभासयति।

।११। मन्दभागिनी खल्वहं तवाभ्यन्तरस्य।

॥ पत्रं २३ ॥

।१। भो इयं सा रदनिका।

।२। ननु भूषिता।

।३। भो अलं परकलत्रदर्शनशङ्कया। एषा वसन्तसेना कामदेवायतनोद्यानात्प्रभृति त्वामनुरक्ता।

।४। भो वयस्य एष खलु राजश्यालो भणति।

।५। एषा ससुवर्णा सहिरण्या नवनाटकदर्शनोत्थिता सूत्रधारीव वसन्तसेना नाम गणिका दारिका कामदेवायतनोद्यानात्प्रभृति त्वामनुरक्तास्माभिर्बलात्कारानुनीयमाना तव गृहं प्रविष्टा।

॥ पत्रं २४ ॥

।१। बलात्कारानुनीयमानेति यत्सत्यमलङ्कृतास्म्येतैरक्षरैः।

।२। तद्यदि मम हस्ते स्वयमेव प्रस्थाप्यैनां समर्पयसि ततो ऽधिकरणे व्यवहारं विना लघु निर्यातयतस्तव मयानुबद्धा प्रीतिर्भविष्यति। अन्यथामरणं वैरं भविष्यति।

।३। एतेनानुचितभूमिकारोहणेनापराद्धार्य शीर्षेण प्रणम्य प्रसादयामि।

।४। भो द्वावपि युवां सुसम्पन्नाविव कलमकेदारावन्योन्यं शीर्षेण शीर्षं समागतौ। अहमप्यनेन करभजानुसदृशेन शीर्षेण द्वावपि युवां प्रणम्य प्रसादयामि उत्तिष्ठतमिति।

।५। चतुरो मधुरश्चायमुपन्यासः। न युक्तमनेदृशेनेहागतया मया प्रतिवसितुं। भवतु एवं तावद्भणिष्यामि। आर्य यद्येवमहमार्यस्यानुग्राह्या तदिच्छाम्यहमिममलङ्कारकमार्यस्य गृहे निक्षेप्तुम्। अलङ्कारस्य निमित्तमेते पापा अनुसरन्ति।

॥ पत्रं २५ ॥

।१। आर्य अलीकं पुरुषेषु न्यासा निक्षिप्यन्ते न पुनर्गृहेषु।

।२। अनुगृहीतास्मि।

।३। स्वस्ति भवत्यै।

।४। यद्येवं तदा चौरैरपह्रियताम्।

।५। एषो ऽस्या अस्माकं विन्यासः।

।६। आर्य इच्छाम्यहमनेनार्येणानुगम्यमाना स्वकं गृहं गन्तुम्।

।७। त्वमेवैतां कलहंसगामिनीमनुगच्छन् राजहंस इव शोभसे। अहं पुनर्ब्राह्मणस्तैस्तैश्चतुष्पथोपनीत इव उपहारः कुक्कुरैरिव खाद्यमानो विपत्स्ये।

।८। वर्धमानक ज्वालय प्रदीपिकाः।

।९। अरे तैलेन विना प्रदीपिकाः प्रज्वाल्यन्ते।

।१०। भो ताः खल्वस्माकं प्रदीपिका अवमानितनिर्धनकामुका इव गणिका निःस्नेहा इदानीं संवृत्ताः।

॥ पत्रं २६ ॥

।१। यथा भवानाज्ञापयति।

॥ पत्रं २७ ॥

।१। अत्रयाज्जुकासकाशं सन्देशेन प्रेषितास्मि। तयावत्प्रविश्याज्जुकासकाशं गच्छामि। एषाज्जुका हृदयेन किमप्यालिखन्ती तिष्ठति। तयात्रदुपसर्पामि।

।२। चेटि ततस्ततः।

।३। अज्जुके न किमपि मन्त्रयसि। किं ततस्ततः।

।४। किं मया भणितम्।

।५। ततस्तत इति।

।६। आं एवम्।

।७। अज्जुके अत्रादिशति स्नाता भूत्वा देवतानां पूजां निर्वर्तयेति।

।८। चेटि विज्ञापयात्राम्य न स्नास्यामि तद्ब्राह्मण एव पूजां निर्वर्तयत्विति।

।९। यदार्याज्ञापयति।

।१०। अज्जुके स्नेहः पृच्छति न पुरोभागिता तत्किं न्विदम्।

।११। मदनिके कीदृशीं मां पश्यसि।

।१२। अज्जुकायाः शून्यहृदयत्वेन जानामि हृदयगतं कमप्यज्जुकाभिलषतीति।

।१३। सुष्ठु त्वया ज्ञातम्। परहृदयग्रहणपण्डिता मदनिका खलु त्वम्।

॥ पत्रं २८ ॥

।१। प्रियं मे प्रियम्। कामः खलु नामैष भगवाननवगृहीतो मधूत्सवस्तरुणजनस्य। तत्कथयत्वज्जुका किं राजा राजवल्लभो वा सेव्यते।

।२। चेटि रन्तुमिच्छामि न सेवितुम्।

।३। विद्याविशेषालङ्कृतः किं को ऽपि ब्राह्मणो युवा काम्यते।

।४। चेटि पूजनीयो मे ब्राह्मणो जनः।

।५। किमनेकनगराभिगमनजनितविभवविस्तरो वणिग्युवा वा काम्यते।

।६। चेटि उपारूढस्नेहमपि प्रणयिजनं परित्यज्य देशान्तरगमनेन वणिग्जनो महद्वियोगदुःखमुत्पादयति।

।७। अज्जुके न राजा न राजवल्लभो न ब्राह्मणो न वणिग्जनः। तत्क इदानीं स भर्तृदारिकया काम्यते।

।८। चेटि त्वं मया सह कामदेवायतनोद्यानं गतासीः।

।९। अज्जुके गतास्मि।

।१०। चेटि तथापि मामुदासीनेव पृच्छसि।

।११। ज्ञातमज्जुके। किं स एव येनाज्जुका शरणागताभ्युपपन्ना।

।१२। किन्नामधेयः खलु सः।

।१३। स खलु श्रेष्ठिचत्वरे प्रतिवसति।

।१४। अयि नामास्य पृष्टासि।

।१५। स खलु अज्जुके सुगृहीतनामधेय आर्यचारुदत्तो नाम।

।१६। साधु मदनिके साधु। सुष्ठु त्वया ज्ञातम्।

॥ पत्रं २९ ॥

।१। एवं तावत्। अज्जुके दरिद्रः खलु स श्रूयते।

।२। अत एव काम्यते। दरिद्रपुरुषसंक्रान्तमना: खलु गणिका लोके ऽवचनीया भवति।

।३। अज्जुके किं जीर्णकुसुमं सहकारपादपं मधुकर्यः पुनः सेवन्ते।

।४। अत एव ता मधुकर्य उच्यन्ते।

।५। अज्जुके यदि स मनीषितस्तत्किमर्थमिदानीं सहसा नाभिसार्यते।

।६। चेटि सहसाभिसार्यमाणः प्रत्युपकारदुर्बलतया मा तावज्जनो दुर्लभदर्शनः पुनर्भविष्यति।

।७। अज्जुके किमत एव सो ऽलङ्कारस्तस्य हस्ते निक्षिप्तः।

।८। चेटि सुष्ठु त्वया ज्ञातम्।

।९। अरे रे भट्टारक दशसुवर्णस्य लुब्धो द्यूतकरः प्रपलायितः। तद्गृहाण गृहाण। तिष्ठ दूरात्प्रदृष्टो ऽसि।

।१०। कष्ट एष द्यूतकरभावः। आश्चर्यम्।

नवबन्धनमुक्तयेव गर्दभ्या हा ताडितो ऽस्मि गर्दभ्या।
अङ्गराजमुक्तयेव शक्त्या घटोत्कच इव घातितो ऽस्मि शक्त्या॥
लेखकव्यापृतहृदयं सभिकं दृष्ट्वा झटिति प्रभ्रष्टः।
इदानीं मार्गनिपतितः कं नु खलु शरणं प्रपद्ये॥

तद्यावदेतौ सभिकद्यूतकरावन्यतो मामन्विष्यतस्तावदितो विप्रतीपाभ्यां पादाभ्यामेतच्छून्यं देवकुलं प्रविश्य देवीभविष्यामि।

॥ पत्रं ३० ॥

।१। अरे भट्टा दशसुवर्णस्य लुब्धो द्यूतकरः प्रपलायितः। गृहाण गृहाण। तिष्ठ तिष्ठ दूरात्प्र दृष्टो ऽसि।

।२। यदि व्रजसि पातालमिन्द्रं शरणं च साम्प्रतं यासि।
सभिकं वर्जयित्वैकं रुद्रो ऽपि न रक्षितुं शक्नोति॥

।३। कुत्र कुत्र सुसभिकविप्रलम्भक
पलायसे रे भयपरिवेपिताङ्गक।
पदे पदे समविषमं स्खलन्
कुलं यशः सकलुषं कुर्वन्॥

।४। एष व्रजति। इयमियं प्रनष्टा पदवी।

।५। अरे विप्रतीपौ पादौ प्रतिमाशून्यं देवकुलम्। धूर्तो द्यूतकरो विप्रतीपाभ्यां पादाभ्यां देवकुलं प्रविष्टः।

।६। तदनुसरावः।

।७। एवं भवतु।

।८। कथं काष्ठमयी प्रतिमा।

।९। अरे न खलु न खलु शैलप्रतिमा। एवं भवतु। एहि द्यूतं क्रीडावः।

।१०। अरे। कत्ताशब्दो निर्धानकस्य हरति हृदयं मनुष्यस्य।
ढक्काशब्द इव नराधिपस्य प्रभ्रष्टराज्यस्य॥
जानामि न क्रीडिष्यामि सुमेरुशिखरपतनसन्निभं द्यूतम्।
तथापि च कोकिलमधुरः कत्ताशब्दो मनो हरति॥

।११। मम पाठे मम पाठे।

॥ पत्रं ३१ ॥

।१। न खलु मम पाठे मम पाठे।

।२। ननु मम पाठे।

।३। लब्धः पुरुषः।

।४। अरे लुप्तदण्डक गृहीतोऽसि। प्रयच्छ तद्दशसुवर्णम्।

।५। आर्य दास्यामि।

।६। अधुना प्रयच्छ।

।७। दास्यामि प्रसादं कुरु।

।८। अरे ननु साम्प्रतं प्रयच्छ।

।९। शिरः पतति।

।१०। एष त्वं। द्यूतकरमण्डल्या बद्धोऽसि।

।११। कथं द्यूतकरमण्डल्या बद्धोऽस्मि। कष्ट एषोऽस्माकं द्यूतकराणामलङ्घनीयः समयः। तत्कुतो दास्यामि।

।१२। अरे गण्डः कृतः।

।१३। एवं करोमि। अर्धं ते ददामि अर्धं मे मुञ्चतु।

।१४। एवं भवतु।

।१५। अर्धस्य गण्डं करोमि अर्धं मे आर्यो मुञ्चतु।

।१६। को दोषः। एवं भवतु।

।१७। आर्य अर्धं त्वया मुक्तम्।

।१८। मुक्तम्।

।१९। अर्धं त्वयापि मुक्तम्।

॥ पत्रं ३२ ॥

।१। मुक्तम्।

।२। साम्प्रतं गमिष्यामि।

।३। प्रयच्छ तद्दशसुवर्णं कुत्र गच्छसि।

।४। पश्यत पश्यत भट्टारकाः। साम्प्रतमेवैकस्यार्धे गण्डः कृतः अपरस्यार्धो मुक्तस्तथापि मामपरं साम्प्रतमेव याचते।

।५। धूर्तो माथुरोऽहं निपुणोऽत्र नाहं धूर्त्ये। तत्प्रयच्छ तल्लुप्तगण्डक सर्वं सुवर्णं साम्प्रतम्।

।६। कुतो दास्यामि।

।७। पितरं विक्रीय प्रयच्छ।

।८। कुतो मे पिता।

।९। मातरं विक्रीय प्रयच्छ।

।१०। कुतो मे माता।

।११। आत्मानं विक्रीय प्रयच्छ।

।१२। कुरुत प्रसादं नयत मां राजमार्गम्।

।१३। प्रसर प्रसर।

।१४। एवं भवतु। आर्याः क्रीणीत मामस्य सभिकस्य हस्ताद्दशभिः सुवर्णैः। किं भणत किं करिष्यसीति। गृहे ते कर्मकरो भविष्यामि। कथमदत्वा प्रतिवचनं गतः। भवत्वेवमिममन्यं भणिष्यामि। कथमेषोऽपि मामवधीर्य गतः। आ आर्यचारुदत्तस्य विभवे विघटिते एष वर्तामि मन्दभाग्यः।

।१५। ननु देहि।

।१६। कुतो दास्यामि।

।१७। आर्याः परित्रायत परित्रायत।

॥ पत्रं ३३ ॥

।१। दापय दापय।

।२। कुतो दास्यामि।

॥ पत्रं ३४ ॥

।१। अयं दशसुवर्णं धारयति।

।२। भट्टाः पश्यत पश्यत। जर्जरपटप्रावृतोऽयं पुरुषो दशसुवर्णं कल्यवर्तं भणति।

।३। भट्ट तव दशसुवर्णं कल्यवर्तो ममैव विभवः।

।४। तत्किं भवतु।

।५। अथ न ज्ञयति।

॥ पत्रं ३५ ॥

।१। अथ न युक्तं जल्पितुम्। एवमाख्यांस्त्वं प्रयच्छ धूर्तक। अहमपि नाम माथुरो धूर्तो द्यूतं मिथ्यादर्शयामि अन्यस्याप्यहं न बिभेमि धूर्त खण्डितवृत्तोऽसि त्वं।

।२। त्वं खण्डितवृत्तः।

।३। वेश्यापुत्र न प्रतिश्रुत्य द्यूतं मया सेवितम्।

।४। अरे संवाहक प्रयच्छ तद्दशसुवर्णम्।

।५। आर्य दास्यामि तावद्दास्यामि।

।६। अरे रे दुष्ट पुंश्चलीपुत्रक फलमपि प्राप्स्यसि।
।७। एष प्रेक्षिष्ये।
।८। एवं प्रेक्षिष्ये।

॥ पत्रं ३६ ॥

।१। एतत्कस्याप्यपरावृतपक्षद्वारकं गृहम्। तदत्र प्रविशामि। आर्ये शरणागतो ऽस्मि।
।२। अभयं शरणागतस्य हे चेटि पिधेहि पक्षद्वारकम्।
।३। अज्जुके कृतम्।
।४। यत्त्वया कथितम्।
।५। कुतस्ते भयम्।
।६। आर्ये धनिकात्।
।७। चेटि साम्प्रतमपावृणु पक्षद्वारम्।
।८। कथं धनिकात्तुलितमस्या भयकारणम्। सुष्ठु खल्वेवमुच्यते।

य आत्मबलं ज्ञात्वा भारं तुलितं वहति मनुष्यः।
तस्य स्खलनं न जायते न च कान्तारगतो विपद्यते॥

अत्र लक्षितो ऽस्मि।

।९। अरे देहि देहि।
।१०। भट्ट यावदेव वयं दर्दुरेण कलहायितास्तावदेव स पुरुषो ऽपक्रान्तः।
।११। तस्य द्यूतकरमुष्टिप्रहारेण नासिका भग्नासीत्। तदेहि रुधिरपथमनुसरामः।
।१२। भट्ट वसन्तसेनागृहं प्रविष्टः सः।
।१३। भूतानि सुवर्णानि।
।१४। राजकुलं गत्वा निवेदयावः।
।१५। एष धूर्त इतो निष्क्रम्यान्यत्र गमिष्यति। तस्मादुपरोधेनैव गृह्णीमः।

॥ पत्रं ३७ ॥

।१। कुत आर्यः को वार्यः कस्य वार्यः कां वा वृत्तिमार्य उपजीवति कुतो वा भयं।
।२। शृणोत्वज्जुका। अज्जुके पाटलिपुत्रं मे जन्मभूमिर्गृहपतिदारको ऽहं संवाहकस्य वृत्तिमुपजीवामि।
।३। सुकुमारा खलु कला शिक्षितार्येण।
।४। अज्जुके कलेति शिक्षिता आजीविकेदानीं संवृत्ता।
।५। अतिनिर्विण्णमार्येण प्रतिवचनं दत्तं ततस्ततः।
।६। ततो ऽज्जुके एष निजगृहे आहिण्डकानां मुखाच्छ्रुत्वापूर्वदेशदर्शनकुतूहलेनेहागतः। इहापि मया प्रविश्योज्जयिनीमेक आर्यः शुश्रूषितो यस्तादृशः प्रियदर्शनः प्रियवादी दत्वा न कीर्तयत्यपकृतं विस्मरति। किं बहुनोक्तेन दक्षिणतया परकीयमिवात्मानमवगच्छति शरणागतवत्सलश्च।
।७। क इदानीमार्याया मनोरथान्तरस्य गुणांश्चोरयित्वोज्जयिनीमलङ्करोति।
।८। साधु चेटि साधु। मयाप्येवमेव हृदयेन मन्त्रितम्।
।९। आर्य ततस्ततः।
।१०। ततो ऽज्जुके स इदानीमनुक्रोशकृतैः प्रदानैः।
।११। किमुपरतविभवः संवृत्तः।

।१२। अनाख्यातमेव कथमज्जुकया विज्ञातम्।

।१३। किमत्र ज्ञायते दुर्लभा गुणा विभवाश्च अपेयेषु तडागेषु बहुतरमुदकं भवति।

।१४। आर्य किन्नामधेयः खलु सः।

॥ पत्रं ३८ ॥

।१। क इदानीं तस्य भूतलमृगाङ्कस्य नाम न जानाति स खलु श्रेष्ठिचत्वरे प्रतिवसति श्लाघनीयनामधेय आर्यचारुदत्तो नाम।

।२। आर्यस्यात्मीयमेतद्गृहम्। चेटि देह्यस्यासनम्। तालवृन्तकं गृहाण परिश्रम आर्यस्य बाधते।

।३। कथं आर्यचारुदत्तस्य नामसंकीर्तनेन ईदृशो मे आदरः। साधु आर्यचारुदत्त साधु पृथिव्यां त्वमेको जीवसि शेषः पुनर्जनः श्वसिति। भवतु अज्जुके भवतु आसने निषीदतु अज्जुका।

।४। आर्य कुतः स धनिकः।

।५। सत्कारधनः खलु सज्जनः कस्य न भवति चलाचलं धनम्।
यः पूजितुमपि जानाति स पूजाविशेषमपि जानाति॥

।६। ततः।

।७। ततस्तेन आर्येण सवृत्तिः परिचारकः कृतो ऽस्मि चारित्र्यावशेषे च तस्मिन्द्यूतोपजीव्यस्मि संवृत्तः। ततो भागधेयविषमतया दशसुवर्णं द्यूते हारितम्।

।८। उत्सादितो ऽस्मि मूषितो ऽस्मि।

।९। एतौ तौ सभिकद्यूतकरौ मामनुसन्धत्तः। साम्प्रतं श्रुत्वाज्जुका प्रमाणम्।

।१०। मदनिके वासपादपविसंष्ठुलतया पक्षिणो ऽपीतस्तत आहिण्डन्ति। हे चेटि तदच्छैतयोः सभिकद्यूतकरयोरयमार्य एव प्रतिपादयतीतीदं हस्ताभरणकं त्वं देहि।

।११। यदज्जुकाज्ञापयति।

॥ पत्रं ३९ ॥

।१। उत्सादितो ऽस्मि मूषितो ऽस्मि।

।२। यथैतावूर्ध्वं प्रेक्षेते दीर्घं निःश्वसतश्च खिद्येते अभिलिखतश्च द्वारनिहितलोचनो तथा तर्कयामि एतौ तौ सभिकद्यूतकरौ भविष्यतः। आर्य वन्दे।

।३। सुखं तव भवतु।

।४। आर्य कतरो युवयोः सभिकः।

।५। कस्य त्वं तनुमध्ये अधरेण रतिदष्टदुर्विषीतेन।
जल्पसि मन्मनवचनमालोकयन्ती कटाक्षेण॥

नास्ति मम विभवः अन्यत्र व्रज।

।६। यदीदृशानि न मन्त्रयसि तदा न भवसि द्यूतकरः। अस्ति को ऽपि युष्माकं धारकः।

।७। अस्ति दशसुवर्णं धारयति किं तस्य।

।८। तस्य कारणादज्जुकेदं हस्ताभरणं प्रतिपादयति। नहि नहि स एव प्रतिपादयति।

।९। अरे भणासि तं कुलपुत्रम्। भूतस्तव गण्ड आगच्छ पुनर्द्यूतं रमस्व।

।१०। अज्जुके परितुष्टौ गतौ सभिकद्यूतकरौ।

।११। तदच्छत्वार्या बन्धुजनं समाश्वासयितुम्।

।१२। अज्जुके यद्येवं तदियं कला परिजनहस्तगता क्रियताम्।

।१३। आर्य यस्य कारणादियं कला शिक्ष्यते स एवार्येण शुश्रूषितपूर्वः शुश्रूषितव्यः।

॥ पत्रं ४० ॥

।१। अज्जुकया निपुणं प्रत्यादिष्टो ऽस्मि। तत्कथं प्रत्युपकरिष्ये। अज्जुके अहमेतेन द्यूतकरावमानेन शाक्यश्रमणको भविष्यामि। तत्संवाहको द्यूतकरः शाक्यश्रमणकः संवृत्त इति स्मर्तव्यान्यज्जुकयैतान्यक्षराणि।

।२। आर्य अलं साहसेन।

।३। अज्जुके कृतो निश्चयः।

द्यूतेन तत्कृतं मे यद्बीभत्सं जनस्य सर्वस्य।
इदानीं प्रकटशीर्षो नरेन्द्रमार्गेण विहरिष्यामि॥

।४। अरे किं न्वेतत्। किं भणत। एष खलु वसन्तसेनायाः स्तम्भभञ्जको नाम दुष्टहस्ती विहरतीति। अहो अज्जुकाया गन्धगजं प्रेक्षिष्ये गत्वा। अथवा किं ममैतेन यथाव्यवसितमनुष्ठास्यामि।

।५। कुत्र कुत्राज्जुका।

।६। दुर्मनुष्य किं ते उद्वेगकारणं यदग्रतो ऽवस्थितामज्जुकां न प्रेक्षसे।

।७। अज्जुके वन्दे।

।८। कर्णपूरक परितुष्टमुखो लक्ष्यसे तत्किं न्विदम्।

।९। अज्जुके वञ्चितासि ययाद्य कर्णपूरकस्य पराक्रमो न दृष्टः।

।१०। कर्णपूरक किं किम्।

॥ पत्रं ४१ ॥

।१। शृणोत्वज्जुका। यः सो ऽज्जुकायाः स्तम्भभञ्जको नाम दुष्टहस्ती स आलानस्तम्भं भङ्क्त्वा महामात्रं व्यापाद्य महान्तं संक्षोभं कुर्वन्राजमार्गमवतीर्णः। ततो ऽत्रान्तरे उद्घुष्टं जनेन।

अपनयत बालकजनं त्वरितमारोहत वृक्षप्रासादम्।
किं न खलु प्रेक्षध्वं पुरतो दुष्टो हस्तीत एति॥

अपिच। विचलति नूपुरयुगलं छिद्यन्ते च मेखला मणिखचिताः।
वलयाश्च सुन्दरतरा रत्नाङ्कुरजालप्रतिबद्धाः॥

ततस्तेन दुष्टहस्तिना करचरणरदनैः फुल्लनलिनीमिव नगरीमुज्जयिनीमवगाहमानेन समासादितः परिव्राजकः। तं च परिभ्रष्टदण्डकुण्डिकाभाजनं शीकरैः सिक्त्वा दन्तान्तरे क्षिप्तं प्रेक्ष्य पुनरप्युद्घुष्टं जनेन हा परिव्राजको व्यापाद्यते इति।

।२। अहो प्रमादः।

।३। अलं सम्भ्रमेण शृणोतु तावदज्जुका। ततो विच्छिन्नशृङ्खलाकलापं दन्तान्तरपरिगृहीतं परिव्राजकमुद्वहन्तं तं प्रेक्ष्य कर्णपूरकेण मया नहि नहि अज्जुकाया अन्नपिण्डोपपुष्टेन दासेन वामचरणेन द्यूतलेखकमुद्घृष्योद्घृष्य त्वरितापणाल्लोहदण्डं गृहीत्वाकारितः स दुष्टहस्ती।

।४। ततस्ततः।

।५। आहत्य सरोषं तं हस्तिनं विन्ध्यशैलशिखराभम्।
मोचितो मया स दन्तान्तरसंस्थितः परिव्राजकः॥

।६। सुष्ठु त्वया कृतं ततस्ततः।

।७। ततो ऽज्जुके साधु रे कर्णपूरक साधु इत्येतावन्मात्रं भणन्ती विषमभराक्रान्तेव नौरेकतः

पर्यस्ता सकलोऽङ्गविन्यासीत्। ततो ऽज्जुके एकेन शून्यान्याभरणस्थानानि परामृशोर्ध्वं प्रेक्ष्य दीर्घं निःश्वस्याथं प्रावारको ममोपरि क्षिप्तः।

।८। कर्णपूरक जानीहि तावत्किमेष जातीकुसुमवासितः प्रावारको न वेति।

॥ पत्रं ४२ ॥

।१। अज्जुके मद्गन्धेन सुष्ठु तं गन्धं न जानामि।

।२। नामापि तावत्प्रेक्षस्व।

।३। इदं नाम अज्जुकैव वाचयतु।

।४। कर्णपूरक शोभते ऽज्जुकायाः प्रावारकः।

।५। आं शोभते ऽज्जुकायाः प्रावारकः।

।६। कर्णपूरक इदं ते पारितोषिकम्।

।७। साम्प्रतं सुष्ठु शोभते ऽज्जुकायाः प्रावारकः।

।८। कर्णपूरक एतस्यां वेलायां कुत्र स आर्यचारुदत्तः।

।९। एतेनैव मार्गेण प्रवृत्तो गृहम्।

।१०। चेटि उपरितनमलिन्दकमारुह्यार्यचारुदत्तं पश्यामः।

॥ पत्रं ४३ ॥

।१। सुजनः खलु भृत्यानुकम्पकः स्वामी निर्धनको ऽपि शोभते।
पिशुनः पुनर्द्रव्यगर्वितो दुष्करः खलु परिणामदारुणः॥

अपि च। शस्यलम्पटबलीवर्दो न शक्यो वारयितुं
अन्यकलत्रप्रसक्तो न शक्यो वारयितुम्।
द्यूतप्रसक्तो मनुष्यो न शक्यो वारयितुं
यो ऽपि स्वाभाविकदोषो न शक्यो वारयितुम्॥

कापि वेला आर्यचारुदत्तस्य गान्धर्वं श्रोतुं गतस्य अतिक्रामति अर्धरात्रो अद्यापि नागच्छति। तद्यावद्बहिर्द्वारशालायां गत्वा स्वप्स्यामि।

।२। भो एहि गृहं गच्छावः।

॥ पत्रं ४४ ॥

।१। मम तावत् द्वाभ्यामेव हास्यं जायते। स्त्रिया संस्कृतं पठन्त्या मनुष्येण च काकलीं गायता। स्त्री तावत्संस्कृतं पठन्ती दत्तनवनास्येव गृष्टिरधिकं सूसूशब्दं करोति मनुष्यो ऽपि काकलीं गायन् शुष्कसुमनोदामवेष्टितो वृद्धपुरोहित इव मन्त्रं जपन्दृढं मे न रोचते।

।२। भो वयस्य आपणान्तरवीथ्यां सुखं कुक्कुरा अपि प्रसुप्तास्तद्गृहं गच्छावः। वयस्य पश्य पश्य एषो ऽपि अन्धकारस्येवावकाशं ददन्तरीक्षप्रासादादवतरति भगवांश्चन्द्रः।

।३। भो इदमस्माकं गृहं वर्धमानक वर्धमानक देहि द्वारम्।

॥ पत्रं ४५ ॥

।१। आर्यमैत्रेयस्य स्वरसंयोगः श्रूयते। आगत आर्यचारुदत्तः। तद्यावत् द्वारं ददामि। आर्य वन्दे आर्य मैत्रेय त्वामपि वन्दे। अत्र विस्तीर्णो आसने निषीदतमार्यौ।

।२। वर्धमानक रदनिकां शब्दाय पादौ धावितुम्।

।३। आर्य मैत्रेय अहं पानीयं गृह्णामि त्वं पादौ धाव।

।४। भो वयस्य एष इदानीं दास्याः पुत्रो भूत्वा पानीयं गृह्णाति मां च ब्राह्मणं पादौ धावयति।

।५। आर्य मैत्रेय देह्युदकम् ॥

।६। किं मम पादोदकैः। भूम्यामेव मया ताडितगर्दभेनेव पुनरपि लोटितव्यम् ।

।७। आर्य मैत्रेय ब्राह्मणः खलु त्वम् ।

।८। यथा सर्वनागानां मध्ये डुण्डुभस्तथा सर्वब्राह्मणानां मध्ये ऽहं ब्राह्मणः ।

।९। आर्य मैत्रेय तथापि धाविष्यामि । आर्य मैत्रेय एतत्तत्सुवर्णभाण्डं मम दिवा तव रात्रौ च तद्गृहाण ।

।१०। अद्याप्येतन्निष्ठति। किमत्रोज्जयिन्यां चौरो ऽपि नास्ति य एतं दास्याः पुत्रो निद्राचौरं नाप हरति। भो वयस्य अभ्यन्तरचतुःशालकं प्रवेशयाम्येनम् ।

॥ पत्रं ४६ ॥

।१। अपि निद्राति भवान् ।

।२। तत्स्वपिवः ।

॥ पत्रं ४९ ॥

।१। भो वयस्य सन्धिरिव दृश्यते चौरमिव पश्यामि तद्गृह्णातु भवानिदं सुवर्णभाण्डम् ।

।२। भो वयस्य शापितो ऽसि गोब्राह्मणकाम्यया यदि एतत्सुवर्णभाण्डं न गृह्णासि ।

।३। भो वयस्य शीतलस्ते अग्रहस्तः ।

॥ पत्रं ५० ॥

।१। गृहीतम् ।

।२। इदानीं विक्रीतपण्य इव वणिक् सुखं स्वप्स्यामि ।

।३। हा धिक् हा धिक् वाक्षद्वारशालायां प्रसुप्तो वर्धमानकः सो ऽप्यत्र न दृश्यते। भवतु आर्यमैत्रेयमाह्वयामि ।

॥ पत्रं ५१ ॥

।१। हा धिक् हा धिक् अस्माकं गृहे सन्धिं कल्पयित्वा चौरो निष्क्रामति। भवतु मैत्रेयं गत्वा प्रबोधयामि । आर्य मैत्रेय उत्तिष्ठ उत्तिष्ठ अस्माकं गृहे सन्धिं कल्पयित्वा चौरो निष्क्रान्तः ।

।२। आः दास्याः पुत्रिके किं भणसि चौरः कल्पितः सन्धिर्निष्क्रान्त इति ।

।३। हताश अलं परिहासेन किं न प्रेक्षसे एतत् ।

।४। आः दास्याः पुत्रिके किं भणसि द्वितीयमपि द्वारमुद्घाटितमिति। भो वयस्य चारुदत्त उत्तिष्ठ उत्तिष्ठ अस्माकं गृहे सन्धिं दत्त्वा चौरो निष्क्रान्तः ।

।५। भो न परिहासः प्रेक्षतां भवान् ।

।६। भो एषः ।

।७। भो वयस्य एष सन्धिर्द्वाभ्यामेव दत्तो भवेत्। अथवागन्तुकेन शिक्षितुकामेन वा। अन्यथेहोज्जयिन्यां को ऽस्माकं गृहविभवं न जानाति।

॥ पत्रं ५२ ॥

।१। भो कथं तमेव चौरहतकमनुशोचसि। तेन चिन्तितं महदेतद्गृहं इतो रत्नभाण्डं सुवर्णभाण्डं वा निष्क्रामयिष्यामि। कुत्र तत्सुवर्णभाण्डकम् । भो वयस्य त्वं सर्वकालं भणसि मूर्खो मैत्रेयो ऽपण्डितो

मैत्रेय इति। सुष्ठु खलु मया कृतं तत्सुवर्णभाण्डकं भवतो हस्ते समर्पयता अन्यथा दास्याः पुत्रेण पहृतं भवेत्।

।२। भो यद्यपि नामाहं मूर्खस्तथापि परिहासस्यापि देशकालं न जानामि।

।३। यदा त्वं मया भणितो ऽसि शीतलस्ते ऽग्रहस्तः।

।४। किं नापहृतम्।

।५। तथापि किं प्रियम्।

।६। न्यासः खलु सः।

॥ पत्रं ५३ ॥

।१। समाश्वसितु भवान्। यदि न्यासश्चौरेणापहृतस्त्वं किं मोहमुपगतः।

।२। अहं खलु अपलपिष्यामि। केन दत्तं केन गृहीतं को वा साक्षीति।

।३। तथावदार्याधूतायै गत्वा निवेदयामि।

।४। अयि सत्यमपरिक्षतशरीर आर्यपुत्र आर्यमैत्रेयेण सह।

।५। स्वामिनि सत्यं किं तु यः स वेश्याजनस्यालङ्कारः सो ऽपहृतः।

।६। समाश्वसितु आर्याधूता।

॥ पत्रं ५४ ॥

।१। चेटि किं भणसि अपरिक्षतशरीर आर्यपुत्र इति। वरमिदानीं स शरीरेण परिक्षतो न पुनश्चारित्रेण। साम्प्रतमुज्जयिन्यां जन एवं मन्त्रयिष्यति दरिद्रतयार्यपुत्रेणैवेदृशमकार्यमनुष्ठितमिति। भगव न्कृतान्त पुष्करपत्रपतितजलबिन्दुचञ्चलैः क्रीडसि दरिद्रपुरुषभागधेयैः। इयं च मे एका मातृगृहलब्धा रत्नावली तिष्ठति। एतामप्यतिशौण्डीरतयैव आर्यपुत्रो न ग्रहीष्यति। चेटि आर्यमैत्रेयं तावदाह्वय।

।२। यदार्याधूताज्ञापयति। आर्य मैत्रेय धूता त्वामाज्ञापयति।

।३। कुत्र सा।

।४। एषा तिष्ठति उपसर्प।

।५। स्वस्ति भवत्याः।

।६। आर्य वन्दे। आर्य पुरस्तान्मुखो भव।

।७। एष भवति पुरस्तान्मुखः संवृत्तो ऽस्मि।

।८। आर्य प्रतीच्छेमाम्।

।९। किं न्विदम्।

।१०। अहं खलु रत्नषष्ठीमुपोषितासं तत्र यथाविभवानुसारेण ब्राह्मणः प्रतिग्राहितव्यः स च न प्रतिग्राहितस्तन्नस्य कृते प्रतीच्छेमां रत्नावलिकाम्।

।११। स्वस्ति गमिष्यामि प्रियवयस्यस्य निवेदयामि।

।१२। आर्य मैत्रेय मा खलु तं लज्जितं कुरु।

।१३। अहो अस्या महानुभावता।

॥ पत्रं ५५ ॥

।१। एषो ऽस्मि गृहाणेदम्।

।२। भो वयस्य यत्ते सदृशदारसंग्रहस्य फलम्।

।३। मा तावदलङ्कृतस्याभुक्तस्याल्पमूल्यस्य चौरैरपहृतस्य कारणाच्चतुःसमुद्रसारभूता रत्नावली दीयते ।

।४। भो दरिद्रः किमकृपणं मन्त्रयति ।

॥ पत्रं ५७ ॥

।१। आज्ञप्तास्मि मात्राऽज्जुकायाः सकाशं गन्तुम्। एषाऽज्जुका चित्रफलकनिषण्णदृष्टिर्मदनिकया सह किमपि मन्त्रयन्ती तिष्ठति। तद्यावदुपसर्पामि।

।२। चेटि मदनिके अपि सुसदृशीयं चित्राकृतिरार्यचारुदत्तस्य ।

।३। सुसदृशी ।

।४। कथं त्वं जानासि ।

।५। येनाज्जुकायाः सुस्निग्धा दृष्टिरनुलग्ना।

।६। चेटि किं वेशवासदाक्षिण्येण मदनिके एवं भणसि ।

।७। अज्जुके किं य एव जनो वेशे प्रतिवसति स एव अलीकदाक्षिण्यो भवति ।

।८। चेटि नानापुरुषसङ्गेन वेश्याजनो ऽलीकदाक्षिण्यो भवति ।

।९। यतस्तावदज्जुकाया दृष्टिरिहाभिरमते हृदयं च। तस्य कारणं किं पृच्छ्यते ।

।१०। चेटि सखीजनादुपहसनीयतां रक्षामि ।

।११। अज्जुके एवं नेदं सखीजनचित्तानुवर्ती अबलाजनो भवति ।

॥ पत्रं ५८ ॥

।१। अज्जुके माताज्ञापयति गृहीतावगुण्ठनं पक्षद्वारे सज्जं प्रवहणं तद्गच्छेति।

।२। चेटि किमार्यचारुदत्तो मां नेष्यति ।

।३। अज्जुके येन प्रवहणेन सह सुवर्णशतसाहस्रिको ऽलङ्कारो ऽनुप्रेषितः ।

।४। कः पुनः सः ।

।५। एष एव राजश्यालः संस्थानकः ।

।६। अपेहि मा पुनरेवं भणिष्यसि ।

।७। प्रसीदतु प्रसीदतु अज्जुका सन्देशेनास्मि प्रेषिता।

।८। अहं सन्देशस्यैव कुप्यामि ।

।९। तत्किं मातरं विज्ञापयिष्यामि ।

।१०। एवं विज्ञापयितव्या यदि मां जीवन्तीमिच्छसि तदैवं पुनर्मात्रा नाज्ञापयितव्यम् ।

।११। यथा ते रोचते ।

॥ पत्रं ५९ ॥

।१। चेटि इमं चित्रफलकं मम शयनीये स्थापयित्वा तालवृन्तं गृहीत्वा लघु आगच्छ ।

।२। यदज्जुकाज्ञापयति ।

।३। कथं शर्विलकः। शर्विलक स्वागतं ते कुत्र त्वम् ।

॥ पत्रं ६० ॥

।१। चिरयति मदनिका तत्कुत्र नु खलु सा। कथमेषा केनापि पुरुषकेण सह मन्त्रयन्ती तिष्ठति। यथा चातिस्निग्धया निश्चलदृष्ट्यापिबन्तीवैतन्निर्ध्यायति। तथा तर्कयामि एष स जन एनामिच्छत्यभुजिष्यां कर्तुम्। तद्रमतां रमतां मा कस्यापि प्रीतिच्छेदो भवतु न खलु आकारयिष्यामि ।

।२। शर्विलक कथय ।

।३। शर्विलक किं त्विदं सशङ्क इव लक्ष्यसे ।

।४। अथ किम् ।

।५। कथं परमरहस्यं तन्न श्रोष्यामि ।

।६। कथं मत्सम्बन्धिनी कथा तच्छ्रोष्यामि ।

।७। शर्विलक भणिता मयाऽज्जुका ततो भणति यदि मम स्वच्छन्दस्तदा विनार्थं सर्वं परिजनम् भुजिष्यं करिष्यामि। अथ शर्विलक कुतस्ते एतावान्विभवो येन मामज्जुकासकाशान्मोचयिष्यसि ।

।८। प्रसन्नास्याकृतिः साहसकर्मतया पुनरुद्वेजनीया ।

।९। शर्विलक स्त्रीकल्यवर्तस्य कारणेनोभयमपि संशये विनिक्षिप्तम् ।

।१०। शरीरं चारित्रं च ।

।११। शर्विलक अखण्डितचारित्रो ऽसि तन्न खलु त्वया मम कारणात्साहसं कुर्वतात्यन्तविरुद्धमाचरितम् ।

॥ पत्रं ६१ ॥

।१। शर्विलक अप्रकाशो ऽलङ्कारो ऽयं च जन इति द्वयमपि न युज्यते तदुपनय तावत्पश्यामि एतमलङ्कारम् ।

।२। शर्विलक दृष्टपूर्व इवायमलङ्कारस्तत्कथं कुत एषः ।

।३। यदि मे प्रत्ययं न गच्छसि तत्किन्निमित्तं मां निष्क्रीणासि ।

।४। साहसिक न खलु त्वया मम कारणादिदमकार्यं कुर्वता तस्मिन्गृहे को ऽपि व्यापादितः परिक्षतो वा ।

॥ पत्रं ६२ ॥

।१। सत्यम् ।

।२। आश्चर्यं प्रत्युपजीवितास्मि ।

।३। प्रियम् ।

।४। अहो अस्यास्थाने आवेगः ।

॥ पत्रं ६३ ॥

।१। अयि असम्बद्धभाषक असम्भावनीये कुप्यसि ।

।२। एष खलु अलङ्कारो ऽज्जुकासम्बन्धी ।

।३। स च तस्यार्यस्य हस्ते विनिक्षिप्तः ।

।४। एवमिव ।

।५। कथमेषो ऽपि सन्तप्यते एव । तदजानतैतेनैवमनुष्ठितम् ।

॥ पत्रं ६४ ॥

।१। अत्र त्वमेव पण्डितः ।

।२। शर्विलक यदि मम वचनं श्रूयते तत्तस्यैव महानुभावस्य प्रतिनिर्यातय ।

।३। न चन्द्रादातपो भवति ।

।४। साधु मदनिके साधु ।

।५। एषो ऽयमपर उपायः ।

।६। कः खलु अपर उपायो भविष्यति ।
।७। तस्यैवार्यस्य सम्बन्धी भूत्वा इममलङ्कारमज्जुकाया उपनय ।
।८। त्वं तावच्चौरः सो ऽप्यार्यो ऽनृणो ऽज्जुकया स्वको ऽलङ्कार उपगतो भवति ।
।९। अयि उपनय अन्यथातिसाहसम् ।

॥ पत्रं ६५ ॥

।१। साधु मदनिके साधु अभुक्तिष्यैव मन्त्रितम् ।
।२। तेन हि त्वमस्मिन्कामदेवगृहे मुहूर्तं तिष्ठ यावदज्जुकायै तवागमनं निवेदयामि ।
।३। अज्जुके एष खलु चारुदत्तस्य सकाशाद्ब्राह्मण आगतः ।
।४। हे चेटि तस्य सम्बन्धीति कथं त्वं जानासि ।
।५। अज्जुके आत्मसम्बन्धिनमपि न जानामि ।
।६। युज्यते । प्रविशतु ।
।७। यदज्जुकाज्ञापयति । प्रविशतु शर्विलकः ।
।८। आर्य वन्दे समाविशतु आर्यः ।
।९। आर्य ममापि तावत्प्रतिसन्देशं तत्र नयत्वार्यः ।
।१०। प्रतीच्छत्वार्यो मदनिकाम् ।

॥ पत्रं ६६ ॥

।१। अहमार्यचारुदत्तेन भणिता य इममलङ्कारं समर्पयिष्यति तस्य त्वया मदनिका दातव्या । तत्स एवैतां ददातीति एवमार्येणावगन्तव्यम् ।
।२। को ऽत्र प्रवहणिकः ।
।३। अज्जुके सज्जं प्रवहणम् ।
।४। चेटि मदनिके सुदृष्टां कुरु मां दत्तासि आरोह प्रवहणं स्मरसि माम् ।
।५। परित्यक्तास्मि अज्जुकया ।
।६। साम्प्रतं त्वमेव वन्दनीया संवृत्ता तद्गच्छ आरोह प्रवहणं स्मरसि माम् ।

॥ पत्रं ६७ ॥

।१। एवमेतत् तत्परं नयतु मामार्यपुत्रः समीपं गुरुजनानाम् ।
।२। अथ किम् ।
।३। यदार्य आज्ञापयति ।
।४। यथार्यपुत्रो भणति अप्रमत्तेन तावदार्यपुत्रेण भवितव्यम् ।

॥ पत्रं ६८ ॥

।१। आर्ये दिष्ट्या वर्धसे आर्यचारुदत्तस्य सकाशाद्ब्राह्मण आगतः ।
।२। अहो रमणीयता अद्य दिवसस्य । तच्चेटि सादरं बन्धुलेन समं प्रवेशयैनम् ।
।३। यदज्जुकाज्ञापयति ।
।४। ही ही भोः तपश्चरणक्लेशविनिर्जितेन राक्षसराज्ञो रावणः पुष्पकेण विमानेन गच्छति अहं पुनर्ब्राह्मणो ऽकृततपश्चरणक्लेशो ऽपि नगरनारीजनेन गच्छामि ।
।५। प्रेक्षतामार्या ऽस्मदीयं गृहद्वारम् ।

।६। अहो सलिलसिक्तमार्जितकृतहरितोपलेपनस्य विविधकुसुमचित्रितभूमिकाभागस्य गगनतलालोकनकौतूहलदूरोन्नमितशीर्षस्य दोलायमानावलम्बितैरावणहस्तभ्रमितमल्लिकादामगुणालङ्कृतस्य समुच्छ्रितदन्तिदन्ततोरणावभासितस्य महारजनोपरागोपशोभिना पवनबलान्दोलनाललचञ्चलाग्रहस्तेन इत एहीति व्याहरतेव मां सौभाग्यपताकानिवहेनोपशोभितस्य तोरणधरणस्तम्भवेदिकानिक्षिप्तसमुल्लसद्धरितचूतपल्लवललामस्फटिकमङ्गलकलसाभिरामोभयपार्श्वस्य महासुरवक्षःस्थलदुर्भेद्यवज्रनिरन्तरप्रतिबद्धकनककवाटस्य दुर्गतजनमनोरथायासकरस्य वसन्तसेनाभवनद्वारस्य सश्रीकता। यत्सत्यं मध्यस्थस्यापि जनस्य बलाद् दृष्टिमाकारयति।

।७। इमं प्रथमं प्रकोष्ठं प्रविशतु आर्यः ।

॥ पत्रं ६९ ॥

।१। ही ही भोः शशिशङ्खमृणालस्वच्छाभा विनिहितचूर्णमुष्टिपाण्डुरा विविधरत्नप्रतिबद्धकाञ्चनसोपानशोभिताः प्रासादपङ्क्तयो ऽवलम्बितमुक्तादामभिः स्फटिकवातायनमुखचन्द्रैर्निध्यायन्तीवोज्जयिनीम् । श्रोत्रिय इव सुखोपविष्टो निद्राति दौवारिकः। सदध्ना कलमोदनेन प्रलोभिता न भक्षयन्ति वायसा बलिं सुधासवर्णतया। आदिशतु भवती ।

।२। एतु एतु आर्य इमं द्वितीयं प्रकोष्ठं प्रविशत्वार्यः ।

।३। ही ही भो इहापि द्वितीये प्रकोष्ठे पर्यन्तोपनीतयवसबुसकवलसुपुष्टा तैलाभ्यक्तविषाणा बद्धाः प्रवहणबलीवर्दाः । अयमन्यतरो ऽवमानित इव कुलीनो दीर्घं निःश्वसिति सैरिभः। इतश्चापनीतयुद्धस्य मल्लस्येव मर्द्यते ग्रीवा मेषस्य। इत इतो ऽपरेषामश्वानां केशकल्पना क्रियते। अयमपरः पाटच्चर इव दृढबद्धो मन्दुरायां शाखामृगः। इतश्च कूरास्थितैलमिश्रं पिण्डं हस्ती प्रतिग्राह्यते हस्तिपकैः। आदिशतु भवती ।

।४। एतु एतु आर्य इमं तृतीयं प्रकोष्ठं प्रविशत्वार्यः।

।५। ही ही भो इहापि तृतीये प्रकोष्ठे इमानि तावत्कुलपुत्रजनोपवेशननिमित्तं विरचितान्यासनानि। अर्धवाचितं पाशकपीठे तिष्ठति पुस्तकम्। स्वाधीनमणिमयसारिकासहितः पाशकपीठः। इमे चापरे मदनसन्धिविग्रहचतुरा विविधवर्णिकाविलिप्तचित्रफलाग्रहस्ता इतस्ततः परिभ्रमन्ति गणिका वृद्धविटाश्च। आदिशतु भवती।

।६। एतु एतु आर्य इमं चतुर्थं प्रकोष्ठं प्रविशत्वार्यः ।

॥ पत्रं ७० ॥

।१। ही ही भो इहापि चतुर्थे प्रकोष्ठे युवतिकरताडिता जलधरा इव गम्भीरं नदन्ति मृदङ्गाः क्षीणपुण्या इव गगनात्तारका निपतन्ति कांस्यताला मधुकरविरुतमधुरं वाद्यते वंशः। इयमपरा ईर्ष्याप्रणयकुपितकामिनीवाङ्कारोपिता कररुहपरामर्शेन सार्यते वीणा। इमा अपराः कुसुमरसमत्ता इव मधुकर्यो ऽतिमधुरं प्रगीता गणिकादारिका नृत्यते नाट्यं पठ्यते सशृङ्गारम्। अवलम्बिता गवाक्षेषु वातं गृह्णन्ति सलिलगर्गर्यः। आदिशतु भवती ।

।२। एतु एतु आर्य इमं पञ्चमं प्रकोष्ठं प्रविशत्वार्यः ।

।३। ही ही भो इहापि पञ्चमे प्रकोष्ठे अयं दरिद्रजनलोभोत्पादनकर आहरत्युपचितो हिङ्गुतैलगन्धः। विविधसुरभिधूमोद्गारैर्नित्यसन्तप्यमानं निःश्वसितीव महानसं द्वारमुखैः। अधिकमुत्सुकयति मां साध्यमानबहुविधभक्ष्यभोजनगन्धः। अयमपरो जीर्णवस्त्रमिव हतपशूदरपेशिं धावति रूपिदारकः। बहुविधाहारविकारमुपसाधयति सूपकारः। बध्यन्ते मोदकाः पच्यन्ते पूपकाः। अपीदानीमिह वर्धितं भुंक्ष्व इति पादोदकं लप्स्ये। इह गन्धर्वसुरगणैरिव विविधालङ्कारशोभितैर्गणिकाजनैर्बन्धुलैश्च यत्सत्यं स्वर्गायते इदं गृहं। भोः के यूयं बन्धुला नाम ।

।४। आदिशतु भवती ।

।५। एतु एतु आर्य इमं षष्ठं प्रकोष्ठं प्रविशत्वार्यः ।

॥ पत्रं ७१ ॥

।१। ही ही भो इहापि षष्ठे प्रकोष्ठे अद्यतावत्सुवर्णरत्नानां कर्म तोरणानि नीलरत्नविनिक्षिप्तानि इन्द्रायुधस्थानमिव दर्शयन्ते। वैडूर्यमौक्तिकप्रवालपुष्परागेन्द्रनीलकर्केतरकपद्मरागमरकतप्रभृतीन्रत्नविशेषानन्योन्यं विचारयन्ति शिल्पिनः। बध्यन्ते जातरूपैर्माणिक्यानि घट्यन्ते सुवर्णालङ्कारा रक्तसूत्रेण ग्रथ्यन्ते मौक्तिकाभरणानि घृष्यन्ते धीरं वैडूर्याणिछिद्यन्ते शङ्खाः। शाणे घृष्यन्ते प्रवालकाः शोष्यन्ते आर्द्रकुंकुमप्रस्तराः सार्यते कस्तूरिका विशेषेण घृष्यते चन्दनरसः संयोज्यन्ते गन्धयुक्तयः। दीयते गणिकाकामुकयोः सकर्पूरं ताम्बूलमवलोक्यते सकटाक्षं प्रवर्तते हासः पीयते चानवरतं ससीत्कारं मदिरा। इमे चेटा इमाश्चेटिका इमे ऽपरे ऽवधीरितपुत्रदारवित्ता मनुष्या आसवकरकाः पीतमदिरैर्गणिकाजनैर्ये मुक्तास्ते पिबन्ति। आदिशतु भवती।

।२। एतु एतु आर्य इमं सप्तमं प्रकोष्ठं प्रविशत्वार्यः ।

।३। इहापि सप्तमे प्रकोष्ठे सुश्लिष्टविहङ्गवाटीसुखनिषण्णानि अन्योन्यचुम्बनपराणि सुखमनुभवन्ति पारावतमिथुनानि। दधिभक्तपूरितोदरब्राह्मण इव सूक्तं पठति पञ्जरशुकः। इयमपरा स्वामिसंमाननालब्धप्रसरेव गृहदासी अधिकं कुरकुरायते मदनसारिका। अनेकफलरसास्वादप्रहृष्टकण्ठा कुम्भदासीव कूजति परपुष्टा। आलम्बिता नागदन्तेषु पञ्जरपरम्परा योध्यन्ते लावकाः। आलाप्यन्ते पञ्जरकपिञ्जराः प्रेष्यन्ते पञ्जरकपोताः। इतस्ततो विविधमणिचित्रित इवायं सहर्षं नृत्यन् रविकिरणसन्तप्तं पक्षोत्क्षेपैर्विधुवतीव प्रासादं गृहमयूरः। इतः पिण्डीकृता इव चन्द्रपादाः पदगतिं शिक्षन्त इव कामिनीनां पश्चात्परिभ्रमन्ति राजहंसमिथुनानि। एते ऽपरे वृद्धमहल्लका इव इतस्ततः संचरन्ति गृहसारसाः। ही ही भोः प्रसारणं कृतं गणिकया नानापक्षिसमूहैः। यत्सत्यं खलु नन्दनवनमिव मे गणिकागृहं प्रतिभाति। आदिशतु भवती।

॥ पत्रं ७२ ॥

।१। एत्वार्य इममष्टमं प्रकोष्ठं प्रविशत्वार्यः ।

।२। भवति क एष पट्टप्रावारकप्रावृतो ऽधिकतरं अत्यद्भुतपुनरुक्तालङ्कारालङ्कृतो ऽङ्गभङ्गैः परिस्खलन्नितस्ततः परिभ्रमति ।

।३। आर्य एषो ऽज्जुकाया भ्राता भवति ।

।४। कियत्तपश्चरणं कृत्वा वसन्तसेनाया भ्राता भवति। अथवा मा तावद्यद्यपि एष उज्ज्वलः स्निग्धश्च सुगन्धश्च तथापि श्मशानवीथ्यां जात इव चम्पकवृक्षो ऽनभिगमनीयो लोकस्य। भवति एषा पुनः का फुल्लप्रावारकप्रावृतोपानद्युगलनिक्षिप्तैलचिक्कणौः पादैरुच्चासनोपविष्टा तिष्ठति ।

।५। आर्य एषा खल्वस्माकमज्जुकाया माता ।

।६। अहो अस्या अपवित्रडाकिन्या उदरविस्तारः। तत्किमेतां प्रवेश्य महादेवमिव द्वारशोभेह गृहे निर्मिता ।

।७। हताश मैवमुपक्षिपास्माकं मातरम्। एषा खलु चातुर्थिकेन पीड्यते ।

।८। भगवन् चातुर्थिक एतेनोपकारेण मामपि ब्राह्मणमालोकय ।

।९। हताश मरिष्यसि ।

।१०। आ दास्याः पुत्रि वरमीदृशः शूनपीनजठरो मृत एव ।

सीधुसुरासवमत्ता एतादृशीमवस्थां गता हि अत्तिका ।
यदि म्रियते अत्र अत्तिका भवति शृगालसहस्रयात्रा ॥

भवति किं युष्माकं यानपात्राणि वहन्ति ।

।११। आर्य नहि नहि ।

॥ पत्रं ७३ ॥

।१। किं वात्र पृच्छ्यते युष्माकं खलु प्रेमजले मदनसमुद्रे स्तननितम्बजघनान्येव यानपात्राणि मनोहराणि। एवं वसन्तसेनाया बहुवृत्तान्तमष्टप्रकोष्ठं भवनं प्रेक्ष्य यत्सत्यं जानामि एकस्थमिव त्रिपिष्टपं दृष्टं प्रशंसितुं नास्ति मे वाग्विभवः। किं तावद्गणिकागृहमथवा कुबेरभवनप्रतिच्छन्द इति। कुत्र युष्माकमज्जुका ।

।२। आर्य एषा वृक्षवाटिकायां तिष्ठति तस्मात् प्रविशत्वार्यः ।

।३। ही ही भो अहो वृक्षवाटिकायाः सश्रीकता आश्चर्यकुसुमप्रस्तारारोपितानेकपादपा निरन्तरपादपतलनिर्मिता युवतिजनजघनप्रमाणा पट्टदोला सुवर्णयूथिकाशेफालिकामालतीमल्लिकानवमल्लिकाकुरवकातिमुक्तकप्रभृतिकुसुमैः स्वयं निपतितैर्यत्सत्यं लघूकरोतीव नन्दनवनस्य सश्रीकताम्। इतश्च उदयत्सूर्यसमप्रभैः कमलरक्तोत्पलैः सन्ध्यायते इव दीर्घिका ।

एषो ऽशोकवृक्षो नवनिर्गतकुसुमपल्लवो भाति ।
सुभट इव समरमध्ये घनलोहितपङ्कचर्चिकः ॥

भवति तत्कुत्र युष्माकमार्या ।

।४। आर्य अवनमय दृष्टिं पश्याज्जुकाम् ।

।५। स्वस्ति भवत्यै ।

।६। उपविशतु भवती ।

।७। भवति कुशलम् ।

॥ पत्रं ७४ ॥

।१। सुष्ठु उपलक्षितं दुष्टविलासिन्या। अथ किम् ।

।२। शृणोतु भवती। तत्रभवांश्चारुदत्तः शिरसाञ्जलिं कृत्वा भवतीं विज्ञापयति ।

।३। मया तत्सुवर्णभाण्डं विश्रम्भादात्मीयमिति कृत्वा द्यूते हारितं स च सभिको राजापात्रकारी न ज्ञायते कुत्र गत इति ।

।४। अज्जुके दिष्ट्या वर्धसे आर्यो द्यूतकरः संवृत्तः ।

।५। कथं शौण्डीरतया चौरेणापहृतमपि द्यूते हारितमिति भणति। अत एव काम्यते ।

।६। तत्तस्य कारणाद्गृह्णातु भवतीमां रत्नावलीम् ।

।७। किं दर्शयामि तमलङ्कारम्। अथवा न तावत् ।

।८। किं तावन्न गृह्णाति भवतीमां रत्नावलीम् ।

।९। मैत्रेय कथं न ग्रहीष्यामि रत्नावलीम्। कथं क्षीणकुसुमादपि सहकारपादपान्मकरन्दविन्दवो निपतन्ति। आर्य विज्ञापय तं द्यूतकरं मम वचनेनार्यचारुदत्तम्। अहमपि प्रदोषे आर्यं प्रेक्षितुं आगच्छामि ।

॥ पत्रं ७५ ॥

।१। किमन्यत्तत्र गत्वा ग्रहीष्यति। भवति भणामि। निवृत्यतामस्माद्गणिकाप्रसङ्गादिति ।

।२। चेटि गृहाणैतमलङ्कारं चारुदत्तमभिरन्तुं गच्छामः ।

।३। अज्जुके पश्य पश्य उन्नमत्यकालदुर्दिनम् ।

।४। चेटि हारं गृहीत्वा लघु लघु आगच्छ ।

॥ पत्रं ७७ ॥

।१। अहो गणिकाया लोभश्च दक्षिणता च यतो ऽन्या कयापि न कृता अनादरेणैवाभणित्वा किञ्चिदेवमेव गृहीता रत्नावली। एतावत्या ऋद्ध्या तयैवमपि भणितो यदार्य मैत्रेय विश्रम्यतां गल्वर्केण पानीयं पीयतामिति । तन्मा तावद्दास्याः पुत्र्या गणिकाया मुखमपि द्रक्ष्यामि । सुष्ठु खलूच्यते अकन्द समुत्थिता पद्मिनी अवञ्चको वणिक् अचौरः सुवर्णकारः अकलहो ग्रामसमागमः अलुब्धा गणिकेति दुष्करमेते सम्भाव्यन्ते। तत्प्रियवयस्यं गत्वा अस्माद्गणिकाप्रसङ्गान्निवर्तयामि । कथं प्रियवयस्यो वृक्षवाटिका यामुपविष्टस्तिष्ठति तद्यावदुपसर्पामि। स्वस्ति भवते वर्धतां भवान् ।

।२। उपविष्टो ऽस्मि ।

।३। तत्खलु कार्यं विनष्टम् ।

।४। कुतो ऽस्माकमेतावद्भागधेयं नवनलिनकोमलं हस्तं मस्तके कृत्वा प्रतीष्टा ।

॥ पत्रं ७८ ॥

।१। भो कथं विनष्टं यद्भुक्तस्यापीतस्य चौरैरपहृतस्य अल्पमूल्यस्य सुवर्णभाण्डस्य कारणाच्चतुः समुद्रसारभूता रत्नावली हारिता ।

।२। भो वयस्य एतदपि मे द्वितीयं सन्तापकारणं यत्सखीजनदत्तसंज्ञया पटान्तापवारितं मुखं कृत्वा अहमुपहसितः। तदहं ब्राह्मणो भूत्वा इदानीं भवन्तं शीर्षेण पतित्वा विज्ञापयामि। निवर्त्यतामात्मा अस्माद्बहुप्रत्यवायाद्गणिकाप्रसङ्गात्। गणिका नाम पादुकान्तरप्रविष्टा लेष्टुकेव दुःखेन निराक्रियते । अपिच अहो वयस्य गणिका हस्ती कायस्थो भिक्षुश्चाटो रासभो यत्रैते निवसन्ति तत्र दुष्टा अपि न जायन्ते ।

॥ पत्रं ७९ ॥

।१। यथैष ऊर्ध्वं प्रेक्ष्य दीर्घं निःश्वसिति तथा तर्कयामि मयापि निवार्यमाणस्याधिकतरं वर्धिता स्योत्कण्ठा तत्सुष्ठु खल्वेवमुच्यते कामो वाम इति। भो वयस्य भणितं च तया भण चारुदत्तं अद्य प्रदोषे मयात्रागन्तव्यमिति। तत्तर्कयामि रत्नावल्यापरितुष्टापरं मार्गितुमागच्छतीति ।

।२। अपेत मानवाः ।

यथा यथा वर्षत्यभ्रखण्डं तथा तथा तिम्यति पृष्ठचर्म ।
यथा यथा लगति शीतवातस्तथा तथा वेपते मे हृदयम् ॥

।३। वंशं वामि सप्तच्छिद्रं सुशब्दं
वीणां वादयामि सप्ततन्त्रीं नदन्तीम् ।
गीतं गायामि गर्दभस्यानुरूपं
को मे गाने तुम्बुरुर्नारदो वा ।

आज्ञप्तो ऽस्मि अज्जुकया वसन्तसेनया कुम्भीलक गच्छ त्वं ममागमनमार्यचारुदत्तस्य निवेदयेति। तद्याव दार्यचारुदत्तस्य गृहं गच्छामि। एष चारुदत्तो वृक्षवाटिकायां तिष्ठति। एषो ऽपि स दुष्टबटुकस्तद्यावदु पसर्पामि। कथं पिहितं द्वारं वृक्षवाटिकायाः। भवतु एतस्य दुष्टबटुकस्य संज्ञां ददामि ।

।४। अये क इदानीमेष प्राकारवेष्टितमिव कपित्थं मां लोष्टकैस्ताडयति ।

॥ पत्रं ८० ॥

।१। दास्याः पुत्र दुष्टपारावत तिष्ठ तिष्ठ यावदेतेन दण्डकाष्ठेन सुपक्वमिव चूतफलमस्मात्प्रासादाद्भूमौ पातयिष्यामि ।

।२। कथं पारावतं पश्यति न मां प्रेक्षते। अपरया लोष्टगुटिकया पुनरपि ताडयिष्यामि ।

।३। कथं कुम्भीलकस्तयावदुपसर्पामि। अरे कुम्भीलक प्रविश स्वागतं ते ।

।४। आर्य वन्दे ।

।५। अरे कुत्र त्वमीदृशे दुर्दिने अन्धकारे आगतः ।

।६। अरे एषा सा ।

।७। का एषा का ।

।८। एषा सा ।

।९। किमिदानीं दास्याः पुत्र दुर्भिक्षकाले वृद्धरङ्क इव ऊर्ध्वकं सासायसे एषा सा सेति ।

।१०। अरे त्वमपीदानीमिन्द्रमखकामुक इव काकायसे का केति ।

।११। तत्कथय ।

।१२। भवतु एवं भणिष्यामि। अरे प्रश्नं ते दास्यामि ।

।१३। अहं ते मुण्डे पादं दास्यामि ।

।१४। अरे जानीहि तावत्तेन हि कस्मिन्काले चूता मुकुलवन्तो भवन्ति।

।१५। अरे दास्याः पुत्र ग्रीष्मे ।

।१६। अरे नहि नहि ।

॥ पत्रं ८१ ॥

।१। किमिदानीमत्र कथयिष्यामि। भवतु चारुदत्तं गत्वा प्रक्ष्यामि। अरे मुहूर्तकं तिष्ठ। भो वयस्य प्रक्ष्यामि तावत्कस्मिन्काले चूता मुकुलवन्तो भवन्ति ।

।२। मूर्ख वसन्ते ।

।३। द्वितीयं ते प्रश्नं दास्यामि। का सुसमृद्धानां ग्रामाणां रक्षकं करोति ।

।४। अरे रक्षा ।

।५। अरे नहि नहि ।

।६। भवतु संशये पतितोऽस्मि। भवतु चारुदत्तं पुनरपि प्रक्ष्यामि ।

।७। अरे दासीपुत्र सेना ।

।८। द्वे अपि एकस्मिन्कृत्वा शीघ्रं भण ।

।९। सेनावसन्ते ।

।१०। ननु परिवर्त्य भण ।

।११। अरे मूर्ख वटुक पदे परिवर्तय ।

।१२। अरे मूर्ख अक्षरपदे परिवर्तय ।

।१३। वसन्तसेना ।

।१४। एषा सा आगता ।

।१५। तद्यावच्चारुदत्तस्य निवेदयामि। भो चारुदत्त धनिकस्ते आगतः ।

॥ पत्रं ८२ ॥

।१। यदि कुले नास्ति तत् द्वारे ऽस्ति। एषा वसन्तसेना आगता ।

।२। यदि मम वचने न प्रत्ययसे तदिमं कुम्भीलकं पृच्छ । अरे दास्याः पुत्र कुम्भीलक उपसर्प ।

।३। आर्य वन्दे ।

।४। एषा सा आगता वसन्तसेना ।

।५। यावदज्जुकाया निवेदयामि ।

।६। भो अपि जानासि किन्निमित्तमीदृशे दुर्दिने आगतेति ।

।७। मया ज्ञातं अल्पमूल्या रत्नावली बहुमूल्यं सुवर्णभाण्डमिति न परितुष्टा अपरं मार्गितुमागता।

॥ पत्रं ८३ ॥

।१। भाव सुष्ठु ते भणितम् ।

।२। एवमेतत्तत्कथमेषो ऽपरः ।

॥ पत्रं ८४ ॥

।१। भाव पश्य पश्य ।

।२। एषो ऽपरः ।

॥ पत्रं ८५ ॥

।१। भाव एवमेतत्तत्पश्य पश्य ।

॥ पत्रं ८६ ॥

।१। भाव तदेवैतद्गृहम् ।

।२। यद्भावानाज्ञापयति। स्वस्ति भवत्यै ।

॥ पत्रं ८७ ॥

।१। आर्य वन्दे स्वागतमार्यस्य। भाव एषा छत्रधारिका भावस्यैव भवतु ।

।२। आर्य मैत्रेय कुत्र युष्माकं द्यूतकरः ।

।३। ही ही भो द्यूतकर इति भणन्त्यालङ्कृतः प्रियवयस्यः। भवति एष खलु वृक्षवाटिकायाम्।

।४। आर्य का युष्माकं वृक्षवाटिकोच्यते ।

।५। भवति यत्र न खाद्यते न पीयते ।

।६। तत्प्रविशतु भवती ।

।७। अत्र प्रविश्य किं मया भणितव्यम् ।

।८। द्यूतकर अपि सुखस्ते प्रदोष इति ।

।९। अपि पारयिष्यामि ।

।१०। अवसर एव पारयिष्यति ।

।११। प्रविशतु भवती ।

।१२। अयि द्यूतकर अपि सुखस्ते प्रदोषः ।

॥ पत्रं ८८ ॥

।१। इदमासनमुपविशतु भवती ।

।२। यद्भवानाज्ञापयति ।

।३। आर्य मैत्रेय तिष्ठ त्वमहमेवाज्जुकां शुश्रूषयिष्यामि ।

।४। भो वयस्य पृच्छामि तावत्तत्रभवतीं किञ्चित् ।

।५। अथ किन्निमित्तं पुनरीदृशे प्रनष्टचन्द्रालोके दुर्दिनान्धकारे आगता भवती ।

।६। अज्जुके अज्जुको ब्राह्मणः ।

।७। ननु निपुण इति भण ।

।८। एषा खल्वज्जुका एवं प्रष्टुमागता कियत्तस्या रत्नावल्या मूल्यमिति ।

।९। भो भणितं मयाल्पमूल्या रत्नावली बहुमूल्यं सुवर्णभाण्डं न परितुष्टापरं याचितुमागता ।

।१०। सा खलु अज्जुकाया आत्मीयेति भणित्वा द्यूते हारिता। स च सभिको राजापात्रकारी न ज्ञायते कुत्र गत इति ।

॥ पत्रं ८९ ॥

।१। हे भवति मन्त्रितमेव मन्यते ।

।२। यावत्सो ऽन्विष्यते तावदेतदेव गृहाण सुवर्णभाण्डम् ।

।३। अतिमात्रमार्यो निध्यायति तत्किं दृष्टपूर्वस्ते ।

।४। भवति शिल्पिकुशलतयावबध्नाति दृष्टिम् ।

।५। आर्य वञ्चितो ऽसि दृष्ट्या तदेवेदं सुवर्णभाण्डम् ।

।६। भो वयस्य तदेवेदं सुवर्णभाण्डं यदस्माकं गृहे चौरैरपहृतम् ।

।७। भो वयस्य सत्यं शपामि ब्राह्मण्येन ।

।८। भो पृच्छामि ननु कुत्र इदं समासादितमिति ।

।९। एवमिव ।

।१०। एवमिव ।

।११। एवमिव ।

।१२। आर्य अथ किम् ।

॥ पत्रं ९० ॥

।१। अत एव काम्यसे ।

।२। भो अलमतिमात्रसन्तापितेन। हे भवति समर्प्यतां मम स्नानशाटिका ।

।३। आर्य चारुदत्त युक्तं नेदमनया रत्नावल्येमं जनं तुलयितुम् ।

।४। चेटि किं भवत्येहैव सुप्तव्यम् ।

।५। आर्य मैत्रेय अतिमात्रमिदानीमृजुकमात्मानं दर्शयसि ।

।६। भो वयस्य एष खल्वपसारयन्निव सुखोपविष्टं जनं पुनरपि विस्तारिवारिधाराभिः प्रविष्टः पर्जन्यः ।

॥ पत्रं ९१ ॥

।१। दास्याः पुत्र दुर्दिन अनार्य इदानीमसि त्वं यदेवं भवतीं विद्युता भीषयसि ।

॥ पत्रं १३ ॥

।१। कथमद्याप्यज्जुका न विबुध्यते। भवतु प्रविश्य प्रबोधयिष्यामि ।

।२। उत्तिष्ठतु उत्तिष्ठतु अज्जुका प्रभातं संवृत्तम् ।

।३। कथं रात्रिरेव प्रभातं संवृत्तम् ।

।४। अस्माकमेतत्प्रभातमज्जुकायाः पुना रात्रिरेव ।

।५। चेटि क्व युष्माकं द्यूतकरः ।

।६। अज्जुके वर्धमानकं समादिश्य पुष्पकरण्डकं जीर्णोद्यानं गत आर्यचारुदत्तः ।

।७। किं समादिश्य ।

।८। योजय रात्रावेव प्रवहणं वसन्तसेना गच्छत्विति ।

।९। चेटि क्व मया गन्तव्यम् ।

।१०। अज्जुके यत्र चारुदत्तः ।

।११। चेटि सुष्ठु न निध्यातो रात्रौ तदद्य प्रत्यक्षं प्रेक्षिष्ये। चेटि किं प्रविष्टाहमभ्यन्तरचतुःशालकम् ।

।१२। न केवलमभ्यन्तरचतुःशालकं सर्वजनस्य हृदयमपि प्रविष्टा ।

।१३। अपि सन्तप्यते चारुदत्तस्य परिजनः ।

।१४। सन्तप्स्यते ।

॥ पत्रं १४ ॥

।१। कदा ।

।२। यदाज्जुका गमिष्यति ।

।३। तदा मया प्रथमं सन्तप्तव्यम्। चेटि गृहाणेमां रत्नावलीं मम भगिन्यै आर्याधूतायै गत्वा समर्पय वक्तव्यं च अहं श्रीचारुदत्तस्य गुणनिर्जिता दासी तदा युष्माकमपि। तदेषा तवैव कण्ठाभरणं भवतु रत्नावली ।

।४। कोपिष्यति चारुदत्त आर्यायै तावत् ।

।५। गच्छ न कोपिष्यति ।

।६। यदाज्ञापयसि ।

।७। अज्जुके भणति आर्याधूता आर्यपुत्रेण युष्माकं प्रसादीकृता न युक्तं ममैतां ग्रहीतुम्। आर्यपुत्र एव ममाभरणविशेष इति जानातु भवती ।

।८। एहि वत्स शकटिकया क्रीडावः ।

।९। रदनिके किं ममैतया मृत्तिकाशकटिकया। तामेव सुवर्णशकटिकां देहि ।

।१०। तात कुतो ऽस्माकं सुवर्णव्यवहारः। तातस्य पुनरपि ऋद्ध्या सुवर्णशकटिकया क्रीडिष्यसि। तद्यावद्विनोदयाम्येनं अज्जुकावसन्तसेनायाः समीपमुपसर्पिष्यामि। अज्जुके प्रणमामि ।

।११। रदनिके स्वागतं ते। कस्य पुनरयं दारको ऽनलङ्कृतशरीरो ऽपि चन्द्रमुख आनन्दयति मम हृदयम् ।

।१२। एष खलु आर्यचारुदत्तस्य पुत्रो रोहसेनो नाम ।

॥ पत्रं १५ ॥

।१। एहि मे पुत्रक आलिङ्ग। अनुकृतमनेन पितू रूपम् ।

।२। न केवलं इयं प्रीलमपि तर्कयामि। एतेनार्यचारुदत्त आत्मानं विनोदयति ।

।३। अथ किन्निमित्तमेष रोदिति ।

।४। एतेन प्रतिवेशिगृहपतिदारकस्य सुवर्णशकटिकया क्रीडितं तेन च सा नीता। ततः पुनस्तां याचतो मयेयं मृत्तिकाशकटिका कृत्वा दत्ता। तदा भणति रदनिके किं ममैतया मृत्तिकाशकटिकया तामेव सुवर्णशकटिकां देहीति ।

।५। हा धिक् हा धिक् अयमपि नाम परसम्पत्त्या सन्तप्यते। भगवन्कृतान्त पुष्करपत्रपतितजल विन्दुसदृशैः क्रीडसि त्वं पुरुषभागधेयैः। तात मा रोदिहि सुवर्णशकटिकया क्रीडिष्यसि ।

।६। रदनिके का एषा ।

।७। ते पितुर्गुणनिर्जिता दासी ।

।८। तात अज्जुका ते जननी भवति ।

।९। रदनिके अलीकं त्वं भणसि यद्यस्माकमज्जुका जननी तत्किमर्थमलङ्कृता ।

।१०। तात मुग्धेन मुखेनातिकरुणं मन्त्रयसि। एषेदानीं ते जननी संवृत्ता। तद्गृहाणैतमलङ्कारं सुवर्णशकटिकां कारय ।

।११। अपेहि न ग्रहीष्यामि रोदिषि त्वम् ।

।१२। तात न रोदिष्यामि गच्छ क्रीड। तात कारय सुवर्णशकटिकाम् ।

॥ पत्रं १६ ॥

।१। रदनिके रदनिके निवेदय अज्जुकायै वसन्तसेनायै अपवारितं पक्षद्वारके सज्जं प्रवहणं तिष्ठति ।

।२। अज्जुके एष वर्धमानको विज्ञापयति पक्षद्वारे सज्जं प्रवहणमिति ।

।३। चेटि तिष्ठतु मुहूर्तं यावदहमात्मानं प्रसाधयामि ।

।४। वर्धमानक तिष्ठ मुहूर्तं यावदज्जुकात्मानं प्रसाधयति ।

।५। ही ही भो मयापि यानास्तरणं विस्मृतं तद्यावत् गृहीत्वागच्छामि। एते नासिकारज्जुकटु का बलीवर्दाः। भवतु प्रवहणेनैव गतागतिं करिष्यामि ।

।६। चेटि उपनय मे प्रसाधनमात्मानं प्रसाधयिष्यामि ।

॥ पत्रं १७ ॥

।१। आज्ञप्तो ऽस्मि राजश्यालकसंस्थानेन यत्स्थावरक प्रवहणं गृहीत्वा पुष्पकरण्डकं जीर्णोद्यानं त्वरितमागच्छेति। भवतु तत्रैव गच्छामि। वहत बलीवर्दा वहत। कथं ग्रामशकटै रुद्धो मार्गः किमिदा नीमत्र करिष्यामि। अरे रे अपसरत। किं भणत एतत्कस्य प्रवहणमिति एष राजश्यालकसंस्थानस्य प्रव हणमिति तच्छीघ्रमपसरत। कथमेषो ऽपरः सभिकमिव मां प्रेक्ष्य सहसैव द्यूतपलायित इव द्यूतकरो ऽपवार्यात्मानमन्यतो ऽपक्रान्तः। ततः पुनरेष अथवा किं ममैतेन त्वरितं गमिष्यामि। अरे रे ग्राम्या अपसरत अपसरत। किं भणत मुहूर्तं तिष्ठ चक्रपरिवृत्तिं देहीति। अरे रे राजश्यालसंस्थानस्याहं शूरश्च क्रपरिवृत्तिं दास्यामि। अथवा एष एकाकी तपस्वी तदेवं करोमि। एतत्प्रवहणमार्यचारुदत्तस्य वृक्षवाटि कायाः पक्षद्वारके स्थापयामि। एषो ऽस्मि आगतः ।

।२। अज्जुके नेमिशब्द इव श्रूयते तदागतं प्रवहणम् ।

।३। चेटि गच्छ त्वरयति मे हृदयं तदादिश पक्षद्वारम् ।

।४। एतु एतु अज्जुका ।

।५। चेटि विश्रम त्वम् ।

।६। यदार्यकाज्ञापयति ।

।७। किं न्विदं स्फुरति दक्षिणं नयनम् । अथवा चारुदत्तस्यैव दर्शननिमित्तं प्रमार्जिष्यति ।

।८। अपसारिता मया शकटास्तद्यावदागच्छामि । भारवत्प्रवहणम् । अथवा चक्रपरिवृत्त्या परिश्रान्तस्य भारवत्प्रवहणं प्रतिभासते । भवतु गमिष्यामि । यात वृषभा यात ।

।९। अरे रे दौवारिका अप्रमत्ताः स्वेषु स्वेषु गुल्मस्थानेषु भवत । एषो ऽद्य गोपालदारको गुप्तिं भङ्क्त्वा गुप्तिपालकं व्यापाद्य बन्धनं भित्त्वा परिभ्रष्टो ऽपक्रामति । तद्गृह्णीत तद्गृह्णीत ।

॥ पत्रं ९८ ॥

।१। महान्नगर्यां संभ्रम उत्पन्नस्तत्त्वरितं त्वरितं गमिष्यामि ।

।२। यात वृषभा यात ।

॥ पत्रं ९९ ॥

।१। आश्चर्यमानीतं मया यानान्तरणम् । रदनिके रदनिके निवेदयार्यकायै वसन्तसेनायै अव स्थितं सज्जं प्रवहणमधिकृत्य पुष्पकरण्डकं जीर्णोद्यानं गच्छत्वार्यका ।

।२। कथं नूपुरशब्दस्तदागता खल्वार्यका । आर्यके इमौ नासिकारज्जुकटुकौ बलीवर्दौ तत्पृष्ठत एवारोहत्वार्यका ।

।३। यथा पादोत्फालचालितानां नूपुराणां विश्रान्तः शब्दो भाराक्रान्तं च प्रवहणं तथा तर्कयामि साम्प्रतमार्यकयारूढया भवितव्यं तद्गच्छामि । यात गोणा यात ।

।४। अरे रे अरे जयजयमानकचन्दनकमङ्गलपुष्पभद्रप्रमुखाः ।
किं स्थ विश्रब्धा यो ऽसौ गोपालदारको रुद्धः ।
भित्त्वा समं व्रजति नरपतिहृदयं च बन्धनं च ॥

अरे रे पूर्वस्मिन्प्रतोलीद्वारे तिष्ठ त्वं त्वमपि पश्चिमे त्वमपि दक्षिणे त्वमपि उत्तरे । यो ऽपि एष प्राकारखण्ड एतमभिरुह्य चन्दनेन सममवलोकयामि । एहि चन्दनक एहि इतस्तावत् ।

।५। अरे रे वीरकविशल्यभीमाङ्गददण्डकालदण्डशूरप्रमुखाः ।
आगच्छत विश्रब्धास्त्वरितं यतध्वं लघु कुरुत ।
लक्ष्मीर्येन न राज्ञः प्रभवति गोत्रान्तरं गन्तुम् ॥

॥ पत्रं १०० ॥

।१। अपि च । उद्यानेषु सभासु च मार्गे नगर्यामापणे घोषे ।
तं तं रक्षत त्वरिताः शङ्का वा जायते यत्र ॥
रे रे वीरक किं किं दर्शयसि भण तावद्विश्रब्धम् ।
भित्त्वा च बन्धनकं कः स गोपालदारकं हरति ॥
कस्याष्टमो दिनकरः कस्य चतुर्थश्च वर्तते चन्द्रः ।
षष्ठश्च भार्गवग्रहो भूमिसुतः पञ्चमः कस्य ॥
भण कस्य जन्मषष्ठो जीवो नवमस्तथैव सूरसुतः ।
जीवति चन्दनके कः स गोपालदारकं हरति ॥

।२। भट चन्दनक ।

अपहरति को ऽपि त्वरितं चन्दनक शपामि तव हृदयेन ।
यथार्धोदितदिनकरे गोपालकदारकः पलायितः ॥

।३। यात गोणा यात ।

।४। अरे रे पश्य पश्य ।

अपवारितं प्रवहणं व्रजति मध्येन राजमार्गस्य ।
एतत्तावद्विचारय कस्य कुत्र प्रवसितं प्रवहणम् ॥

।५। अरे प्रवहणवाहक मा तावत्प्रवहणं वाहय। कस्यैतत्प्रवहणं को वा इहारूढः कुत्र वा व्रजति ।

।६। एतत्खलु प्रवहणमार्यचारुदत्तस्य सम्बन्धि इहारूढा वसन्तसेनारूढा पुष्पकरण्डकं जीर्णोद्यानं क्रीडितुं चारुदत्तस्य नीयते ।

।७। एष प्रवहणवाहको भणति आर्यचारुदत्तस्य प्रवहणं वसन्तसेनारूढा पुष्पकरण्डकजीर्णोद्यानं नीयते इति ।

॥ पत्रं १०१ ॥

।१। तद्गच्छतु ।

।२। अनवलोकित एव ।

।३। अथ किम् ।

।४। कस्य प्रत्ययेन ।

।५। आर्यचारुदत्तस्य ।

।६। कः स आर्यचारुदत्तः का वा वसन्तसेना येनानवलोकितं व्रजति ।

।७। अरे आर्यचारुदत्तं न जानासि न वा वसन्तसेनिकाम्। यद्यार्यचारुदत्तं वसन्तसेनिकां वा न जानासि तदा गगने ज्योत्स्नासहितं चन्द्रं त्वं न जानासि ।

कस्तं गुणारविन्दं शीलमृगाङ्कं जनो न जानाति ।
आपन्नदुःखमोक्षं चतुःसागरसारकं रत्नम् ॥
द्वावेव पूजनीयाविह नगर्यां तिलकभूतौ च ।
आर्या वसन्तसेना धर्मनिधिश्चारुदत्तश्च ॥

।८। अरे चन्दनक ।

जानामि चारुदत्तं वसन्तसेनां च सुष्ठु जानामि ।
प्राप्ते च राजकार्ये पितरमप्यहं न जानामि ॥

।९। त्वमपि चिन्तापरः सेनापतौ राज्ञः प्रत्ययितः। एतौ धारितौ मया बलीवर्दौ अवलोकय।

।१०। त्वमपि राज्ञः प्रत्ययितो बलपतिः तत्त्वमेवावलोकय ।

।११। मयावलोकितं त्वयावलोकितं भवति ।

॥ पत्रं १०२ ॥

।१। यत्त्वयावलोकितं तद्राज्ञा पालकेनावलोकितम् ।

।२। अरे प्रवहणवाहक अवनामय धुरम् ।

।३। कथमार्यको गोपालदारकः श्येनवित्रासितः पत्ररथ इव शाकुनिकस्य हस्ते निपतितः। एषो ऽनपराधः शरणागत आर्यचारुदत्तस्य प्रवहणमारूढः प्राणप्रदस्य मे आर्यशर्विलकस्य मित्रं अन्यतो राजनियोगः। तत्किमिदानीमत्र युक्तमनुष्ठातुम्। अथवा यद्भवति तद्भवति। प्रथममेवाभयं दत्तम्।

भीताभयप्रदानं ददतः परोपकाररसिकस्य ।

यदि भवति भवतु नाशस्तथापि च लोके गुण एव ॥

दृष्ट आर्यः। न अज्जुका वसन्तसेना। तत एषा भणति युक्तं नेदं सदृशं नेदं यदहमार्यचारुदत्तमभिसर्तुं गच्छन्ती राजमार्गे परिभूता ।

।४। चन्दनक अत्र मे संशयः समुत्पन्नः ।

॥ पत्रं १०३ ॥

।१। कथं ते संशयः ।

।२। संभ्रमघर्घरकण्ठस्त्वं ज्ञातो ऽसि यत्त्वया भणितम् ।

दृष्टो मया आर्यः पुनरज्जुका वसन्तसेनेति ।

अत्र मे अप्रत्ययः ।

।३। अरे को ऽप्रत्ययस्तव। वयं दाक्षिणात्या अव्यक्तभाषिणः खशखत्तडखडबडकर्णाटकर्णप्रावरणद्रविडचोलचीनबर्बरखेरखानमुखमधुघातप्रभृतीनां म्लेच्छजातीनामनेकदेशभाषाभिज्ञा यथेष्टं मन्त्रयामः दृष्टो दृष्टा वा आर्यो अज्जुका वा ।

।४। ननु अहमपि प्रलोकयामि राजाज्ञा एषा अहं राज्ञः प्रत्ययितः ।

।५। ननु स्वामिनियोगः ।

।६। आर्यगोपालदारक आर्यचारुदत्तस्य प्रवहणमधिरुह्यापक्रामतीति यदि कथ्यते तदार्यचारुदत्तो राज्ञा शास्यते। तत्को ऽत्रोपायः। कर्णाटकलहप्रयोगं करोमि। अरे वीरक मया चन्दनकेन प्रलोकितं पुनरपि त्व प्रलोकयसि कस्त्वं ।

।७। अरे त्वमपि कः ।

।८। पूज्यमानो मान्यमानस्त्वमात्मनो ज्ञातिं न स्मरसि ।

।९। अरे का मम ज्ञातिः ।

।१०। को भणतु ।

।११। भणतु ।

।१२। अथवा न भणतु ।

॥ पत्रं १०४ ॥

।१। जानन्नपि हि ज्ञातिं तव न भणामि शीलविभवेन ।

तिष्ठतु ममैव मनसि किं च कपित्थेन भग्नेन ॥

।२। ननु भणतु भणतु ।

।३। किं न्विदम् ।

।४। शीर्णशिलातलहस्तः पुरुषाणां कुञ्चितग्रन्थिसंस्थापकः ।

कर्तरीव्यापृतहस्तस्त्वमपि सेनापतिर्जातः ॥

।५। अरे चन्दनक त्वमपि मान्यमान आत्मनो ज्ञातिं न स्मरसि ।

।६। अरे का मम चन्दनकस्य चन्द्रविशुद्धस्य ज्ञातिः ।

।७। भणतु ।

।८। भणातु भणातु ।

।९। अरे किं न्विदम् ।

।१०। अरे शृणु शृणु ।

तवापि ज्ञातिः शुद्धा माता भेरी पितापि ते पटहः ।

दुर्मुखकरटकभ्राता त्वमपि सेनापतिर्जातः ॥

।११। अहं चन्दनकश्चर्मकारः । तदा प्रलोकय प्रवहणम् ।

।१२। अरे प्रवहणवाहक परिवर्तय प्रवहणं प्रलोकयिष्यामि ।

॥ पत्रं १०५ ॥

।१। अरे अहं त्वया विप्रवस्तो राजाज्ञप्तिं कुर्वन्सहसा केशेषु गृहीत्वा पादेन ताडितः । तच्छृणु रे अधिकरणमध्ये यदि ते चतुरङ्गं न कल्पयामि तदा न भवामि वीरकः ।

।२। अरे राजकुलमधिकरणं वा व्रज किं त्वया शुनकसदृशेन ।

।३। गच्छ रे प्रवहणवाहक गच्छ । यदि को ऽपि पृच्छति तदा भण चन्दनकवीरकाभ्यामवलोकितं प्रवहणं व्रजति । आर्ये वसन्तसेने इदं चाभिज्ञानं ते ददामि ।

।४। अज्जुके ।

अत्र मया विज्ञप्ता प्रत्ययिता चन्दनकमपि स्मरसि ।

न भणामि एष लुब्धः स्नेहस्य रसेन ब्रूमः ॥

।५। अभयं तव ददातु हरो विष्णुर्ब्रह्मा रविश्च चन्द्रश्च ।

हत्वा शत्रुपक्षं शुम्भनिशुम्भौ यथा देवी ॥

॥ पत्रं १०६ ॥

।१। निष्क्रामतो मम प्रियवयस्यः शर्विलकः पृष्ठत एवानुलग्नो गतः । भवतु प्रधानदण्डधारको वीरको राजप्रत्ययकारको विरोधितः । तयावदहमपि पुत्रभ्रातृभिः परिवृत एतमेवानुगच्छामि ।

॥ पत्रं १०७ ॥

।१। भोः पश्य पश्य पुष्पकरण्डकजीर्णोद्यानस्य सश्रीकताम् ।

।२। भो इदमसंस्काररमणीयं शिलातलमुपविशतु भवान् ।

।३। भणितो मया वर्धमानको वसन्तसेनां गृहीत्वा लघु लघु आगच्छेति ।

।४। यात गोणा यात ।

॥ पत्रं १०८ ॥

।१। इदं तदुद्यानं यावदुपसर्पामि । आर्यमैत्रेय ।

।२। प्रियं ते निवेदयामि वर्धमानको मन्त्रयति आगतया वसन्तसेनया भवितव्यम् ।

।३। दास्याः पुत्र किं चिरयितो ऽसि ।

।४। आर्य मैत्रेय मा कुप्य यानास्तरणं विस्मृतमिति कृत्वा गतागतं कुर्वन् चिरयितो ऽस्मि ।

।५। किं निगडेन बद्धावस्याः पादौ येन स्वयं नावतरति । भो न वसन्तसेना वसन्तसेनः खल्वेषः ।

॥ पत्रं १०९ ॥

।१। यदार्य आज्ञापयति। आर्य अपनीतानि निगडानि ।

।२। संगच्छ निगडानि एषो ऽपि मुक्तो वयं व्रजिष्यामः ।

॥ पत्रं ११२ ॥

।१। अज्ञाः कुरुत धर्मसञ्चयम् ।

संयच्छत निजमुदरं नित्यं जागृत ध्यानपटहेन ।

विषमा इन्द्रियचौरा हरन्ति चिरसञ्चितं धर्मम् ॥

अपि च। अनित्यतया प्रेक्ष्य केवलं तावद्धर्माणां शरणमस्मि ।

पञ्चजना येन मारिता स्त्रियं मारयित्वा ग्रामो रक्षितः ।

अबलश्च चाण्डालो मारितो ऽवश्यं स नरः स्वर्गं गाहते ॥

शिरो मुण्डितं तुण्डं मुण्डितं चित्तं न मुण्डितं किं मुण्डितम् ।

यस्य पुनश्च चित्तं मुण्डितं साधु सुष्ठु शिरस्तस्य मुण्डितम् ॥

गृहीतकषायोदकमिदं चीवरं यावदिदं राष्ट्रियश्यालकस्य उद्याने प्रविश्य पुष्करिण्यां प्रक्षाल्य लघु लघु अपक्रमिष्यामि ।

।२। तिष्ठ रे दुष्टश्रमणक तिष्ठ तिष्ठ ।

।३। भो आश्चर्यम्। एष राजश्यालकसंस्थानक आगतः। एकेन भिक्षुणा अपराधे कृते अन्यमपि यत्र यत्र भिक्षुं पश्यति तत्र तत्र गामिव नासिकां भित्त्वापवाहयति। तत्कुत्राशरणः शरणं गमिष्यामि। अथवा भट्टारक एव बुद्धो मे शरणम् ।

॥ पत्रं ११३ ॥

।१। तिष्ठ रे दुष्ट श्रमणक तिष्ठ तिष्ठ। आपानकमध्यप्रविष्टस्येव रक्तमूलकस्य शीर्षं ते भंक्ष्यामि।

।२। स्वागतं प्रसीदतु उपासकः ।

।३। भाव पश्य पश्य आक्रोशति माम् ।

।४। उपासक इति मां भणति किमहं नापितः ।

।५। स्तुहि श्रमणक स्तुहि ।

।६। त्वं धन्यस्त्वं पुण्यः ।

।७। भाव धन्यः पुण्य इति मां भणति। किमहं श्रावकः कोष्ठकः कुम्भकारो वा ।

।८। भाव तत्किमर्थमेष इहागतः ।

।९। चीवरं प्रक्षालयितुम् ।

।१०। अरे दुष्ट श्रमणक एतन्मम भगिनीपतिना सर्वोद्यानानां प्रवरं पुष्पकरण्डोद्यानं दत्तम्। यत्र तावच्छुनकाः शृगालाः पानीयं पिबन्ति अहमपि वरपुरुषो मनुष्यकः न स्नामि तत्र त्वं पुष्करिण्यां पुराणकुलत्थयूषशबलानि दुष्टगन्धीनि चीवराणि प्रक्षालयसि। तत्त्वामेकप्रहारिकं करोमि ।

॥ पत्रं ११४ ॥

।१। कथं भावो जानाति ।

।२। उपासक एवमचिरप्रव्रजितश्चाहम् ।

।३। तत्किमर्थं त्वं स्नातमात्र एव न प्रव्रजितः ।

।४। नमो बुद्धस्य ।

।५। अरे तिष्ठ तावद्यावत्सम्प्रधारयामि ।

।६। आत्मनो हृदयेन ।

।७। पुत्रक हृदय भट्टारकः पुत्रक एष श्रमणकः अपि नाम किं गच्छतु किं तिष्ठतु। नापि गच्छतु नापि तिष्ठतु। भाव भाव सम्प्रधारितं मया हृदयेन सह एतन्मम हृदयं भणाति ।

।८। मापि गच्छतु मापि तिष्ठतु मापि उच्छ्वसितु मापि निःश्वसितु इहैव कटिति पतित्वा म्रियताम् ।

।९। नमो बुद्धस्य शरणागतो ऽस्मि ।

।१०। ननु समयेन ।

॥ पत्रं ११५ ॥

।१। तथा कर्दमं क्षिपतु यथा पानीयं कलुषं न भवति। अथवा पानीयं पुञ्जीकृत्य कर्दमं क्षिपतु।

।२। किं भणाति ।

।३। स्तुहि स्तुहि पुनरपि स्तुहि ।

।४। सुष्ठु भावो भणाति ।

बहुकुसुमविचित्रिता च भूमी
कुसुमभरेण विनामिताश्च वृक्षाः ।
द्रुमशिखरलताश्च वन्दमानाः
पनसफलानीव वानरा ललन्ति ॥

।५। एषो ऽस्मि आसीनः। भाव अद्यापि तां वसन्तसेनां स्मरामि दुर्जनवचनमिव हृदयान्नापसरति ।

॥ पत्रं ११६ ॥

।१। भाव कापि वेला स्थावरकचेटस्य भणितस्य प्रवहणं गृहीत्वा लघु लघु आगच्छेति। अद्यापि नागच्छतीति चिरमस्मि बुभुक्षितो मध्याह्ने न शक्यते पादाभ्यां गन्तुम्। तत् पश्य पश्य ।

नभोमध्यगतः सूर्यो दुष्प्रेक्ष्यः कुपितवानरसदृक्षः ।
भूमी दृढसन्तप्ता हतपुत्रशतेव गान्धारी ॥

।२। भाव । शिरसि मम निलीनो भाव सूर्यस्य पादः
शकुनिखगविहङ्गा वृक्षशाखासु लीनाः ।
नरपुरुषमनुष्या उष्णादीर्घं श्वसन्तो
गृहशरणनिषण्णा आतपं निर्वहन्ति ॥

भाव अद्यापि स चेटो नागच्छति। अथवात्मनो विनोदननिमित्तं किमपि गास्यामि। भाव श्रुतं त्वया यन्मया गीतम् ।

॥ पत्रं ११७ ॥

।१। कथं गन्धर्वो न भविष्यामि ।

हिङ्गूज्ज्वला जीरकभद्रमुस्तो
वचाया ग्रन्थिः सगुडशुण्ठी ।

एषा मया सेविता गन्धयुक्तिः
कथं नाहं मधुरस्वर इति ॥

भाव भाव पुनरपि तावद्गास्यामि। भाव भाव श्रुतं त्वया यन्मया गीतम् ।

।२। कथं गन्धर्वो न भवामि ।

हिङ्गूज्ज्वलं दत्तमरीचचूर्णं
व्याघारितं तैलघृतेन मिश्रम् ।
भुक्तं मया पारभृतीयमांसं
कथं नाहं मधुरस्वर इति ॥

भाव अद्यापि चेटो नागच्छति ।

।३। भीतः खल्वहं माध्याह्निकः सूर्यो मा तावत्कुपितो राजश्यालसंस्थानको भविष्यति। तत्त्वरितं वहामि। यात वृषभा यात ।

।४। हा धिक् हा धिक् न खलु वर्धमानकस्यायं स्वरसंयोगः। किं न्विदं। किं न खलु आर्यचारुदत्तेन वाहनपरिश्रमं परिहरता अन्यो मनुष्यः अन्यत्प्रवहणं प्रेषितं भविष्यति। स्फुरति दक्षिणं लोचनं वेपते मे हृदयं शून्या दिशः सर्वमेव विसंष्ठुलं पश्यामि ।

।५। भाव भाव आगतं प्रवहणम् ।

।६। किं न पश्यति भावः। वृद्धशूकर इव घुरघुरायमाणं लक्ष्यते ।

॥ पत्रं ११८ ॥

।१। पुत्रक स्थावरक चेट आगतो ऽसि ।

।२। अथ किम् ।

।३। प्रवहणमप्यागतम् ।

।४। अथ किम् ।

।५। वृषभावप्यागतौ ।

।६। अथ किम् ।

।७। त्वमप्यागतः ।

।८। भट्टारक अहमप्यागतः ।

।९। तत्प्रवेशय प्रवहणम् ।

।१०। कतरेण मार्गेण ।

।११। एतेनैव प्राकारखण्डेन ।

।१२। भट्टारक वृषभा म्रियन्ते प्रवहणमपि भज्यते अहमपि चेटो म्रिये ।

।१३। अरे राजश्यालको ऽहं वृषभा मृता अपरान्क्रेष्यामि प्रवहणं भग्नमपरं कारयिष्यामि त्वं मृतो ऽपरः प्रवहणवाहको भविष्यति ।

।१४। सर्वमुपपन्नं भविष्यति अहमात्मीयो न भविष्यामि ।

।१५। अरे सर्वं विनश्यतु प्राकारखण्डेनैव प्रवेशय प्रवहणम् ।

।१६। विभज्ञ रे प्रवहणं समं स्वामिना विभज्ञ। अन्यत्प्रवहणं भवतु भट्टारकं गत्वा निवेदयामि। कथं न भग्नं भट्टारक उपस्थितं प्रवहणम् ।

।१७। न छिन्ना वृषभा न मृता रज्जवस्त्वमपि न मृतः ।

।१८। अथ किम् ।

॥ पत्रं ११९ ॥

।१। भाव आगच्छ प्रवहणं पश्यामः। भाव त्वमपि मे गुरुः परमगुरुः प्रेक्ष्यसे सादरको ऽभ्यन्तरक इति पुरस्करणीय इति त्वं तावत्प्रवहणमग्रतो ऽधिरोह ।

।२। अथवा तिष्ठ त्वं तव पितृसम्बन्धि प्रवहणं येन त्वमग्रतो ऽधिरोहसि। अहं प्रवहणस्वामी अग्रतो ऽधिरोहामि ।

।३। यद्यप्यहमेवं भणामि तथापि तवैव आदरो ऽधिरोह भट्टारक इति भणितुम् ।

।४। एष साम्प्रतमधिरोहामि। पुत्रक स्थावरक चेट परिवर्तय प्रवहणम् ।

।५। अधिरोहतु भट्टारकः ।

।६। भाव भाव मृतो ऽसि मृतो ऽसि प्रवहणाधिरूढा राक्षसी चोरो वा प्रतिवसति। तद्यदि राक्षसी तदा उभावपि मुषितौ अथ चोरस्तदा उभावपि खादितौ ।

।७। पुत्रक स्थावरक चेट जीवसि ।

।८। अथ किम् ।

।९। प्रवहणाधिरूढा स्त्री प्रतिवसति तदवलोकय ।

॥ पत्रं १२० ॥

।१। कथं मम नयनयोरायासकर एव राजश्यालः। तत्संशयितास्मि मन्दभाग्या। एतदिदानीं मम मन्दभागिन्या ऊषरक्षेत्रपतित इव बीजमुष्टिर्निष्फलमिहागमनं सम्वृत्तम् । तत्किमत्र करिष्यामि ।

।२। कातरः खल्वेष वृद्धखोडः प्रवहणं नावलोकयति। भाव आलोकय प्रवहणं ।

।३। कथं शृगाला उड्डयन्ते वायसा व्रजन्ति तद्यावद्भावो ऽक्षिभ्यां भक्ष्यते दन्तैः प्रेक्ष्यते तावदहं पलायिष्ये ।

।४। प्रवहणविपर्यासेनागता शरणागतास्मि ।

॥ पत्रं १२१ ॥

।१। यदि राक्षसी प्रतिवसति तत्किं न त्वां मुष्णाति अथ चौरस्तदा किं न त्वं खादितः ।

।२। एवं कृते किं भवति ।

।३। एवं भवतु। स्थावरक चेट नय प्रवहणमथवा तिष्ठ तिष्ठ। देवतानां ब्राह्मणानां चाग्रतश्चरणेन गच्छामि। नहि नहि प्रवहणमधिरूढो गच्छामि। येन दूरतो मां प्रेक्ष्य भणिष्यन्ति एष स राष्ट्रियश्यालो भट्टारको गच्छति ।

।४। शान्तं पापं शान्तं पापम् ।

।५। भाव भाव मां प्रबलपुरुषं मनुष्यं वासुदेवाकम् ।

।६। तेन हि अपूर्वा श्रीः समासादिता तस्मिन्काले मया रोषिता साम्प्रतं पादयोः पतित्वा प्रसादयामि ।

।७। एष पादयोः पतामि। अम्बिके अम्बिके शृणु मम विज्ञप्तिम् ।

एष पतामि चरणयोर्विशालनेत्रे

हस्ताञ्जलिं दशनखे तव शुद्धदन्ति ।

॥ पत्रं १२२ ॥

।१। यन्मयापकृतं मदनातुरेण
तत्क्षामितासि वरगात्रि तवास्मि दासः ॥

।२। अपेहि अनार्य मन्त्रयसि ।

।३। यच्चुम्बितमम्बिकामातृकाभिः
गतं न देवानामपि यत्प्रणामम् ।
तत्पातितं पादतलेन मुण्डं
वने शृगालेन यथा मृताङ्गम् ॥

अरे स्थावरक चेट कुत्र त्वया एषा समासादिता ।

।४। भट्टक ग्रामशकटै रुद्धो राजमार्गस्ततश्चारुदत्तस्य वृक्षवाटिकायां प्रवहणं स्थापयित्वा तत्राव तीर्य यावच्चक्रपरिवृत्तिं करोमि तावदेषा प्रवहणविपर्यासेनेहारूढेति तर्कयामि ।

।५। कथं प्रवहणविपर्यासेनागता न मामभिसर्तुं तदवतर अवतर मम प्रवहणात् । त्वं दरिद्रसा र्थवाहपुत्रकमभिसारयसि मदीयान्वृषभान्वाहयसि तदवतर अवतर गर्भदासि अवतर ।

।६। तमार्यचारुदत्तमभिसारयसीति यत्सत्यमलङ्कृतास्मि अमुना वचनेन । साम्प्रतं च यद्भवतु तद्भवतु ।

।७। एताभ्यां ते दशनखोत्पलमण्डलाभ्यां
हस्ताभ्यां चाटुशततालनलम्पटाभ्याम् ।
कर्षामि तव वरतनुं निजयानका
त्केशेषु बालिदयितामिव यथा जटायुः ॥

॥ पत्रं १२३ ॥

।१। यो ऽसौ मम वचनावमानेन तदा रोषाग्निः सन्धुक्षितः अद्य एतस्याः पादप्रहारेणानेन प्रज्वलितः । तत्साम्प्रतं मारयाम्येनाम् । भवतु एवं तावत् । भाव भाव

यदीच्छसि लम्बदशाविशालं
प्रावारकं सूत्रशतैर्युतम् ।
मांसं च खादितुं तथा तुष्टिं कर्तुं
चुहू चुहू चुक्कु चुहू चुहू इति ॥

।२। मम प्रियं कुरु ।

।३। अकार्यस्य गन्धो ऽपि नास्ति रसो ऽपि नास्ति ।

।४। मारय वसन्तसेनाम् ।

।५। अहं ते उडुपं दास्यामि । अन्यच्च विविक्ते उद्याने इह मारयन्तं कस्त्वां प्रेक्षिष्यते ।

॥ पत्रं १२४ ॥

।१। तेन हि पटान्तापवारितां कृत्वा मारय ।

।२। अधर्मभीरुरेष वृद्धकोलः । भवतु स्थावरकं चेटमनुनयामि । पुत्रक स्थावरक चेट सुवर्णकट कानि ते दास्यामि ।

।३। अहमपि परिधास्ये ।

।४। सौवर्णं ते पीठं कारयिष्यामि ।

।५। अहमपि उपवेक्ष्यामि ।

।६। सर्वं ते उच्छिष्टं दास्यामि ।

।७। अहमपि खादिष्यामि ।

।८। सर्वचेटानां महत्तरं करिष्यामि ।

।९। भट्टको भविष्यामि ।

।१०। तन्मन्यस्व मम वचनम् ।

।११। भट्टक सर्वं करिष्यामि वर्जयित्वाकार्यम् ।

।१२। अकार्यस्य गन्धो ऽपि नास्ति ।

।१३। भणतु भट्टकः ।

।१४। एनां वसन्तसेनां मारय ।

।१५। प्रसीदतु भट्टकः। इयं मयानार्येण आर्या प्रवहणपरिवर्तनेनानीता ।

।१६। अरे चेट तवापि न प्रभवामि ।

।१७। प्रभवति भट्टारकः शरीरस्य न चारित्र्यस्य। तत्प्रसीदतु भट्टको बिभेमि खल्वहम् ।

।१८। त्वं मम चेटो भूत्वा कस्माद्बिभेषि ।

।१९। भट्टारक परलोकात् ।

।२०। कः स परलोकः ।

॥ पत्रं १२५ ॥

।१। भट्टक सुकृतदुष्कृतपरिणामः ।

।२। कीदृशः सुकृतस्य परिणामः ।

।३। यादृशो भट्टको बहुसुवर्णमण्डितः ।

।४। दुष्कृतस्य कीदृशः ।

।५। यादृशो ऽहं परपिण्डपुष्टको जातः। तदकार्यं न करिष्यामि ।

।६। अरे न मारयिष्यसि ।

।७। ताडयतु भट्टको मारयतु भट्टकः अकार्यं न करिष्यामि ।

येनास्मि गर्भदासो विनिर्मितो भागधेयदोषैः ।
अधिकं च न क्रेष्यामि तेनाकार्यं परिहरामि ॥

।८। शरणागतास्मि ।

।९। अधर्मभीरुर्वृद्धखोडः परलोकभीरुरेष गर्भदासः। अहं राष्ट्रियश्यालः कस्य बिभेमि वरपुरुषमनुष्यः। अरे गर्भदास चेट गच्छ त्वमपवरके प्रविश्य विश्रान्त एकान्ते तिष्ठ ।

।१०। यद्भर्ताज्ञापयति। अज्जुके एतावान्मे विभवः ।

॥ पत्रं १२६ ॥

।१। तिष्ठ वसन्तसेने मारयिष्यामि ।

।२। भाव भट्टक मार्यते ।

सर्वकालं मया पुष्टो मांसेन च घृतेन च ।
अद्य कार्ये समुत्पन्ने ज्ञातो मे वैरिकः कथम् ॥

भवतु लब्धो मयोपायः। दत्ता वृद्धखोडेन शिरश्चालनसंज्ञा। तदेतं प्रेष्य वसन्तसेनां मारयिष्यामि। एवं

तावत्। भाव यत्त्वं मया भणितस्तत्कथमहं एवं वृहति गल्वर्कप्रमाणे कुले जातो ऽकार्यं करोमि। एवमेतदङ्गीकारयितुं मया भणितम्।

।३। भाव एषा तवाग्रतो लज्जते न मामङ्गीकरोति। तद्गच्छ स्थावरकचेटो मया ताडितो गतो ऽपि एष प्रपलाय्य गच्छति। तस्मात्तं गृहीत्वा आगच्छतु भावः।

।४। ननु भणामि शरणागतास्मि।

।५। एवं मम हस्ते एषा न्यासेन तिष्ठतु।

॥ पत्रं १२७ ॥

।१। सत्यम्।

।२। भवतु मारयिष्यामि। अथवा कपटकापटिक एष ब्राह्मणो वृद्धखोडः कदापि अपवारितशरीरो गत्वा शृगालो भूत्वा हुलुहुलीं करोति। तदेतस्य वञ्चनानिमित्तमेवं तावत्करिष्यामि। बाले बाले वसन्तसेने एहि।

।३। सुवर्णं ददामि प्रियं वदामि पतामि शीर्षेण सवेष्टनेन।
तथापि मां नेच्छसि शुद्धदन्ति किं ते वयं काष्ठमया मनुष्याः॥

।४। को ऽत्र सन्देहः। अपिच। सहकारपादपं सेवित्वा न पलाशपादपमङ्गीकरिष्यामि।

।५। दास्याः पुत्रि दरिद्रचारुदत्तकः सहकारपादपः कृतः अहं पुनः पलाशो भणितः किंशुको ऽपि न कृतः। एवं त्वं मे गालीं ददती अद्यापि तमेव चारुदत्तकं स्मरसि।

॥ पत्रं १२८ ॥

।१। हृदयगत एव किमिति न स्मर्यते।

।२। अद्यापि ते हृदयगतं त्वां च सममेव मोटयामि। तद्दरिद्रसार्थवाहकमनुष्यकामुकि तिष्ठ।

।३। भण भण पुनरपि श्लाघनीयानि अक्षराणि।

।४। परित्रायतां दास्याः पुत्रश्चारुदत्तकस्त्वाम्।

।५। परित्रायते यदि मां प्रेक्षते।

।६। किं स शक्रो बालिपुत्रो महेन्द्रो
रम्भापुत्रः कालनेमिः सुबन्धुः।
रुद्रो राजा द्रोणपुत्रो जटायुः
चाणक्यो वा धुन्धुमारः त्रिशङ्कुः॥

अथवा एते ऽपि त्वां न रक्षन्ति।

चाणक्येन यथा सीता मारिता भारते युगे।
एवं त्वां मोटयिष्यामि जटायुरिव द्रौपदीम्॥

।७। हा मातः कुत्रासि। हा आर्य चारुदत्त एष जनो ऽसम्पूर्णमनोरथ एव विपद्यते। तदूर्ध्वं क्रन्दिष्यामि। अथवा वसन्तसेना ऊर्ध्वं क्रन्दतीति लज्जनीयं खल्वेतत्। नम आर्यचारुदत्ताय।

।८। अद्यापि गर्भदासी तस्यैव पापस्य नाम गृह्णाति स्मर गर्भदासि स्मर।

।९। नम आर्यचारुदत्ताय।

।१०। म्रियस्व गर्भदासि म्रियस्व।

॥ पत्रं १२९ ॥

।१। एतां दोषकरण्डिकामविनयस्यावासभूतां खलां
रक्तां तस्य किलागतस्य रमणे कालागतामागताम् ।
किमेष समुदाहरामि नितकं बाह्वोः शूरत्वं
निश्वासे ऽपि म्रियते अम्बस्मरा सीता यथा भारते ॥
इच्छन्तं मां नेच्छसीति गणिका रोषेण मे मारिता
शून्ये पुष्पकरण्डके इति सहसा पाशेन उत्त्रासिता ।
स वा वञ्चितभ्रातृको मम पिता मातैव सा द्रौपदी
यो ऽस्य पश्यति नेदृशं व्यवसितं पुत्रस्य शूरत्वम् ॥

भवतु साम्प्रतं वृद्धचेट आगमिष्यतीति तदपसृत्य तिष्ठामि ।

।२। स्वागतं ते पुत्रक स्थावरक तवापि स्वागतम् ।

।४। अथ किम् ।

।३। कीदृशो न्यासः ।

।५। गता ।

॥ पत्रं १३० ॥

।१। भावस्यैव पृष्ठतः ।

।२। त्वं कतमया दिशा गतः ।

।३। सापि दक्षिणाया गता ।

।४। सापि उत्तरया ।

।५। शपामि भावस्य शीर्षमात्मीयाभ्यां पादाभ्यां तत्संस्थापय हृदयमेषा सा मारिता ।

।६। यदि मम वचने न प्रत्ययसे तत्पश्य प्रथमं राष्ट्रियश्यालसंस्थानस्य शूरत्वं ।

।७। हो ही उपरतो भावः ।

।८। समाश्वसितु समाश्वसितु भावः। अविचारितमानयता मयैव प्रथमं मारिता ।

॥ पत्रं १३१ ॥

।१। अरे वसन्तसेनां स्वयमेव मारयित्वा मां दूषयित्वा कुत्र पलायसे। साम्प्रतमीदृशो ऽहम नाथः प्राप्तः ।

।२। अर्थशतं ते ददामि सुवर्णं ददामि कार्षापणं ददामि पुष्टिं ते ददामि। एष संस्थानपराक्रमो सामान्यो भवतु मनुष्यकाणाम् ।

।३। शान्तं पापम्।

।४। भाव प्रसीद प्रसीद एहि नगर्यां प्रविश्य क्रीडावः ।

॥ पत्रं १३२ ॥

।१। मदीये पुष्पकरण्डकजीर्णोद्याने वसन्तसेनां मारयित्वा कुत्र पलायसे। एहि मम आवुत्तस्याग्रतो व्यवहारं देहि ।

।२। किं रे भीतो ऽसि तदागच्छ ।

।३। निधनं गच्छ। अरे स्थावरक पुत्रक कीदृशं मया कृतम् ।

।४। भट्टक महदकार्यं कृतम् ।

।५। अरे चेट किं भणसि अकार्यं कृतमिति। भवतु एवं तावत्। गृहाणेममलङ्कारं मया तव दत्तं यस्यां वेलायां अलंकरोमि तस्यां ममान्यस्तव ।

।६। भट्टके एवैते शोभन्ते किं ममैतैः ।

।७। तद्गच्छ एतान्वृषभान्गृहीत्वा मदीयायां प्रासादबालाग्रप्रतोलिकायां तिष्ठ यावदहमागच्छामि ।

।८। यद्भट्टक आज्ञापयति ।

॥ पत्रं १३३ ॥

।१। आत्मपरित्राणे भावो गतो ऽदर्शनं चेटमपि प्रासादबालाग्रप्रतोलिकायां निगडपूरितं कृत्वा स्थापयिष्यामि। एवं मन्त्रो रक्षितो भवति। तद्गच्छामि अथवा पश्यामि एनां किमेषा मृता अथवा पुनरपि मारयिष्यामि। कथं सुमृता। भवतु एतेन प्रावारकेण प्रच्छादयाम्येनाम्। अथवा नामाङ्कित एव तत्को ऽपि आर्यपुरुषः प्रत्यभिज्ञास्यति। भवतु एतेन वातालीपुञ्जितेन शुष्कपर्णपुटेन प्रच्छादयामि। भवतु एवं तावत्। साम्प्रतमधिकरणं गत्वा व्यवहारं लेखयामि यथा अर्थस्य कारणात्सार्थवाहपुत्रचारुदत्तकेन मदीयं पुष्पकरण्डकं जीर्णोद्यानं प्रविश्य वसन्तसेना व्यापादितेति।

चारुदत्तविनाशाय करोमि कपटं नवम् ।
नगर्यां विशुद्धायां पशुघातमिव दारुणम् ॥

अविदमादिके। येन येन गच्छामि मार्गेण तेनैव एष दुष्टश्रमणको गृहीतकषायोदकं चीवरं गृहीत्वा आगच्छति। एष मया नासाछेदनवाहितः कृतवैरः कदापि मां प्रेक्ष्य एतेन मारितेति प्रकाशयिष्यति तत्कथं गच्छामि। भवतु एतमर्धपतितं प्राकारखण्डमुल्लङ्घ्य गच्छामि ।

एषो ऽहं त्वरितत्वरितो लङ्कानगर्यां गगने गच्छन् ।
भूम्यां पाताले हनूमच्छिखरे इव महेन्द्रः ॥

।२। प्रक्षालितमेतन्मया चीवरखण्डं किं नु खलु शाखायां शुष्कं करिष्यामि। इह वानरा विलुम्पन्ति। किं नु खलु भूम्यां धूलीदोषो भवति। तत्कुत्र प्रसार्य शुष्कं करिष्यामि। भवतु इह वातालीपुञ्जितः शुष्कपत्रसञ्चय एषु प्रसारयिष्यामि। नमो बुद्धाय। भवतु धर्माक्षराणि उदाहरामि। अथवा अलं ममैतेन स्वर्गेण यावत्तस्या वसन्तसेनाया बुद्धोपासिकायाः प्रत्युपकारं न करोमि यया दशानां सुवर्णकानां कृते द्यूतकराभ्यां निष्क्रीतः ततः प्रभृति तया क्रीतमिवात्मानमवगच्छामि। किं नु खलु पर्णोदरे समुच्छ्वसिति। अथवा ।

वातातपेन तप्तानि चीवरतोयेनार्द्राणि पत्राणि ।
एतानि विस्तीर्णपत्राणि मन्ये पत्राणीव स्फुरन्ति ॥

॥ पत्रं १३४ ॥

।१। हा हा शुद्धालङ्कारभूषितः स्त्रीहस्तो निष्क्रामति। कथं द्वितीयो ऽपि हस्तः। प्रत्यभिजानामीवैतं हस्तम्। अथवा किं विचारेण। सत्यं स एव हस्तो येन मे ऽभयं दत्तम्। भवतु पश्यामि। सैव बुद्धोपासिका ।

।२। कथमुदकं याचते। दूरे च दीर्घिका। किमिदानीमत्र करिष्यामि। भवतु एतच्चीवरमस्या उपरि क्षालयिष्यामि ।

।३। आर्य कस्त्वम् ।

।४। किं न मां स्मरति बुद्धोपासिका दशसुवर्णनिष्क्रीतम् ।

।५। स्मरामि न पुनर्वयार्या भणति वरमहमुपरतैव ।

।६। बुद्धोपासिके किं न्विदम् ।

।७। यत्सदृशं वेशभावस्य ।

।८। उत्तिष्ठतु उत्तिष्ठतु बुद्धोपासिका। एतां पादपसमीपजातां लतामवलम्ब्य ।

॥ पत्रं १३५ ॥

।१। एतस्मिन् विहारे मम धर्मभगिनी तिष्ठति तत्र समाश्वस्तमना भूत्वा उपासिका गृहं गमिष्यति। तच्छनैः शनैर्गच्छतु बुद्धोपासिका। अपसरत आर्या अपसरत एषा तरुणी स्त्री एष भिक्षुरिति। शुद्धो मम एष धर्मः। हस्तसंयतमुखसंयतेन्द्रियसंयतः स खलु मनुष्यः किं करोति तस्य राजकुलं परलोक हस्तो निश्चलः ।

॥ पत्रं १३६ ॥

।१। आज्ञप्तो ऽस्मि अधिकरणभोजैः। अरे शोधनक व्यवहारमण्डपं गत्वा आसनानि सज्जीकुरु इति। तयावदधिकरणमण्डपं सज्जितुं गच्छामि। इदमधिकरणमण्डपं तत्प्रविशामि। विविक्तं कारितं मयाधिकरणमण्डपं विरचितानि च मयासनानि तयावदधिकरणिकानां निवेदयामि। कथमेष राष्ट्रियश्यालो दुर्जनमनुष्य इत एवागच्छति तद्दृष्टिपथं परिहृत्य गमिष्यामि ।

॥ पत्रं १३७ ॥

।१। स्नातो ऽहं सलिलजलैः पानीयैः
उद्याने उपवनकानने निषण्णः ।
नारीभिः सह युवतीभिः स्त्रीभिः
गन्धर्व इव सुहितैरङ्गकैः ॥

क्षणेन ग्रन्थिः क्षणं जूटको मे क्षणेन मे चञ्चलकुण्डला वा ॥
क्षणेन मुक्ताः क्षणमूर्ध्वचूडा चित्रो विचित्रो ऽहं राजश्यालः ॥

अपिच। विषग्रन्थिगर्भप्रविष्टेनेव कीटकेनान्तरं मार्गमाणेन प्राप्तं मया महदन्तरं तत्कस्येदं कृपणचेष्टितं पातयिष्यामि। आं स्मृतं दरिद्रचारुदत्तस्येदं कृपणचेष्टितं पातयिष्यामि। अन्यच्च दरिद्रः खलु स तस्य सर्वं सम्भाव्यते। भवतु अधिकरणमण्डपं गत्वा अग्रतो व्यवहारं लेखयिष्यामि यथा चारुदत्तेन वसन्तसेना मोटयित्वा मारिता। तयावदधिकरणमण्डपमेव गच्छामि। एतज्जदधिकरणमण्डपमत्र प्रविशामि। कथमासनानि दत्तानि तिष्ठन्ति तावदागच्छन्ति अधिकरणभोजका एतस्मिन्दूर्वाचत्वरे मुहूर्तमुपविश्य प्रतिपालयिष्यामि ।

।२। एते अधिकरणिका आगच्छन्ति तयावदुपसर्पामि ।

।३। आज्ञापयतु आर्यः ।

॥ पत्रं १३८ ॥

।१। आर्यस्यापि नाम दोष इति उच्यते। यद्येवं तदा चन्द्रालोके ऽपि अन्धकार इति उच्यते ।

।२। एतु एतु अधिकरणभोजक एतु ।

।३। एतदधिकरणमण्डपं तत्प्रविशन्तु अधिकरणभोजकाः ।

।४। यदार्य आज्ञापयति। आर्या अधिकरणिका भणन्ति क इह कार्यार्थीति ।

।५। उपस्थिता अधिकरणिकाः। अहं वरपुरुषो मनुष्यो वासुदेवो राष्ट्रियश्यालो राजश्यालः कार्यार्थी ।

।६। हन्त प्रथममेव राजश्यालः कार्यार्थी। भवतु आर्य मुहूर्तं तिष्ठ तावदधिकरणिकानां निवेदयामि। आर्या एष खलु राष्ट्रियश्यालः कार्यार्थी व्यवहारमुपस्थितः ।

।७। यदार्य आज्ञापयति। आर्य अधिकरणिका भणन्ति। अद्य गच्छ न दृश्यते तव व्यवहारः।

॥ पत्रं १३९ ॥

।१। किं न दृश्यते मम व्यवहारः। यदि न दृश्यते तदा आवुत्तं राजानं पालकं भगिनीपतिं विज्ञाप्य भगिनीमत्रिकां च विज्ञाप्य एतमधिकरणिकं दूरीकरिष्याम्यन्यमधिकरणिकं स्थापयिष्यामि ।

।२। आर्य राष्ट्रियश्याल मुहूर्तं तिष्ठ तावदधिकरणिकानां निवेदयामि। एष राष्ट्रियश्यालः कुपितो भणति ।

।३। आर्य अधिकरणिका भणन्ति आगच्छ दृश्यते तव व्यवहारस्तत्प्रविशत्वार्यः ।

।४। ही प्रथमं भणन्ति न दृश्यते साम्प्रतं दृश्यते इति तन्नाम भीतभीता अधिकरणभोजका यद्यदहं भणिष्यामि तत्तत्प्रत्याययिष्यामि। भवतु प्रविशामि। सुसुखमस्माकं युष्माकमपि सुखं ददामि न ददामि च ।

।५। आं आत्मीया ममैषा भूमी यत्र मे रोचते तत्रोपविशामि। एष उपविशामि। ननु अत्रोपविशामि। अत्रोपविशामि ।

।६। अथ किम् ।

॥ पत्रं १४० ॥

।१। कर्णे कार्यं कथयिष्यामि। एवं वृहति गल्वर्कप्रमाणस्य कुले ऽहं जातः ।

राजश्वशुरो मम पिता राजा तातस्य भवति जामाता ।
राजश्यालो ऽहं ममापि भगिनीपती राजा ॥

।२। एवं भणामि। अपराद्धस्यापि न च मे किमपि करिष्यति। ततस्तेन भगिनीपतिना परितुष्टेन मे क्रीडितुं रक्षितुं सर्वोद्यानानां प्रवरं पुष्पकरण्डकजीर्णोद्यानं दत्तं तत्र च प्रेक्षितुमनुदिनं शुष्कं कारयितुं शोधयितुं पुष्टं कारयितुं लूनं कारयितुं गच्छामि। दैवयोगेन पश्यामि न पश्यामि वा स्त्रीशरीरं निपतितम् ।

।३। अधिकरणभोजकाः किमिति न जानामि तां तादृशीं नगरमण्डनं काञ्चनशतभूषणाम्। केनापि कुपुत्रेण अर्थकल्यवर्तस्य कारणाच्छून्यं पुष्पकरण्डकजीर्णोद्यानं प्रविश्य बाहुपाशबलात्कारेण वसन्तसेना मारिता न मया ।

।४। यदार्य आज्ञापयति। आर्य लिखितम् ।

।५। विस्मये। उत्तरतेव पायसपिण्डरकेण अद्य ममात्मैव निर्नाशितः। भवत्वेवं तावत्। अहो अधिकरणभोजका ननु भणामि ममैव दृष्टा। किं कोलाहलं कुरुत ।

॥ पत्रं १४१ ॥

।१। हंहो नूनं शून्यशून्यग्रीवालिकया निःसुवर्णकैराभरणस्थानैस्तर्कयामि ।

।२। बुध्यते इव ।

।३। दिष्ट्या प्रत्युज्जीवितो ऽस्मि ।

।४। कमेष व्यवहारो ऽवलम्बते ।

।५। कीदृशः ।

।६। वसन्तसेनामातरमवलम्बते व्यवहारः ।

।७। एतु एतु आर्या ।

।८। गता मे दारिका मित्रगृहमात्मनो यौवनमनुभवितुम् । एष पुनर्दीर्घायुर्भणति आगच्छ अधिकरणिक आह्वयति तन्मोहपरवशमिवात्मानमवगच्छामि हृदयं मे प्रकम्पते । आर्य आदिश मे ऽधिकरणमण्डपस्य मार्गम् ।

।९। एतु एतु आर्या ।

।१०। एषो ऽधिकरणमण्डपः । अत्र प्रविशत्वार्या ।

।११। सुखं युष्माकं भवतु भावमिश्राणाम् ।

।१२। आगतासि वृद्धकुट्टनि आगतासि ।

॥ पत्रं १४२ ॥

।१। अथ किम् ।

।२। मित्रगृहम् ।

।३। अतिलज्जनीयं खलु इदम् । जनस्य प्रच्छनीयो ऽयमर्थो न पुनरधिकरणिकस्य ।

।४। व्यवहारः पृच्छति नात्र दोषः कथय ।

।५। कथं व्यवहारः । तच्छृण्वन्तु आर्यमिश्राः । स खलु सार्थवाहविनयदत्तस्य नप्ता सागरदत्तस्य तनयः सुगृहीतनामधेय आर्यचारुदत्तो नाम श्रेष्ठिचत्वरे प्रतिवसति तत्र मे दारिका यौवनसुखमनुभवति ।

।६। श्रुतमार्यैः । लिख्यन्तामेतान्यक्षराणि चारुदत्तेन सह मम विवादः ।

।७। चारुदत्तो मित्रमिति नास्ति दोषः ।

।८। एवमिव ।

।९। वदार्य आज्ञापयति । एतु एतु आर्यः ।

॥ पत्रं १४३ ॥

।१। एतु एतु आर्यः ।

।२। एतु एतु आर्यः स्वैरमसम्भ्रान्तम् ।

॥ पत्रं १४४ ॥

।१। एतु एतु आर्यो ऽयमधिकरणमण्डपः प्रविशत्वार्यः ।

॥ पत्रं १४५ ॥

।१। इदमासनमत्रोपविशत्वार्यः ।

।२। आगतो ऽसि रे स्त्रीघातक आगतो ऽसि। अहो न्याय्यो व्यवहारः अहो धर्म्यो व्यवहारो यदस्मै स्त्रीघातकाय आसनं दीयते। भवतु ननु दीयताम्।

।३। तात चिरं मे जीव। अयं स चारुदत्तः सुनिक्षिप्तं खलु दारिकया यौवनम्।

।४। लज्जया भीरुतया वा चारित्रं अलीको निगूहतु।
स्वयं मारयित्वा अर्थकारणात् इदानीं गूहति तं न भट्टकः ॥

।५। आर्य चारुदत्त भण अलं लज्जया व्यवहारः खल्वेष।

॥ पत्रं १४६ ॥

।१। अरे मया सह व्यवहारः।

।२। अरे स्त्रीघातक रत्नशतभूषणां वसन्तसेनां मारयित्वा साम्प्रतं कपटकापटिको भूत्वा निगूहसि।

।३। कथं गता कदा गता गच्छन्ती वा केनानुगता।

।४। आर्य कथय।

।५। मदीयं पुष्पकरण्डकजीर्णोद्यानं प्रवेश्य अर्थनिमित्तं बाहुपाशबलात्कारेण मारिता अथ साम्प्रतं वदसि गृहं गतेति।

॥ पत्रं १४७ ॥

।१। किं पक्षपातेन व्यवहारो दृश्यते।

।२। किं पक्षपातेन व्यवहारो दृश्यते।

।३। हताश य इदानीं न्यासीकृतं सुवर्णभाण्डं रात्रौ चौरैरपहृतमिति तस्य कारणाच्चतुःसमुद्रसारभूतां रत्नावलीं ददाति स इदानीमर्थकारणादिदमकार्यं करोति। हा तात एहि मे पुत्रि।

॥ पत्रं १४८ ॥

।१। पादप्रहारपरिभवविमाननालब्धगुरुकवैरस्य।
अनुशोचत इयं कथमपि रात्रिः प्रभाता मे ॥

तद्यावदधिकरणमण्डपमुपसर्पामि। शुभमार्यमिश्राणाम्।

।२। ही ही बन्धनभेदनसम्भ्रमे आर्यकमन्वेषयन् अपवारितं प्रवहणं व्रजतीति विचारं कुर्वन् अन्वेषयन् अरे त्वयापि आलोकितं मयाप्यालोकितव्यमिति भणन्नेव चन्दनमहत्तरकेण पादेन ताडितो ऽस्मि। एतच्छ्रुत्वा आर्यमिश्राः प्रमाणम्।

।३। अस्य चारुदत्तस्य वसन्तसेना आरूढा पुष्पकरण्डकजीर्णोद्यानं क्रीडितुं नीयते इति प्रवहणवाहकेन कथितम्।

।४। पुनरपि श्रुतमार्यमिश्रैः।

।५। यदार्य आज्ञापयति। गतो ऽस्मि तत्र दृष्टं च मया स्त्रीकलेवरं श्वापदैर्विलुप्यमानम्।

।६। कथं त्वया ज्ञातं स्त्रीकलेवरमिति।

।७। सावशेषैः केशहस्तपाणिपादैरुपलक्षितम्।

॥ पत्रं १४९ ॥

।१। हंहो अधिकरणभोजकाः किं यूयं पक्षपातेन व्यवहारं पश्यत येनाद्यापि एष हताशश्चारुदत्त आसने धार्यते।

॥ पत्रं १५० ॥

।१। ही अनेन मया कृतं पापमन्यस्य मस्तके निपतितम्। तद्यत्र चारुदत्त उपविशति तत्राहमुप विशामि। चारुदत्त पश्य पश्य मां ततो भण भण मया मारितेति।

।२। प्रेषितो ऽस्मि आर्यचारुदत्तेन वसन्तसेनासकाशं तत्रालङ्करणानि गृहीत्वा यथा आर्यमैत्रेय वसन्तसेनया वत्सो रोहसेन आत्मनो ऽलङ्कारेणालङ्कृत्य जननीसकाशं प्रेषित अस्याभरणं दातव्यं न पुनर्ग्रहीतव्यं तत्समर्पयेति। तद्यावद्वसन्तसेनासकाशमेव गच्छामि। कथं भाव रेभिलः। भो भाव रेभिल किं निमित्तं त्वमुद्विग्नोद्विग्न इव लक्ष्यसे। किं भणसि। आर्यचारुदत्तो ऽधिकरणमाहूयते इति। तन्न खलु अल्पेन कार्येण भवितव्यम्। तत्पश्चाद्वसन्तसेनागृहं गमिष्यामि। अधिकरणमण्डपं तावद्गमिष्यामि। अयमधिकरणमण्डपस्तद्यावत्प्रविशामि। शुभमधिकरणभोजकानां कुत्र मम प्रियवयस्यः।

।३। वयस्य स्वस्ति ते।

।४। अपि क्षेमं ते।

॥ पत्रं १५१ ॥

।१। भो वयस्य किन्निमित्तमुद्विग्नोद्विग्न इव लक्ष्यसे कुतो वा आहूतः।

।२। क एवं भणति।

।३। एतत्किमर्थं न भण्यते गृहं गतेति।

।४। भो भो आर्या येन तावत्पुरस्थापनविहारारामदेवकुलैस्तडागकूपैरलङ्कृता उज्जयिनी सो ऽर्थकल्यवर्तकारणादीदृशमकार्यमनुतिष्ठतीति। अरे रे कुलटापुत्र राजश्यालसंस्थानक उच्छृंखल कृतजनदोषभाण्ड बहुसुवर्णमण्डितमर्कटक भण भण ममाग्रतो य इदानीं मम प्रियवयस्यः कुसुमितां माधवीलतामप्याकृष्य कुसुमावचयं न करोति कदाप्याकृष्टायाः पल्लवच्छेदो भवतीति स कथमीदृशमकार्यमुभयलोकविरुद्धं करोति। तिष्ठ रे कुट्टिनीपुत्र तिष्ठ तिष्ठ यावदेतेन तव हृदयकुटिलेन दण्डकाष्ठेन मस्तकं ते शतखण्डं करोमि।

।५। शृण्वन्तु शृण्वन्तु आर्यमिश्राः। चारुदत्तेन सह मम विवादो व्यवहारो वा किमर्थमेष काकपदशीर्षमस्तक मम शिरः शतखण्डं करोषि। मा तावत् रे दास्याः पुत्र दुष्टवटुक।

॥ पत्रं १५२ ॥

।१। पश्यन्तु पश्यन्तु आर्या एते खलु तस्यास्तपस्विन्या अलङ्काराः। अर्थकल्यवर्तस्य कारणादेषा मारिता व्यापादिता च।

।२। भोः किमर्थं भूतार्थो न निवेद्यते।

।३। अवहिता तावदार्या इदं सुवर्णभाण्डमवलोकयतु तदेवेदं न वेति।

।४। सदृशमेतन्न पुनस्तत्।

।५। वृद्धकुट्टनि अक्षिभ्यां मन्त्रितं वाचा गूहितम्।

।६। हताशा अपेहि।

।७। अप्रमत्तं कथय तदेवैतन्न वेति।

।८। आर्य शिल्पिकुशलतया अवबध्नाति दृष्टिं न पुनस्तत्।

॥ पत्रं १५३ ॥

।१। ननु भणामि। न खलु न खलु अनभिज्ञातमथवा कदापि शिल्पिना घटितं भवेत्।

।२। आर्यचारुदत्तस्यैतानि ।

।३। तदा कस्य ।

।४। कथमेतानि तस्या वियोगं गतानि ।

।५। आर्य चारुदत्त अत्र सत्यं वक्तव्यम् । पश्य पश्य ।

सत्येन सुखं खलु लभ्यते सत्यालापी न भवति पातकी ।
सत्यमिति द्वे अक्षरे मा सत्यमलीकेन गूहय ॥

।६। उद्यानं प्रवेश्य प्रथमं मारयसि कपटकापटिकतया साम्प्रतं निगूहसि ।

॥ पत्रं १५४ ॥

।१। व्यापादिता अरे त्वमपि भण व्यापादितेति ।

।२। शृणुत शृणुत भट्टारका एतेन मारिता । एतेनैव संशये छिन्ने एतस्य दरिद्रचारुदत्तस्य शारीरो दण्डो न धार्यताम् ।

।३। प्रसीदन्तु प्रसीदन्तु आर्यमिश्राः यस्तावत् चौरैरपहृतस्य । तद्यदि व्यापादिता मम दारिका तथापि जीवतु मे दीर्घायुः । अन्यच्च । अर्थिप्रत्यर्थिनोर्व्यवहारः । अहमर्थिनी तन्मुञ्चतैनम् ।

।४। अपेहि गर्भदासि गच्छ किं तवैतेन ।

।५। हा तात हा पुत्रक ।

।६। कृतं मयैतस्य आत्मनः सदृशं साम्प्रत गच्छामि ।

॥ पत्रं १५५ ॥

।१। यदार्य आज्ञापयति । आर्या गतो ऽस्मि तत्र राजा पालको भणति येनार्थकल्यवर्तस्य कारणाद्वसन्तसेना व्यापादिता तं तत्रैव आभरणानि गले बद्धा डिण्डिमं ताडयित्वा दक्षिणश्मशानं नीत्वा शूले भञ्जत । इति यः को ऽप्यपर ईदृशमकार्यमनुतिष्ठति स एतेन सनिकारदण्डेन शास्यते ।

।२। मूले छिन्ने कुतः पादपस्य पालनम् ।

।३। अहं ते प्रियवयस्यो भूत्वा त्वयाविरहितान् प्राणान् धारयामि ।

।४। एवं युज्यते ।

॥ पत्रं १५६ ॥

।१। इत आगच्छतु आर्यः ।

॥ पत्रं १५७ ॥

।१। तत्किं न कलयत कारणं नववधबन्धनगणे निपुणाः ।
अचिरेण शीर्षच्छेदनशूलारोपेषु कुशलौ स्वः ॥

अपसरत आर्या अपसरत । एष आर्यचारुदत्तः ।

दत्त करवीरदामा गृहीत आवाभ्यां वध्यपुरुषाभ्याम् ।
दीप इव मन्दस्नेहकः स्तोकं स्तोकं क्षयं याति ॥

।२। अपसरत आर्या अपसरत ।

किं पश्यत सत्पुरुषं वध्यमानं कालपरशुधराभ्याम् ।
सुजनशकुनाधिवासं सुजनपुरुषद्रुममेतम् ॥

आगच्छ रे चारुदत्त आगच्छ ।

॥ पत्रं १५८ ॥

।१। अपसरत आर्या अपसरत। किं पश्यत ।

इन्द्रः प्रवाह्यमाणो गोप्रसवः संक्रमश्च तारागाम् ।
सुपुरुषप्राणविपत्तिश्चत्वार इमे न द्रष्टव्याः ॥

।२। अरे आहीन्त पश्य पश्य ।

नगरीप्रधानभूते वध्यमाने कृतान्ताज्ञया ।
किं रोदिति अन्तरिक्षमथवा अनभ्रं पतति वज्रम् ॥

।३। अरे गोह ।

न च रोदिति अन्तरिक्षं नैव अनभ्रं पतति वज्रम् ।
महिलासमूहमेघे निपतति नयनाम्बुधाराभिः ॥

। अपि च । वध्ये नीयमाने जनस्य सर्वस्य रुदतः ।
नयनसलिलैः सिक्तो रथ्याया न उन्नमति रेणुः ॥

।४। आगच्छ रे चारुदत्त आगच्छ इदं घोषणास्थानम्। आहत डिण्डिमं घोषयत घोषणाम् ।

।५। शृणुत आर्याः शृणुत। एष सार्थवाहविनयदत्तस्य नप्ता सागरदत्तस्य पुत्रक आर्य चारुदत्तो नाम। एतेन किलाकार्यकारिणा गणिका वसन्तसेना अर्थकल्यवर्तस्य कारणात् शून्यं पुष्पकरण्डकजीर्णोद्यानं प्रवेश्य बाहुपाशबलात्कारेण मारितेति। एष सलोप्त्रो गृहीतः स्वयं च प्रतिपन्नः। तदा राज्ञा पालकेन वयमाज्ञप्ता एतं मारयितुम्। यद्यपर ईदृशमुभयलोकविरुद्धमकार्यं करोति तमपि राजा पालक एवमेव शास्ति ।

॥ पत्रं १५९ ॥

।१। अपसरत आर्या अपसरत ।

एष गुणरत्ननिधिः सज्जनदुःखानामुत्तरणसेतुः ।
असुवर्णं मण्डनकमपनीयतेऽद्य नगर्याः ॥

। अन्यच्च ।

सर्वः खलु भवति लोके लोकः सुखसंस्थितानां चिन्तायुक्तः ।
विनिपतितानां नराणां प्रियकारी दुर्लभो भवति ॥

।२। अपसारणं कृतं विविक्तो राजमार्गः। तदानयतैनं दत्तवध्यचिह्नम् ।

।३। हा तात हा प्रियवयस्य ।

॥ पत्रं १६० ॥

।१। किमस्माकं हस्तात्प्रतिग्रहं करोषि ।

।२। एवं क्रियताम् ।

।३। हा तात हा पितः ।

।४। आगच्छतु ।

।५। हे प्रचुराः। क्षणामन्तरं दत्त एष आर्यचारुदत्तः पुत्रमुखं पश्यतु। आर्य इत इतः। आगच्छ रे दारक आगच्छ ।

।६। त्वरतां त्वरतां भद्रमुख पिता ते मारयितुं नीयते ।

। ७ । हा तात हा पितः ।

। ८ । हा प्रियवयस्य कुत्र मया त्वं द्रष्टव्यः ।

॥ पत्रं १६१ ॥

। १ । आगच्छ रे चारुदत्त आगच्छ ।

। २ । अरे आर्यचारुदत्तं निरुपपदेन नाम्ना आलपसि। अरे पश्य ।

अभ्युदये अवसाने तथैव रात्रिन्दिवमहतमार्गा ।
उद्दामेव किशोरी नियतिः खलु प्रतीष्टं याति ॥

। अन्यच्च । शुष्का व्यपदेशा अस्य किं प्रणामितमस्तकेन कर्तव्यम् ।
राहुगृहीतो ऽपि चन्द्रो न वन्दनीयो जनपदस्य ॥

। ३ । अरे अरे चाण्डालाः कुत्र मम पितरं नयत ।

। ४ । न खलु वयं चाण्डालाश्चाण्डालकुले जातपूर्वा अपि ।
ये ऽभिभवन्ति साधुं ते पापास्ते च चाण्डालाः ॥

। ५ । तत्किमर्थं मारयत पितरम् ।

। ६ । अत्र राजनियोगः खलु अपराध्यति न खलु वयम् ।

। ७ । व्यापादयत मां मुञ्चत पितरम् ।

। ८ । एवं भणन् चिरं मे जीव ।

॥ पत्रं १६२ ॥

। १ । भो भद्रमुखा मुञ्चत प्रियवयस्यं मां व्यापादयत ।

। २ । अपसरत आर्या अपसरत ।

किं पश्यत सत्पुरुषमयशोवशेन प्रनष्टजीवाशम् ।
कूपे खण्डितपाशं काञ्चनकलसमिव मज्जन्तम् ॥

। ३ । अरे पुनरपि घोषय ।

॥ पत्रं १६३ ॥

। १ । कथमपापश्चारुदत्तो व्यापाद्यते अहं निगडेन स्वामिना बद्धः। भवतु आक्रन्दामि। शृणुत आर्याः शृणुत। अत्रेदानीं मया पापेन प्रवहणपरिवर्तेन पुष्पकरण्डकजीर्णोद्यानं वसन्तसेना नीता ततो मम स्वामिना मां न कामयसे इति कृत्वा बाहुपाशबलात्कारेण मारिता न पुनरेतेनार्येण। कथं विदूरतया न को ऽपि शृणोति। तत्किं करोमि। आत्मानं पातयामि। यद्येवं करोमि तदा आर्यचारुदत्तो न व्यापाद्यते। भवतु अस्याः प्रासादबालाग्रप्रतोलिकाया एतेन जीर्णगवाक्षेणात्मानं निक्षिपामि। वरमहमुपरतो न पुनरेष कुलपुत्रविहगानां वासपादप आर्यचारुदत्तः। एवं यदि विपद्ये लब्धो मया परलोकः। आश्चर्यं न पुनरुपरतो ऽस्मि भग्नो मे दण्डनिगडः। तच्चाण्डालघोषं समन्वेषयामि। हंहो चाण्डाला अन्तरमन्तरम् ।

। २ । अरे को ऽन्तरं याचते ।

। ३ । स्थावरक अपि सत्यं भणसि ।

। ४ । सत्यं अहमपि मा कस्यापि कथयिष्यसीति प्रासादबालाग्रप्रतोलिकायां दण्डनिगडेन बद्ध्वा निक्षिप्तः ।

॥ पत्रं १६४ ॥

।१। मांसेन तिक्ताम्लेन भक्तं शाकेन सूपेन समत्स्यकेन ।
भुक्तं मया आत्मनो गृहे सादृश्यकूरेण गुडोदनेन ॥

भिन्नकांस्यवत्खंखणायाः चाण्डालवाचायाः स्वरसंयोगः यथा च एष उद्धीतो वध्यडिण्डिमशब्दः पटहानां च श्रूयते तथा तर्कयामि दरिद्रचारुदत्तको वध्यस्थानं नीयते इति। तत्प्रेक्षिष्ये। शत्रुविनाशे नाम महान् हृदयस्य परितोषो भवति। श्रुतं च मया यो ऽपि किल शत्रुं व्यापाद्यमानं पश्यति तस्यान्यस्मिन् जन्मान्तरे अक्षिरोगो न भवति। मया खलु विषग्रन्थिगर्भप्रविष्टेनेव कीटकेन किमपि अन्तरं मृगयमाणेन उत्पादित स्तस्य दरिद्रचारुदत्तस्य विनाशः। साम्प्रतमात्मीयायां प्रासादबालाग्रप्रतोलिकायामधिरुह्यात्मनः पराक्रमं पश्यामि। ही ही एतस्य दरिद्रचारुदत्तस्य वध्यं नीयमानस्य एतावान् जनसम्मर्दो यस्यां वेलायामस्मादृशः प्रवरो वरमानुषो वध्यं नीयते तस्यां वेलायां कीदृशं भवेत्। कथमेष स नवबलीवर्द इव मण्डितो दक्षिणां दिशं नीयते। अथ किन्निमित्तं मदीयायाः प्रासादबालाग्रप्रतोलिकायाः समीपे घोषणा निपतिता निवारिता च। कथं स्थावरकश्चेटो ऽपि नास्ति इह। मा नाम तेन इतो गत्वा मन्त्रभेदः कृतो भविष्यति। तद्यावदेनमन्वेषयामि ।

।२। भट्टारक एष स आगतः ।

।३। अपसरत दत्त मार्गं द्वारं पिधत्त भवत तूष्णीकाः ।
अविनयतीक्ष्णविषाणो दुष्टबलीवर्द इत एति ॥

।४। अरे रे अन्तरमन्तरं दत्त। पुत्रक स्थावरक चेटक एहि गच्छावः ।

।५। अनार्य वसन्तसेनां मारयित्वा न परितुष्टो ऽसि साम्प्रतं प्रणयिजनकल्पपादपमार्यचारुदत्तं मारयितुं व्यवसितो ऽसि ।

।६। न हि रत्नकुम्भसदृशो ऽहं स्त्रियं व्यापादयामि ।

।७। अहो त्वया मारिता न चारुदत्तेन ।

।८। क एवं भणाति ।

।९। ननु एष साधुः ।

॥ पत्रं १६५ ॥

।१। हन्त कथं स्थावरकश्चेटः सुष्ठु न मया संयतः। एष खलु मम अकार्यस्य साक्षी। एवं तावत्करिष्यामि। अलीकं भट्टारका अहो एष चेटः सुवर्णचौरिकायां मया गृहीतस्ताडितो मारितश्च तत्कृतवैर एष यत् भणाति किं सर्वं सत्यम्। पुत्रक स्थावरक चेट एतद्गृहीत्वा अन्यथा भण ।

।२। पश्यत भट्टारका अहो सुवर्णेन मां प्रलोभयति ।

।३। एतत् तत्सुवर्णकं यस्य कारणान्मया बद्धः। हंहो चाण्डाला मया खलु एष सुवर्णभाण्डागारे नियुक्तः सुवर्णं चोरयन् मारितस्ताडितः। तद्यदि न प्रत्ययध्वं तदा पृष्ठं तावत्पश्यत ।

।४। शोभनं भणाति। वित्रस्तश्चेटः किं न प्रतपति ।

।५। हन्त ईदृशो दासभावो यत्सत्यं कमपि न प्रत्याययति। आर्यचारुदत्त एतावान्मे विभवः ।

।६। भट्टक ताडयित्वा एनं चेटं निष्काशय ।

।७। निष्काम रे। अरे चाण्डालाः किं विलम्बध्वं मारयतैनम् ।

।८। यदि त्वरयसे स्वयमेव मारय ।

।९। हे चाण्डाला मारयत मां मुञ्चत पितरम् ।

॥ पत्रं १६६ ॥

।१। सपुत्रमेव एनं मारयत ।

।२। किं मया गतेन कर्तव्यम् ।

।३। भो वयस्य एवं त्वया ज्ञातं त्वया विनाहं प्राणान् धारयामीति ।

।४। युक्तं नेदम् । तथापि न शक्नोमि प्रियवयस्यविरहितः प्राणान्धारयितुमिति । तद्ब्राह्मण्यै दारकं समर्प्य प्राणपरित्यागेन प्रियवयस्यमनुगमिष्यामि । भो वयस्य परापयामि एतं लघु ।

।५। अरे ननु भणामि सपुत्रकं चारुदत्तं व्यापादयतेति ।

।६। न ह्यस्माकमीदृशी राजाज्ञप्तिर्यथा सपुत्रं व्यापादयतेति । तन्निष्क्राम रे दारक निष्क्राम ।

।७। इदं तृतीयं घोषणास्थानं ताडयत डिण्डिमं ।

॥ पत्रं १६७ ॥

।१। कथमस्य न प्रत्ययन्ते पौराः । अरे चारुदत्त वटुक न प्रत्ययते एष पौरजनः । तदात्मीयया जिह्वया भण मया वसन्तसेना व्यापादितेति ।

।२। अरे चाण्डाला मनुष्यो न भणति चारुदत्तवटुकः । तद्भणयत कृपाता जर्जरवंशखण्डेन शृङ्खलेन ताडयित्वा ताडयित्वा ।

।३। भो चारुदत्त भण ।

।४। व्यापादिता ।

।५। अरे तवात्र वध्यपर्यायः ।

।६। अरे तव ।

।७। अरे लेखं कुर्मः ।

।८। अरे यदि मम वध्यपर्यायस्तदा तिष्ठतु तावन्मुहूर्तम् ।

।९। किन्निमित्तम् ।

।१०। अरे भणितो ऽस्मि पित्रा स्वर्गं गच्छता यथा पुत्र वीरक यदि तव वध्यपर्यायो भवति मा सहसा व्यापादयसि वध्यम् ।

॥ पत्रं १६८ ॥

।१। अरे किन्निमित्तम् ।

।२। कदापि को ऽपि साधुरर्थं दत्वा वध्यं मोचयति । कदापि राज्ञः पुत्रो भवति तेन सर्ववध्यानां मोक्षो भवति । कदापि हस्ती बन्धं खण्डयति तेन सम्भ्रमेण वध्यो मुक्तो भवति । कदापि राजपरिवर्तो भवति तेन सर्ववध्यानां मोक्षो भवति ।

।३। किं किं राजपरिवर्तो भवति ।

।४। अरे रे वध्यपालिकाया लेखं कुर्मः ।

।५। अरे शीघ्रं मारयत चारुदत्तम् ।

।६। आर्य चारुदत्त राजनियोगः खलु अपराध्यति न वयं चाण्डालाः । तत्स्मर यत्स्मर्तव्यम् ।

।७। अरे इदं दृश्यते दक्षिणश्मशानं यत्प्रेक्ष्य वध्या झटिति प्राणान्मुञ्चन्ति । पश्य पश्य ।

अर्धं कलेवरं प्रतिवृत्तं कर्षन्ति दीर्घगोमायवः ।
अर्धमपि शूललग्नं वेशमिवाट्टहासस्य ॥

।८। न तावद्गमिष्यामि चारुदत्तकं व्यापाद्यमानं तावत्पश्यामि। कथमुपविष्टः ।

।९। चारुदत्त किं भीतो ऽसि ।

॥ पत्रं १६९ ॥

।१। आर्य चारुदत्त गगणतले प्रतिवसन्तौ चन्द्रसूर्यौ विपत्तिं लभेते किं पुनर्जना मरणभीरुका मानवा वा लोके। को ऽप्युत्थितः पतति को ऽपि पतितो ऽप्युत्तिष्ठते। उत्तिष्ठत्पततो वसनपर्यायः शवस्य पुनरस्ति। एतानि हृदये कृत्वा संधारयात्मानम्। एतच्चतुर्थं घोषणास्थानं तद्‌घोषयाम ।

।२। आश्चर्यं अस्थानपरिश्रान्तां समाश्वास्य वसन्तसेनिकां नयन् अनुगृहीतो ऽस्मि प्रव्रज्यया। उपासिके कुत्र त्वां नेष्यामि ।

।३। आर्यचारुदत्तस्यैव गृहम्। तस्य दर्शनेन मृगलाञ्छनस्येव कुमुदिनीमानन्दय माम् ।

।४। कतरेण मार्गेण प्रविशामि। राजमार्गेणैव गच्छामि। उपासिके एहि एहि अयं राजमार्गः। किं नु खलु एष राजमार्गे महान् कलकलः श्रूयते ।

।५। कथं पुरतो महान् जनसमूहः। आर्य जानीहि तावत्किं न्विदमिति। विषमभराक्रान्तेव वसुन्धरा एकवासोन्नता उज्जयिनी वर्तते ।

।६। इदं च पश्चिमं घोषणास्थानं तत्ताडयत डिण्डिमम्‌द्घोषयत घोषणाम्। भो चारुदत्त प्रति पालय मा भैः शीघ्रमेव मार्यसे ।

॥ पत्रं १७० ॥

।१। उपासिके त्वं किल चारुदत्तेन मारितासीति चारुदत्तो मारयितुं नीयते ।

।२। हा धिक् हा धिक् कथं मम मन्दभागिन्याः कृते आर्यचारुदत्तो व्यापाद्यते। भो त्वरितं त्वरितमादिश मार्गम् ।

।३। त्वरतां त्वरतां बुद्धोपासिका आर्यचारुदत्तं जीवन्तं समाश्वासयितुम्। आर्या अन्तरमन्तरं दत्त।

।४। अन्तरमन्तरम् ।

।५। आर्य चारुदत्त स्वामिनियोगो ऽपराध्यति तत् स्मर यत्स्मर्तव्यम् ।

।६। आर्य चारुदत्त उत्तानो भूत्वा समं तिष्ठ एकप्रहारेण मारयित्वा त्वां स्वर्गं नयामः ।

।७। आकृष्टः सरोषं मुष्टामुष्टिना गृहीतो ऽपि ।
धरण्यां किमर्थं पतितो दारुणाको ऽशनिसन्निभः खड्गः ।

यथा एतत्संवृत्तं तथा तर्कयामि न विपद्यते आर्यचारुदत्त इति। भगवति सह्यवासिनि प्रसीद प्रसीद अपि नाम चारुदत्तस्य मोक्षो भवेत्तदानुगृहीतं त्वया चण्डालकुलं भवेत् ।

।८। यथाज्ञप्तमनुतिष्ठावः ।

।९। भवतु एवं कुर्वः ।

।१०। आर्या मा तावत् मा तावत् आर्या एषाहं मन्दभागिनी यस्याः कारणादेष व्यापाद्यते ।

॥ पत्र १७१ ॥

।१। त्वरितं का पुनरेषा अंसपतता चिकुरभारेण ।
मा मेति व्याहरन्ती उत्थितहस्ता इत एति ॥

।२। आर्य चारुदत्त किं न्विदम् ।

।३। आर्य चारुदत्त किं न्विदम् ।

।४। कथं वसन्तसेना ननु खलु अस्माभिः साधुर्न व्यापादितः ।

।५। अरे जीवति चारुदत्तः ।

।६। जीवति वर्षशतम् ।

।७। प्रत्युज्जीवितास्मि ।

।८। तद्यावद्यथासंवृत्तं राज्ञो यज्ञवाटगतस्य निवेदयावः ।

।९। विस्मयं केन गर्भदासी जीवनं प्रापिता । उत्क्रान्ता मे प्राणाः । भवतु पलायिष्ये ।

।१०। ननु अस्माकं राजाज्ञप्तिर्येन सा गणिका व्यापादिता तं मारयत । तद्राष्ट्रियश्यालमेवान्वेषयावः ।

॥ पत्रं १७२ ॥

।१। आर्य चारुदत्त सैवाहं पापा यस्याः कारणादियं त्वया असदृशी अवस्था प्राप्ता ।

।२। आश्चर्यं आश्चर्यं जीवति वसन्तसेना ।

।३। सैवाहं मन्दभाग्या ।

।४। अतिदक्षिणतया किं न्विदं व्यवसितमार्येण ।

॥ पत्रं १७३ ॥

।१। शान्तं पापं तेनास्मि राजश्यालेन व्यापादिता ।

।२। तेनानार्येण व्यापादिता एतेनार्येण जीवं प्रापितास्मि ।

।३। न प्रत्यभिजानाति मामार्यः । अहं स आर्यस्य चरणसंवाहचिन्तकः संवाहको नाम द्यूतकरैर्गृहीत एतयोपासिकया आर्यस्य सम्बन्धीत्यलङ्कारेण निष्क्रीतो ऽस्मि । तेन च द्यूतनिर्वेदेन शाक्यश्रमणकः संवृत्तो ऽस्मि । एषापि आर्या प्रवहणविपर्यासेन पुष्पकरण्डकजीर्णोद्यानं गता तेनानार्येण न मां बहु मन्यसे इति बाहुपाशबलात्कारेण मारिता ।

॥ पत्रं १७५ ॥

।१। विस्मयं । एवं दूरमतिक्रान्त उद्दाम इव गर्दभः ।
आनीतः खल्वहं बद्धः कुक्कुरो ऽन्य इव दुष्करः ॥

।२। समन्तत उपस्थितः स राष्ट्रियबन्धः । तत्कमिदानीमशरणः शरणं प्रव्रजामि भवतु तमेवाभ्युपपन्नशरणरक्षणं शरणं गच्छामि । आर्य चारुदत्त परित्रायस्व परित्रायस्व ।

।३। आर्य चारुदत्त मुञ्च मुञ्च व्यापादयाम एनम् ।

।४। भो अशरणशरण परित्रायस्व ।

॥ पत्रं १७६ ॥

।१। भट्टारक चारुदत्त शरणागतो ऽस्मि । परित्रायस्व परित्रायस्व । यत्तव सदृशं तत्कुरु । पुनर्न दूषयिष्यामि ।

।२। व्यापादयत किन्निमित्तं पातकी जीव्यते ।

।३। गर्भदासि प्रसीद प्रसीद । न पुनर्मारयिष्यामि तत्परित्रायस्व ।

॥ पत्रं १७७ ॥

।१। आश्चर्यं प्रत्युपज्जीवितो ऽस्मि ।

।२। आर्य कृतार्थास्मि ।

।३। ईदृशमनित्यत्वं प्रेक्ष्य द्विगुणो मे प्रव्रज्यायां बहुमानः संवृत्तः ।

।४। साम्प्रतं संजीवितास्मि ।

ADNOTATIONES.

Pag. 1.

l. 3. B om. syll. ट्ट। —

l. 9. C परिश्रमेण। —

l. 10. A आर्यविदग्धमिश्रान्। —

l. 16. B om. syll. ज्ञा। —

Pag. 2.

l. 1—3. B om. verba शूद्रको . . . किल। —

l. 7. A संगीतक। —

l. 8. AC आः। —

l. 13. A तद्यावदहं गत्वा गृहिणीमाहूय। — BC किंचित्। —

l. 14. Cod. D fol. 2 incipit syllabis रात्रो न वेति। — A एष भोः का° om. च। —

l. 15. B अविद् भो २। C अविद् भोः भोः। D marg. अदृष्टाश्रुतसंप्राप्तावविदाविद् भोः पदम्। Com. अविद् अविदेति निर्वेदे कष्टं कष्टमित्यर्थः। — A संगीतोबा°।

l. 17. BC किं ब्वि। — C कुटुंबि°। — A उबब्रादितं। —

l. 18. C न्नं। —

l. 19. Vocem खु syllaba longa praecedat oportet. itaque post vocalem brevem sive ancipitem (i. e. ए aut ओ aut vocalem brevem cum Anusvâra) scripsi क्खु। post longam vero खु। — Idem valet de जेव्व et ज्जेव्व। In codicibus cum nulla constantia sit, utriusque vocis scripturae discrepantiam non notabo. —

l. 20. AB कटाह। — AB परिश्रन्तण। C परिश्रंतण। D परिश्रन्तेण deleta ut videtur diphthongo. D marg. परिवर्तनेन परिमार्जनेन। Com. मार्जनेन। —

l. 21. pro सारा A साणा। B सास। —

l. 22. D उद्दीवअन्ती। marg. उद्दीपयन्ती। — A अहिअं। —

l. 24. A पातरासो वि। —

l. 25. B पावं सं विअ। — D om. विअ। —

Pag. 3.

l. 1. C सुमणाउं। —

l. 2. C पवेदं। D पोदं। — A कुडुंविणीं। D कुडुम्बिणिं। —

l. 5. C इग्र ह्मि। D इग्र म्हि। —

l. 8. A पठति। —

l. 9. BCD किं वि। — Com. ग्रन्नदव्वं = ग्रन्नरूपं द्रव्यं pro ग्रसिदव्वं। —

l. 12. Pro घिग्रं quod D om., C पिग्रं = प्रियं। — D दही। —

l. 13. रसाग्रणं सव्वं ग्रह्नि त्ति। — A तं pro ते। — BC ग्रासासेदु et C marg. ग्राशंसन्तु। D marg. ग्राशंसन्ताम्। Nos cum Com. —

l. 14. CD ग्रज्जे किं etc. —

l. 16. BCD दे। — D जिज्जिस्सदि। —

l. 17. C et Com. ग्रभावं ग्र गमि°। — D ज्जो pro ज्जं। — D वरंडु। — A लुंबुग्रो। B et D pr. m. लंडुग्रो sed D corr. — CD marg. et Com. वरण्डो दीर्घकाष्ठं तस्य लम्बुकः तत्प्रान्तनिबद्धो मृत्तिकास्थूणाः न हि द्रोणयां पानीयोद्धारे दूरमुत्थाप्याधः पात्यते। —

l. 19. C मरिसेदु semel. in D numerus २ sec. m. additus. —

l. 20. C इदं pro इमं। —

l. 21. D ग्रपणा कुसुमाइं गुम्फेदि। —

l. 22. BC °मोपहार। —

l. 23. A उवासो। D उवग्रासो। —

l. 25. BC ग्रहिन्नग्रवदी। D ग्रहिंन्नग्रग्रदी। —

Pag. 4.

l. 3. पेक्खन्तु cum ABC bis scribendum. — BC भच्च pro भत्त। —

l. 4. A परिच्चयेण। B et D pr. m. परिच्चएण। D corr. ut nos. Com. भत्तुपरिव्वएण भक्तपरिव्ययेन ग्रोदनव्ययेनेत्यर्थः। यद्वा कर्तृपरित्यागेन। voluit भर्तृ°। —

l. 5. D om. पसीद पसीद। —

l. 9. C ग्राः। D om. ग्रा। — BCD पुत्ता। —

l. 10, BCD कलापं। — A ससुग्रं om. धं। — C कप्पिज्जं त्तं। Com. वज्जन्तमिति पाठे वध्यमानं। voluit igitur वज्कन्तं। —

l. 13. A ग्रणुचिट्ठीग्रदु त्ति पाद°। BC °ग्रदि त्ति पाद°। —

l. 14. D कधेहि semel. — A इह। Com. एत्थ। — D उग्रवासके। —

l. 15. AB केण २। —

l. 17. D तेण हि ता गच्छदु। — D ग्रम्हारिसजणासोज्जोग्गं। —

l. 19. D ग्राणाबेदि त्ति नि°। —

l. 21. C उज्कइणीए। —

l. 22. D भोदु एणं दाव उग्रणिमन्तिस्सं। Com. भवतु इममुपनिमंत्रयिष्ये। —

l. 23. A भवं pro ग्रज्जो। —

l. 24. D om. बम्हणं। — C वाबडा। D वात्तबडो। —

Pag. 5.

l. 1. D णीसवणं च। et in marg. निस्रावकं च। घृतादिसहिततंडुलपूर्णपात्रं निस्राव इति यस्य प्रसिद्धिः। णिस्सव्रत्तमिति पाठे निःसपत्नमित्यर्थः। Com. णिसंवत्तं च पितॄणां समुत्सृष्टं घृतादि etc. ut D. —

l. 3. Pro ज्ञधा BC ज्ञं। D ज्ञदा। — C पटमं। D पठमं। —

l. 4. Pro पदे पदे मं C ममोपदेसं। D मं पदे पदे। —

l. 7. A निष्क्रान्ते। D °न्ताः। —

Pag. 6.

l. 1. D प्रावरक। —

l. 2. AB मये। — CD om. वि। Com. मयौवपि। voluit मयैवापि। —

l. 3. A मैत्रेयेण। — A आमन्तणाइं। D आमन्तणाकाइं। Com. आमन्तणाइं आमंत्रणानि। — D हा वत्थे। —

l. 4. AD अह्मीए। — A प्रग्रत्त। D पग्रत्त। B पेत्त। C अह्मोरत्तं पेरत्त। —

l. 5. A असिदो। —

l. 6. A चतुस्सालदु°। — D दुआरके। — A गलक्क। B मल्लक्क। Com. et D marg. मल्लकशतपरिवृतः तल्लकः पात्रविशेषः पत्रपुटो वा दोना इति प्रसिद्धः। (Hindust. دونا) चित्रकरपक्षे वर्णिकापात्रं मल्लकः। अभ्यन्तरचतुःशालाद्वारे उपविष्टश्चित्रकर इव छिबिअ स्पृष्ट्वा २ अंगुल्यग्रैः अपनयामि न तर्कयामि (D भक्षयामि) अत्यन्ततृप्तत्वादित्यर्थः। चित्रकरो अंगुलीसंस्थितलेखनिकया वर्णिकाभाण्डं स्पृष्ट्वा २ अपनयति विक्षिपति। अन्यथा वर्णिकाबिन्दुपातः स्यादिति। — D सदपि परिवुदो। A परिव्वुदो। —

l. 7. D अग्गंगुलीहिं। — C छिबिअ semel. A बिबिअ २। —

l. 8. 9. D तहिं तहिं। —

l. 10. AB एसो अ अज्ज°। — AB ज्ञुण्णावु°। —

l. 11. D पावरओ। —

l. 13. CD om. अज्ज। — A इदो २। —

l. 16. BCD om. च। —

l. 21. BC om. इति et मन्दं semel. D om. इति मन्दं मन्दं। —

l. 22. A ता ज्ञाव पविसामि। —

l. 23. BC भोदे। —

Pag. 7.

l. 1. A सार्वकाल। —

l. 4. D पावरओ। —

l. 13. A मृतः शरीरेण[धृतः। —

l. 14. A दालिद्ददादो। B दारिद्ददादो। cf. 6, 8. 17, 18. — C कदर om. दे। —

l. 19. C संक्रामिद। —

l. 20. D विभवस्स। — C पडिवचंदस्स। —

l. 21. B om. अहिअदरं। D अधिअदररमणीओ। —

Pag. 8.

l. 2. BCD पुत्ता। —

l. 3. D अरएणे गोवाल॰। BC गोबाल° अरणे। — वरडा Sskr. वरट et वरटी est vespa. Com. वरटा वीरिणी इति ख्याता तत्त्रस्ताः। वीरिणी est Hindust. بِرنی birni i. e. vespa. —

l. 11—14. Cf. Hitop. 31, 11—14. —

l. 11. BCD et Hitop. द्वीपरिगतः। — Hitop. सत्वात्परिभ्रश्यते। sed cod. P. cum nobis. —

l. 12. Hitop. निःसत्वः। Cod. P. cum nobis. —

l. 13. B धिहितो। C पिहितो। D विहितो। Hitop. निहतो। — A परिभ्रश्यते। —

l. 14. Omnes cum dramatis nostri tum Hitopadesae codices habent निधनता quod vix ferri poterit. Lassenius ex coniectura विधनता। —

l. 15. A सुमरिश्च २। —

l. 17. C पहुबस्य। —

l. 19. Com. स्वजनानां बन्धूनां जनानां अन्येषामुदासीनानां। —

l. 20. भवति चेति चकारो हेतौ। वनगमने कलत्रपरिभवो हेतुः। —

l. 22. BCD गच्छ त्वमपि। —

Pag. 9.

l. 1. BC om. देवदा et habent पा दे पसीदन्ति। — D पा दे पसादं देन्ति (देन्ति)। —

l. 2. C देवेसुं अच्चिदेसुं। —

l. 3. D pr. m. गृहस्थितस्य sed corr. —

l. 4. A वाणि pro वाग्भिः। —

l. 5. D तुष्यन्ति देवता नित्यं शमिनां। —

l. 9. D pr. m. वामदो sed corr. — D दक्खिणा in marg, deinde दक्खिणादो। —

l. 10. A राजवल्लहा। —

l. 11. D मूसओ। —

l. 12. BCD अहिमुहावलिदो वज्झो (B वज्जो) दाणिं। Com. कालसर्पस्य मुखापतितो मूषक इव वध्यो भविष्यामि। — C marg. अहिमुखापतित। D marg. अभिमुखा°। —

l. 14. C निवर्तयामि। —

l. 15. A तिष्ठ वसन्तसेने २। C ति° वस° ति° ति°। —

l. 19. Com. विशदौ संचरणालाघवगुणान्वितौ पटू इति यावत्। —

l. 22. Adscribam verba Commentarii ad primum hoc S'akârae sermonis specimen, quanquam corrupta et quorum emendationem certam non habeo: शकारभाषायां चवर्गशिरस्थितो अंतस्था यकार लेख्यः वृस्पृष्टा तालव्य इति वचनात् स च संयोगः प्रयत्नलाघवात् पूर्वस्य गुरुत्वं न (Cod. ग) करोति। D marg. शकारभाषायां चवर्गशिरः स्थितो ऽन्तस्थो य (?) कारो लेख्यः। — A च्चिष्ट (sic) वसं° चिट्ठ। B चिष्ट वसं° श्चि॥ (sic). C चिट्ठ वसं° चिट्ठ। D चिष्ठ वसं° चिष्ठ। Com चिष्ट। —

l. 23. D pr. m. याश्चि धावश्चि et corr. °त्ति °त्ति। —

l. 24. A मलोह्णि। Com. न म्रियसे। AB चिढ। C चिट्ठ। D चिढ। —

l. 25. A उत्थादि et हुडके। — Com. तब्रश्शी वराकः। —

Pag. 10.

l. 2. C hic et semper अज्जए। — ABC चिट्ठ। D pr. m. चिट corr. चिट्ठ। —

l. 3. A गच्छत्ति अत्तिका। — Com. अंतिकान्मम यद्वा अंतिका ज्येष्ठा मे भगिनी। अत्तिका भगिनी ज्येष्ठेत्यमरः। —

l. 4. D मोरि। Corrigendum erit मोली। —

l. 5. A भट्टके। BCD भट्टके। Com. शामिश्र भट्टके अ स्वामी स्वामिभट्टारकः। —

l. 6. C वपणे। —

l. 7. A वसन्तसेने २ तिढ २। —

l. 12. A चिढ २ वसंतशेणिए। B चिढ वसंतशेणिए चिढ। C चिट्ठ वसं° चिट्ठ। D pr. m. चिढ corr. चिट्ठ। —

l. 13. A मम्महं। B बंह्मणां। C बह्मणां। D बम्हंहं। Cf. Var. II, 38. S'ak. 35, 14. Lassen. Anthol. 69, 17. — ABC वट्टअन्ती। D वट्ठ°। —

l. 14. BC शयणाके। — D णिद्दिदअं। C marg. निर्दयं। tum मे foret = मां। Cf. L. p. 432. Com. et D marg. निद्रां। —

l. 16. A रावण°। — AB व्व pro व। —

l. 18. Com. विशेषयन्ती अतिशयाना। Est igitur स्वार्थे णिच् sicut p. 59, 14. et M. 14, 107. —

l. 20. BCD प्रविसृतः। Com. प्रविसृतः प्रचलितः et sic D marg. — D निरुध्यां। Com. न निरुणध्मि अपि तु रुणध्म्येव। नकारः काकौ। Legisse videtur न रुन्ध्यां। —

l. 23. Com. नाणं शिवांकं टंककादि वित्तं तस्य मोषणशीलः कामो यस्य कशिका चर्मकाष्ठिका। चौराणां किंचिन्नया चोपकरणं भवति तदत्र कशोक्ता कशाचाश्वताडना चर्मसडिका (?) उच्यते। — Com. मच्छाशिका मत्स्यभक्षिका। मश्कं (sic) शुष्कमांसमित्येके। — ABD लासिका। Com. लाशिका नर्तकी। —

l. 24. णीशाशा sic Codices. D in interpr. Sanscr. निर्नासा et in marg. नकटी लोके। Cf. Hindust. نکٹا *noseless*, et Mahratt. नकटा *that has a snub or squab nose*. Com. णिणासा निम्ननासा। — कुल° Com. कुलं शस्तं नाशयति पातित्यजननात्। — A मंतूषिका। —

Pag. 11.

l. 4. A विटजनपरिघाटितेव। D °नखखंडितेव। Com. विटनखपरिमृष्टवीणातुल्या मनोहरत्वा च्छन्दवत्त्वाद्वा तुल्यत्वं। विटसदृशौ कुंडलौ। —

l. 6. C काणाक्कणान्त। — A भूसण। D भूषण। — AB सद्ददमिस्सं। —

l. 7. BCD दोबद्दी। —

l. 9. AB वसुश्श। D वश्शुश्श। — BC वहणिं। — A विम्रश तं। B वि तं। — AB सुभद्दं। —

l. 10—13. De metro Com. dicit प्रतिपादं चतुर्दशमात्रत्वात् मात्रासमकं छन्दः ।. Sed apud Colebr. singuli Mâtrâsamaki versus sedecim mâtras habere dicuntur. —

l. 11. D खाहिसि cf. L. 434. Littera finalis radicis खाद् etiam in hodiernis linguis Indicis elisa est; confer Mahratt. खाणे et Hindust. كهانا. — D मंशमच्छकं । —

l. 12. D एदेहि मंशमच्छकेहिं । Scripsi एदेहिं cum ABC, nam Anusvâras necesse non est positionem faciat. Vide adnot. ad 36, 12. —

l. 13. ABC मलत्रं । — ABC शेवन्ति । D सेवन्ति । — D marg. शुनका मृतकं न सेवन्ते अपि तु सेवन्त एवेत्यर्थः । Com. vero haec habet: शुणश्रा श्वा मृतकं न सेवते । नकारः शि रश्चालने । तेनापि तु सेवत एवेत्यर्थः । e quibus apparet, legisse eum singularem, quem cum metrum flagitare videretur, codicum scripturam reliqui. Cf. L. 434. Nescio vero, rectene scripserim शुनिका in interpretatione Sanscrita. —

l. 15. AB विवेशितमुद्दहन्तो । —

l. 16. D रसनाः । —

l. 17. Ad वक्रेण D in marg. उपलक्षिता । Com. लक्षिता । —

l. 18. A अस्तादं । BC अस्ताहुतं । —

l. 19. BC अन्हेहि । — A अमिशालिअन्तो । D अहिशालअन्तो । Confer 12, 10 et वुक्कअन्ते 22, 9. —

l. 20. CD वणणे । — A कुक्कुरेहिं । BCD °उेहिं ।

l. 21. A शिचं । B गंधं । —

l. 22. AB सवेठणं । C शवेठणं । D सवेंठणं । Si recte interpretatus sum सवेष्टनं scribendum est शवेष्टणं । Cf. 127, 12. Sed fortasse शवेपटम्रं = सवृन्तकं scribendum. Cf. Var. 3, 45. „Cor cum caule" in ore S'akârae non offenderet. Et sic fere Com. legisse videtur. Dicit enim: शीघ्रं त्वरितं सवेगं सवृन्त बन्धं . . . सवेट्ठनं सवेष्टनमित्यर्थ इत्येके । — D हलकं । —

l. 23. B पल्लविश्रा । C पल्लविए । Confer 12, 9. —

l. 25. D न भेतव्यं semel. —

Pag. 12.

l. 1. A माहविए २ । कणणाऊर २ । मदणिए २ । —

l. 3. A इत्थिअं । B इत्थिवामणणे° । C इत्थिआमणणे° । D इत्थिवमणणे° । —

l. 5. ABC इत्थिआणं । D इत्थिकाणं । — BCD मोडेमि । D marg. et Com. मारयामि । —

l. 6. BC परिश्रणो श्चि परिब्भट्ठो । D परिश्रणो श्चि मे परिब्भट्ठो । —

l. 8. CD अन्विष्यताम् semel. —

l. 9. Codices परहुदिअं । scribe पलहु° । — D om. वा । — C पल्लविअं । —

l. 10. A repetit वा post वग्रन्तमाग्रं। — D ग्रहिग्रालग्रन्तीं ut 11, 19. — ABC को। D को तुमं पलिन्नाइस्सदि। —

l. 12. C ज्ञमदग्ग°। —

l. 13. D कुन्दी°। —

l. 14. D हगे। — Codices हत्ये। —

l. 15. D °किदं। —

l. 16. C पां पेक्ख पां पेक्ख। ABD पां पेक्ख २। —

l. 17. D ग्र pro ग्र। — A मग्रवयके। BCD मत्तके। —

l. 18. B नुग्र। CD उग्र। —

l. 20. A होइ। — B ग्र pro ग्रे। —

l. 21. A ग्रवपाला। —

l. 23. A मालीहग्रिग्र। BC मालीग्रग्रि। D मालीग्रदि। —

l. 24. AD om. स्वगतं। — BCD भग्रनुप्पा°। —

l. 25. BD भो pro भोदु। — ABD om. प्रकाग्रं। — D इमादो त्तणादो। — Codices किं बि। — D marg. तर्क्यते ग्रहीतुमिति ग्रेषः। Com. तह्नीग्रदि ग्रन्विष्यते। —

Pag. 13.

l. 1. A वसंत› pro विटः। — BC ग्रान्तं semel, om. पापं। D ग्रान्तं २। —

l. 4. BCD हगे। — AB पुरिग्रे। D देवतपुलिग्रे et in marg. दैवतपुरुषः। — B मणुग्रग्रो। D मणुग्रग्रके। — BC कामइव्वो। —

l. 5. A ग्रका° pro वसंत°। — AD ग्रान्तं पापं। B ग्रान्तं २। C सन्तं सन्तं। — ABC मन्तेग्रि। —

l. 6. Com. सतालिकं विटस्य हस्ते तालदानं कृत्वेत्यर्थः। — B भावे semel. — A पेष। B पेत्य। D पेक्ख २। C पेक्ख दाव मं ग्रन्तलेण। Com. प्रेक्षस्व तावत्। मं ग्रन्तरेण मयीत्यर्थः। इत्येके ग्रन्तरेण चिन्तेन ग्रन्योन्यं (leg. इत्यन्ये?) — A ग्रुग्रणिदूदा। —

l. 7. BCD गणिग्र दालिग्रा। — C पां ज्ञेण। — D pr. m. भणादि deleta vocali longa. —

